॥ मलयमारुतः ॥

॥ द्वितीयः स्पन्दः ॥

केन्द्रीय-संस्कृत-विद्यापीठम्
तिरुपति
१९७१

MALAYAMARUTA

A collection of minor works in Sanskrit
poems, plays, hymns, anthologies etc.

Part two

Edited by

Dr. V. RAGHAVAN
Former Chairman, The Central Sanskrit Institute, Tirupati.

Published by

THE CENTRAL SANSKRIT INSTITUTE,
TIRUPATI
1971

Price : Rupees Five
मूल्यम् - पञ्च रूप्यकाणि

भारती विजयम् प्रेस्, मद्रास् - ५.

॥ मलयमारुतः ॥

संस्कृतसाहित्ये विद्यमानानाममुद्रितानां
काव्य-रूपक-स्तोत्र-शतक-सुभाषितादीनां लघुग्रन्थानां
संग्रहः ।

द्वितीयः स्पन्दः

तिरुप्पतिस्थ-केन्द्रीयसंस्कृतविद्यापीठस्य भूतपूर्वाध्यक्षैः
डाक्टर् वे. राघवार्यैः
संपादितः

तिरुप्पति-केन्द्रीयसंस्कृतविद्यापीठेन
प्रकाशितः
१९७१

आमुखम्

'मलयमारुत' - नाम्नोऽस्य प्रकाशनस्य आवश्यकता, स्वरूपं, वैशिष्ट्यं, प्रयोजनमित्यादिकं सर्वं तस्य १९६६-वर्षे प्रकाशितस्य प्रथमस्य स्पन्दस्य आमुखे वर्णितम्। अद्य सहृदयानां पुरत उपहृतो द्वितीयः स्पन्दः प्रथमस्य रीतिमेव अनुसरति॥

अत्रेतःपूर्वमसुद्रिता नानाहस्तलिखितकोशागारेभ्य उद्धृताः लघुग्रन्थाः- द्वे स्तुती, एकं खण्डकाव्यम्, एकमन्योक्तिशतकम्, एकः सदाचारोपदेशपरो धर्मवैद्यविषयको निबन्धः, एकस्सुभाषितसमुच्चयः, एकमेकाङ्करूपकं चेति-सप्त प्रकाशिताः। प्रतिग्रन्थमधष्टिप्पण्यां तत्तद्ग्रन्थ-ग्रन्थकारमातृकादिविषये यावदपेक्षितं संक्षेपेण निर्दिष्टम्। अपेक्षितस्थलेषु तत्र तत्र पंक्तीनां पदानां च अर्थः विशदीकृतः॥

सर्व एवैते लघुग्रन्थाः सम्यक् परिशोध्य सम्पादिताः। येषां नैका मातृका उपलब्धाः ते पाठान्तरप्रदर्शनपूर्वमेव प्रदत्ताः॥

मातृका-तत्प्रतिलिप्यादिप्रदानेनास्मिन् कार्ये उपकृतवद्भ्यो हस्तलिखित-कोशागाराधिकृतेभ्यो धन्यवादं वितीर्य, इतोऽप्यधिकं तेषां सहयोगं प्रार्थयमानः

मद्रास्
१५-३-१९७१

वे. राघवः

PREFACE

I have much pleasure in placing in the hands of scholars and lovers of Sanskrit *belles letters* the second collection of minor poems,—*Stotra, Kāvya, Subhāṣita* and One-Act play in the periodical publication called *Malayamāruta* which was started sometime back during my Presidentship of the Central Sanskrit Institute, Tirupati.

The background of the publication, its purpose, scope, plan and features were explained in the inaugural issue of it brought out in 1966.

The present number, the second, brings to light seven minor works from manuscripts preserved in different mss. Libraries in the country. The opening composition is a Stotra on Lord Kṛṣṇa called and modelled after the celebrated *Kṛṣṇakarṇāmṛta* of Līlāśuka by a member of a prolific Śrīvaiṣṇava family who enjoyed the patronage and guru-ship of the Surapuram Chiefs. On the authors of this family and their works, attention is invited to my long paper on the subject in the *Journal of the Andhra Historical Research Society*, Rajamahendra, XIII. i. The ms. of this hymn is from the Anup Library, Fort, Bikaner. The second piece, which is anonymous, is from the Sarasvati Mahal Library, Palace, Tañjore and is an address to Śiva in twenty-three verses, expressing *Bhakti* and *Vairāgya*. The *Ṛtuvarṇana* by Durlabha appearing next is a very pleasing poem in felicitous verses, reminiscent of Kālidāsa's *Ṛtusamhāra* and is based on a ms. in the Anup Library. In the last number was given a century of Subhāṣitas, the *Somanāthaśataka*, by the wellknown musician-poet Somanātha ; another century of his Subhāṣitas in *Anyāpadeśa* style called *Anyoktimuktāvalī* is given here as the fourth *Khaṇḍakāvya*. I have edited this on the basis of two mss., one from the Asiatic Society, Calcutta, and another from the Scindia Oriental Institute, Ujjain. The fifth, the *Cārucaryā* of Bhoja, has been well-known from its mss. but has not so far been edited ;

I have consulted for my edition here three mss. of it, two in the Madras Government Oriental Mss. Library, one of them giving a slightly longer text, and a third in the Oriental Institute, University of Mysore; the last mentioned gives a very large text of Bhoja under this name *Cārucaryā*, in which the *Cārucaryā*-text as given in other mss., in about 140 verses, forms one section. The *Cārucaryā* is on the daily routine, on good and healthy conduct and activity in the things that one does during a day. The sixth text bears an intriguing title in its ms. in the Bhandarkar Oriental Research Institute, Poona; it is a collection by a Jain Sadhu of *Subhāṣitas*, numbering about a hundred. The concluding work is an one-Act play - of the type of *Rūpaka* called *Aṅka*,- but not conforming to the *lakṣaṇa* of this type as laid down by Bharata - on the traditionally handed down life-story of King Bhoja of Dhār; although a production only of the last century, the play, with its simple style and flowing action, has its own quality and attests the dramatic talent of its author who has, in a similar manner, written another play to illustrate the equally neglected type of Rūpaka, the *Īhāmṛga*.

Seven mss. collections in the country are represented in the works that have been presented in this volume.

At the beginning of each work, I have given in the Sanskrit foot-notes information on the ms.-sources and acknowledged the names of scholars and friends who had helped by loaning the original mss. or by supplying transcripts or collations from their mss. I appeal for their further co-operation in the bringing to light of the heaps of minor works lying in the mss.

In the case of each work, I have also added in the footnotes brief Sanskrit comments in elucidation of rare words and difficult expressions.

Madras
15th March 1971

V. RAGHAVAN

अनुक्रमणिका

॥ श्रीः ॥

॥ अभिनवकर्णामृतम् ॥*

॥ सुरपुरम् अण्णयार्यविरचितम् ॥

सौभाग्यं त्रिदशव्रजस्य विभवस्थेमा रतीशश्रिया-
मैश्वर्यं शिशिरांशुवंशजनुषामालम्बनं योगिनाम् ।
नन्दानन्दनिदानमस्तु पुरतस्तद्वस्तु मस्तुप्रियं[1]
किञ्चिद्गोपकिशोरताकवचितक्रीडानिरूढाशयम् ॥ १ ॥

क्व भुवनसङ्कुलङ्घिमहिमा वसुदेवसुतः
क्व पुनरहं मितंपचकथापथजांघिकधीः ।
अपि तु सरस्वती मम नुनूषति धूतभया
तमपि तदीयदिव्यकरुणापरिणाहबलात् ॥ २ ॥

---

* बीकानेरस्थ-राजकीय-अनूपपुस्तकालयस्थमातृकातः । मातृकाप्रतिलिपिः डा० कु. कुह्नराजमहाशयानां, तद्भागिनेयेन डा० कु. कुञ्जुण्णिराजेन दत्ता । एतत्स्तोत्रकर्तॄणां सुरपुरम् अण्णयार्याणां वृत्तान्तः मया राजमहेन्द्रस्थ—'आन्ध्र-इतिहास-परिशोधन-संस्थापत्रिकायाः' १३-संञ्चिकायाः १-भागे प्रकाशिते निबन्धे १५, २२-पृष्ठयोः द्रष्टव्यः । कोसलवंशीय-सुरपुर (Shorapur)पतेः राघवपुत्रस्य वेङ्कटस्य गुरूणामेतेषामण्णयार्याणां कालः अष्टादशशतकमध्यभागः । द्रष्टव्यं च 'न्यू केटलागस् केटलागोरम्', १-भागः (द्वितीयावृत्तिः १९६८) पृ. ९४, २९८ । नाम्ना, वस्तुना, शैल्या च लीलाशुकीयं कृष्णकर्णामृतं स्तोत्रमिदमनुकरोतीति स्पष्टम् ॥

१. मस्तु दध्युपरिस्थमुदकम्, तत्प्रियम् ।

अव्याजं स्तुमहे न तत्र विशयः स्तव्यः त्वमेवासि यत्
किं त्वन्या मम तन्तनीति हृदये चिन्ता कथं तां (कथां कां?) [२] मुहुः।
व्यक्तं ब्रूहि रमां विना व्रजवधूसक्तोऽसि तद्वर्ण्यतां
मुक्त्वा त्रीणि जगन्ति नित्यमपुषो वत्सानुतैतद्विभो[३] ॥ ३ ॥

प्रस्तोष्यामि न चेद्गुणांस्तव हरे भिन्द्यां मदंहः कथं
क्षुद्रक्षत्रनिबर्हणं यदि पुनर्ब्रूयां मनोज्ञं न तत् ।
तद्वक्ष्ये शिशुचेष्टितानि न रुषा क्षुभ्येत चेत्ते मनो
गव्यस्तेयमुखैः तदात्वविगमाद्गूढैर्मदुद्घाटितैः ॥ ४ ॥

आच्छाद्याकृतिमादिमां पितृमुदे भूत्वा शिशुः प्राकृतो
मातुर्द्रागयथायथं कुचतटीं चुम्बन्मृषोद्यत्तृषः ।
मुग्धैरर्भकनाटिकासु रुदितैर्नान्दीमिव प्रस्तुव-
न्नास्तां मे हृदि कोऽप्यकृत्रिमवचःसौभाग्यगर्वाङ्कुरः ॥ ५ ॥

निद्रामुद्रितनेत्रमञ्जनलवश्रीमत्कपोलालिकं
निर्व्याजस्मितरुद्धमुग्धरुदितप्रारम्भबिम्बाधरम् ।
फालोपान्तमिलत्करद्वयमुधोन्मीलत्प्रणामाञ्जलिं
बालं भूषितडोलमीशमवशादालम्बते मे मनः ॥ ६ ॥

इहायाहीत्यञ्चत्करकमलताले पितृजने
विधून्वन्पादाब्जे मणिकटकनिक्काणसुभगम् ।
समुत्तिष्ठन्मूर्ध्ना भुजयुगलमुत्क्षिप्य च हसन्
हरिर्मध्येडोलं कृतविहृतिरास्तां मम हृदि ॥ ७ ॥

---

२. कां त्वदीयां कथां मुहुः स्तुमहे इत्येव विशय इत्यर्थः । ३. इत्येतदद्भुतद्वयमध्ये कतरद् वर्ण्यतामिति ब्रूहीत्यर्थः ॥

यशोदाया ग्रैवेयकमभिमृशन् कुड्मलितदृक्
पिबंस्तन्यं तृप्तः कुचकलशमापीड्य दशनैः ।
स्मिताङ्कूरक्षीरद्रववलनमुग्धाधरदलो
मुखं तस्याः पश्यन् वलतु हृदि मे वल्लवशिशुः ॥ ८ ॥

वलद्ग्रीवं साचीकृतविकचनिष्पन्दनयनं
निजच्छायां पश्यन् मणिखचितडोलान्तरगताम् ।
स्मितव्यक्ताङ्कूरद्दशनमुकुले वक्त्रकमले
निधायाङ्घ्रिं चुम्बन् हरिरवतु गोपार्भकवपुः ॥ ९ ॥

अनुगतबलभद्रभद्रलीला-
व्यतिकरकर्बुरितस्वविभ्रमाणि ।
विदधतु कुशलं विचेष्टितानि
प्रतिपदमद्भुतगर्भितानि शौरेः ॥ १० ॥

अमृतं यदवाप पूतना सा
प्रतिपाद्यापि हलाहलं हरे ते ।
किमसौ तव मुग्धताविलासः
परिणामः करुणागुणस्य किंस्वित् ॥ ११ ॥

शकटासुरताडनं हरे ते
चरणाब्जस्य शिरीषकोमलस्य ।
किमु वल्लवसुन्दरीकठोर-
स्तनशैलार्पणसाहसस्य योग्या[४] ॥ १२ ॥

---

४. अभ्यासक्रिया ।

अविद्याछ(द्)मानं सकृदपि नतानां जनिमतां
 महावर्तं भित्वा दिशसि परमानन्दमपि यः ।
स एव त्वं नित्यं निजपदजुषां पुष्यसि मुदं
 तृणावर्तच्छेदाद्व्रज[५] इति हरे का स्तुतिरतः ॥ १३ ॥

चरन्तं जानुभ्यां चकितचकितापाङ्गवलनं
 मिलत्काञ्चीघण्टाकलकलतुलाकोटिरणितम् ।
वृतं डिम्भैर्हुम्भारवमुखरितास्यैर्हृदि भजे
 गुणावालं बालं कमपि कुहनागोपवपुषम् ॥ १४ ॥

दरविवलितग्रीवं साचीकृताक्षमुदञ्चित-
 स्मितमनुकलं स्थित्वा स्थित्वा विलोक्य पितुर्मुखम् ।
अथ सरभसं धावन्पांसुच्छटाछुरितालकः
 स्फुरतु पुरतः शौरिर्जानुप्रचारकुतूहली ॥ १५ ॥

अंसोत्तंसितवक्त्रमुन्नतनतग्रीवास्खलत्कौस्तुभं
 नृत्यत्कुण्डलमन्यशङ्किजघन (?)[६] प्रेङ्खत्कटाक्षाञ्चलम् ।
स्वान्तं चुम्बति मे समस्तकघटीविन्यस्तहस्ताम्बुजं
 कान्तं स्रस्तललंतिकारुचिमिलल्लम्बालकं बालकम् ॥ १६ ॥

अभजमनयोर्द्वित्रैरेव क्रमैः पदमीदृशं
 किमिह भविता भाग्यं भूयस्तरैरिति हृष्यतः ।
स्फुटमधुकरे दृग्भिः शक्रस्य[७] मे दिशतां मुदं
 चरणकमले धात्रीमालम्ब्य संचरतो हरेः ॥ १७ ॥

---

५. 'व्रजे' इति सप्तमी। ६. 'अञ्चिकाञ्चिजघनं' इति स्यात्। ७. इति हृष्यतः शक्रस्य दृष्टिभिः अनुबन्धिनीभिः 'स्फुटमधुकरे' लग्नमधुकरकुले इव शोभमाने हरेः चरणकमले मे कवेः मुदं दिशताम् इत्यन्वयः ।

उन्मीलन्नवनीतदानवचनैरुद्यन्मुधाताण्डवै-
रन्तर्गूढदरस्मितैरनुकलं वष्टव्यमन्थानकैः ।
अक्षीणाञ्जनकल्पनैः प्ररुदितैरम्बां मुहुर्हर्षय-
न्नव्याजैर्दधिमन्थनोत्सुकधियं भव्याय भूयाद्विभुः ॥ १८ ॥

चकितचकितापाङ्गं चारुस्मितं चलकुण्डलं
जठरनिहितभ्रश्यद्धान्यस्फुरत्करसंपुटम् ।
शबरतरुणीं मुग्धालापैः फलान्यभियाचतो
वलभिदुपलश्यामं शौरेर्वपुर्हृदि भावये ॥ १९ ॥

सन्ध्येव प्रथमा सरोजमुकुले सामिस्फुटे षट्पदान्
यावद्रागवती न्यधत्त शबरी जम्बूफलान्यञ्जलौ ।
तामुन्मीलदनन्तरत्नविभवां तावद्वितन्वन् निजैः
कृत्यैर्व्यञ्जितपारमेष्ठ्यविभवः क्रीडाशिशुः पातु नः ॥ २० ॥

उपायनीकृत्य पुरा किराती फलानि रामेण कृता विमुक्ता ।
त्वया तु मुक्ता इत धान्यराशिर्वदान्यमौले रचिता समुक्ता ॥ २१ ॥

कृत्वोलूखलमूर्धनि त्रिचतुरान्पर्वक्रमेणार्भकान्
स्थित्वा तेषु विधाय दुग्धकलशे च्छिद्रं च शिक्यस्थिते ।
किञ्चित्कुञ्चितजानु भुग्नवलितग्रीवं दरोत्तानिते
वक्त्रे न्यस्य शयं पयांसि पिबते तस्मै परस्मै नमः ॥ २२ ॥

निःश्रेणीनिवहेष्वभीशुषु तथा स्तम्भेषु कुम्भेषु च
स्थित्वा शिक्यगतान् प्रगृह्य कलशान् बालैः कृतक्ष्वेलितैः ।
अश्नद्भिर्दधिखण्डमण्डनवनीतादीन् पिबद्भिः पय-
श्चौर्यं संभृतशौर्यमस्तु जगतां मोदाय राधापतेः ॥ २३ ॥

दधिखण्डमण्डनवनीतकैतवा-
 दमृतं हरे त्वैदन्यधीश्वरैः (?)[८] ।
पृथुकैरभावि विबुधैः सुरारिता
 रुदतीषु गोपजरतीष्वलक्ष्यत ॥ २४ ॥

उपलब्धदुग्धदधिशीत्करोत्करं
 स्मितदिग्धमुग्धमधुराधराधरम् ।
जरतीविडम्बनधुरन्धरैर्वृतं
 पृथुकैः स्मरामि नवनीतहारिणम् ॥ २५ ॥

हरिणप्लुतक्वणितभूषणोत्करं
 परिवृत्तदृक्कतितरङ्गितव्रजम् ।
जरला(ठा)इला(ठा)दृग्रहभयेन धावतः
 कलये हरेः किमपि तत्पलायितम् ॥ २६ ॥

समुद्घुष्टं रात्रौ रतमिदमिदंपूर्वमिति ते
 वधूभिर्नीता त्वं तदनु सह केनापि भवनम् ।
तदेतत्किं बाले रतमिति नवोढाः प्रतिगृहं
 निरुन्धानः पायान्निगमविनुतो बल्लवविटः ॥ २७ ॥

आभीरार्भकयोः कयोश्चन मिथो लीलाजुषोः कन्दुका-
 वन्तर्द्धाप्य हसन् विवादसमये राधां विलोक्यागताम् ।
तावेताविति तत्पयोधरतटादाकृष्य चेलाञ्चलं
 तामाश्लेषणचुम्बनैरपरुषं[९] कुर्वन् हरिः पातु नः ॥ २८ ॥

---

८. द्वितीयार्धस्य उत्तरभागो दुष्टः। अर्थस्तु स्पष्टः। दध्यादिहरणलीलायाममृत-मथनकथारोपणम् ।

९. अप-रुषम् ।

मुखररशनं त्वाद्वक्षोरुहं(नृत्यद्वक्षोरुहं)कलङ्कण-
कणनसुभगं दृष्ट्वा निर्मथ्नतीं दधि राधिकाम् ।
स जयति कुचौ गृह्णन् पश्चादुपेक्ष्य विटाग्रणीः
सपदि विवशा चुम्बत्येनं विवृत्तमुखीव सा ॥ २९ ॥

आविर्भूतवतैव येन भवता सद्यस्तिरोधापितं
तन्नाभीसरसीरुहं स च मणिस्सा किं च पञ्चायुधी ।
स त्वं पञ्चषहायनो व्रजवधूचेतांसि गव्यानि वा
मुष्णासीति विचित्रमत्र न मया किंचिद्विभो गण्यते ॥ ३० ॥

अत्ता त्वं सचराचरस्य जगतस्तृप्तोऽसि गव्यैर्मितै-
र्नित्यं श्रीकमनः कदाप्यधिगतैर्हृष्टोऽसि मुग्धारतैः ।
एवं नाम विरक्तिरेव महती देव त्वया प्रस्तुता
जारश्चोर इति प्रथा तु मुनिभिः पारिप्लवैः कल्पिता ॥ ३१ ॥

देवक्या समवातरो निजपदादेवावलम्ब्य स्वयं
सा तु त्वां शुभलग्न एव सुषुवे देवी तथाप्यात्मजम् ।
तेन स्तेनविटाग्रणीरिति भवान् ख्यातश्चरित्रं तु ते
धन्यं पुण्यमिति स्फुटं बुधजनैः वीथीषु जोघुष्यते ॥ ३२ ॥

कथमर्जुनभञ्जनं हरे त्वां
कथयन्त्यर्जुनमित्रमित्यभिज्ञाः ।
अपि कर्णसुखप्रदां कथं त्वा-
मधिकृत्य प्रक्षि (थि ? हि ?) तां निशम्य वाचम्[10] ॥ ३३ ॥

---

१०. कथयन्तीति शेषः । कर्णसुखप्रदवाक् च कथमर्जुनमित्रं स्यात् इत्यर्थः । कर्ण-नाशहेतुभूतः कर्णसुखप्रदवागिति च विरोधाभासः । विरोधाभासान्तरमपि स्फुरति-यदर्जुनविषये तद्भञ्जकः तन्मित्रं भवति, कर्णविषये तत्सुखकरभाषणः तच्छत्रुर्भवतीति ॥

यमलार्जुनबन्धमुक्तये
कृतबन्धस्त्वमुलूखले विभो ।
स्वयमप्यनुभूय नः कृता-
न्यवितासीति विनिश्चितं मया ॥ ३४ ॥

क्वचन कृतनियुद्धं क्वापि गर्जानुबद्धं
क्वचिदुपचितनृत्तं कुत्रचिद्गीतयुक्तम् ।
कलयतु कुशलं मे कान्तवृन्दावनान्तं
प्रथितपृथुकलौल्यं पाशुपाल्यं मुरारेः ॥ ३५ ॥

क्वचन क्षपयन्नघं हरे
भवसि त्वं यदि वैभवं न ते ।
सततक्षपिताघसंहते-
स्तव नाम्नो महिमा कियान्वद ॥ ३६ ॥

सितांशुनिभमोदनं करतले दधद्दाधिकं
तरङ्गपवनोच्चलच्चिकुरबर्हिबर्हाञ्चलम् ।
कलिन्दतनयातटे कृतसजग्धि गोपार्भकैः
स्मितप्रचुरसंकथं किमपि भावये दैवतम् ॥ ३७ ॥

क्वचन भवता साकं सत्राशनैर्हविरश्नता
सदधि मधुरं भक्तं युक्तोपदंशपरिष्क्रयम् ।
(तव) सहचरैर्लब्धं गोपैर्हरे यदुपक्रमं
किमपि महितं सौभाग्यं तद्व्रजस्य विवर्धताम् ॥ ३८ ॥

चतुराननतां वहन् विधिः
किमियेष प्रकृतिं चतुष्पदाम् ।
[11]परथा विदधीत वञ्चनां
त्वयि देव प्रयते[12] न वा (नवां ?) कथम् || ३९ ||

मै (मयि) वत्स चतुर्मुखेत्यसौ यदते (दयते) प्रागिव नैतदुत्सुकः[13] ।
इति वत्सगणं गवां विधिर्विदधे देव तिरोहितं तव || ४० ||

मुधाकर्तुं यत्नं सरसिजभुवो गोपसुदृशां
प्रियाकर्तुं च त्वं तनय इव यासां समभवः ।
विलासैः पञ्चास्त्रप्रधनविवशास्ता विरचयन्
गति(:) स्तव्य(:) सेव्यः कथमसि मुरारे त्रिजगताम् || ४१ ||

किंचित्किंचिदुपात्तनर्त्तनकलाकिंमीरितभ्रूनतं(लतं)
पञ्चास्त्रोदयशिल्पकल्पनकृतप्रागल्भ्यनेत्राञ्चलम् ।
किंकुर्वाणवधूकटाक्षवलनैः क्रीडां दधद्विभ्रमै-
रङ्कूरन्नवयौवनं मुररिपोरङ्गं मुहुर्भावये || ४२ ||

प्रगल्भमन्दस्मितकन्दलश्रीः
प्रारिप्सितभ्रूलतिकाविलासः ।
पायादपायात्परमस्य पुंसो
वलां(वलन्) कटाक्षो व्रजसुन्दरीषु || ४३ ||

मदनगर्वमलिम्लुचविभ्रमो
वदनखर्वितपर्वसुधाकरः ।
व्रजवधूरतिशिक्षणदक्षिणो
वलतु मे हृदि वल्लवपल्लवः || ४४ ||

---

११. अन्यथा १२. पूजार्हे स्वपितरि । १३. एतदुत्सुकः गोवत्सोत्सुकः ।

भवान्नाथो गोपार्भक इति विटश्चोर इति वा
न दूये किंत्वेषा श्रुतिमकुटभूषायितपदा ।
सुधासिन्धोः कन्या शुभविभवधन्या तव कृते
व्रजस्त्रीसापत्न्यं वहतु जननी नः कथमिति ॥ ४५ ॥

कथमिव हरे दैत्यश्लाघाविघातनिरर्गल-
प्रसृमरभुजस्थेमा कौमार एव भवन्भवान् ।
कुसुमविशिखत्रस्तो यद्वा ननु प्रथितं वचः
पटुरपि जनः पुत्रादिच्छेत्पराजयमित्यदः[14] ॥ ४६ ॥

सापत्रपाणि सदरस्मितकोरकाणि
सामर्षका(क ?)न्दल[15]निशातविलोकितानि ।
मुग्धानि पान्तु भवता मुषितांशुकाना-
मब्जाक्षगोपसुदृशामनुनाथितानि ॥ ४७ ॥

किंचित्कुंचितबाहुयुग्ममवशप्रश्लिष्यदूरुद्वयं
किंचोद्यत्किलिकिञ्चितं परिणमन्मन्दाक्षलोलेक्षणम् ।
आतुं स्वं पटवर्गमञ्जलिकृतामाभीरवामभ्रुवा-
मङ्के काप्यनुरागिणी विजयतामालोकलीला हरेः ॥ ४८ ॥

वहति महती मूर्तिः[16] काचिद्दिगम्बरतां मम
प्रथितमहिमा पौत्रो जातो गजाजिनभाजनम्[17] ।
इति न भवतश्चिन्ता किंतावदभ्युदिता हरे-
र्व्रजमृगदृशां मुष्णंश्चेलान्यदाः पुनरेव यत् ॥ ४९ ॥

---

१४. प्रद्युम्नस्य कृष्णपुत्रत्वादेवमुक्तिः । १५. कन्दलानां नवोद्भिन्नत्वान्निशातात्वम् । १६. शिवरूपा । १७. तस्यैव रुद्रस्य कल्पान्तरे कथान्तरे च वराहभागवतादिपुराणेषु विष्णुपौत्रत्वेन श्रूयमाणत्वाद् गजाजिनभाजनत्वं च संगच्छते ।

मुखोद्वान्तक्ष्वेलानलबहुलधूम्यायवनिके
फणारङ्गे रत्नप्रकरकरदीपे फणिपतेः ।
त्वयारब्धं मध्येयमुनमरविन्दाक्ष नटनं
तदव्याद्व्याजस्फटरटितकल्लोलपटहम् ॥ ५० ॥

विधातुकामेन कलिन्दनन्दनां
विभो जलक्रीडनकेलिलालिताम् ।
भुजङ्गवृत्तेन विवासितस्त्वया
परो भुजंग(:)[१८]प्रविजानता नयम् ॥ ५१ ॥

त्वया युध्यन् गोवर्धनविधृतिदक्षेण विजित-
स्तृणं खादन् शक्रो दनुजमथन त्रात इति किम् ।
तथा बद्धस्पर्द्धास्तव वपुषि तत्कान्तिविजिता-
स्तृणं गृह्णन्त्यद्याप्यधिगतभयास्तस्य मणयः[१९] ॥ ५२ ॥

वपुषा तव नीलरोचिषा
विजिताः शक्रमपि श्रिता रुषा ।
पुनरीश जितास्त्वया घना
बलवद्वैरिणि कुत्र जैत्रता ॥ ५३ ॥

हरौ धूर्ते[२०] धृत्वा धरणिधरमप्युन्नतकुचे
तवेदं शिक्षायाः फलमिति वदत्यात्तहसिते ।
गुरून्पार्श्वे दृष्ट्वा नमितवदना तं सितशिखैः
कटाक्षैर्भिन्दाना क्षिपतु मम राधा भवभयम् ॥ ५४ ॥

---

१८. कालियरूपः

१९. इन्द्रनीलमणयः

२०. धूर्ते इति राधां प्रति संबोधनम् ।

अधरबिम्बसुधारसमाधुरी-
महितवेणुनिनादविनोदिनम् ।
निगमगन्धिनिजाङ्घ्रिसरोरुहं
कमपि गोपशिशुं कलये हृदि ॥ ५५ ॥

अधरपल्लवफुल्लतरस्मित-
स्तबकजातमरन्दधुरां दधौ ।
जगदि(ति) यन्मुरलीकलकूजितं
जयति कोऽपि स गोपकुमारकः ॥ ५६ ॥

प्रसूनेषु क्रीडा कथमनुदयत्पल्लवकथे
मदारामे कामं चल तरणिजायास्तटवनम् ।
इति भ्रूसंज्ञाभिर्मदनकदनाय त्वरयते
ब्रुवाणा संकेतं स्फुरतु हृदि राधा मधुभिदे ॥ ५७ ॥

वेण्यां भोगाभिलाषी धृतविपुलतमःस्थेमभावः कचौघे-
ष्वक्ष्णोर्लक्ष्यानिमेषस्थितिरधरदले पल्लवोल्लासलोलः ।
उद्भूताहार्यलीलः पृथुनि कुचयुगे स्तम्भवानूरुकाण्डे
राधासंसक्तदृष्टेः कलयतु कुशलं कैटभारेः कटाक्षः ॥ ५८ ॥

रहस्याख्यायीव स्पृशसि कबरीं चुम्बसि मुखं
कुचौ हारान्पश्यन्निव लिखसि गाढं नखमुखैः ।
इति क्रुद्धेवोक्त्वा सपदि करजाग्रेण तुदती
कपोलं कंसारेः प्रतिफलतु राधा मम हृदि ॥ ५९ ॥

उचितं दधतोगिरीशतां[२१]
ननु राधे शशिखण्डमण्डनम् ।
इति तां कुचयोर्लिखन्नखै-
रवताद्बल्लवपल्लवः स वः ॥ ६० ॥

धृतिर्या मन्थाद्रेर्यदपि च सुधाया वितरणं
श्रुतीनां च त्राणं तदिह मम राधे फलति ते ।
कुचाश्लेषो बिम्बाधरमधुरसाप्तिर्गलरव-
प्रपंचश्चेत्येवं हरिरवतु चाटूक्तिनिपुणः ॥ ६१ ॥

जलक्रीडास्वेवं न कथमिति विस्रस्य वद(स)नं
समारब्धे पुंस्त्वे करकलितवक्षोजयुगलः ।
मुहुर्हर्षोत्कर्षात्कथितनिजगोवर्द्धनधृति-
र्हरिः पायाद्राधामदनकदनायत्तहृदयः ॥ ६२ ॥

महति भवती वंशे जाता मनोहरमध्यमा[२२]
(सु)ललितगुणग्रामा[२३] रागोज्ज्वला[२४] परिचुम्ब्यते ।
इति निगदतः कांचित्स्वप्ने पुनातु मुरद्विषः
सपदि मुरलीत्युक्तं राधाभयाकुलचेतसः ॥ ६३ ॥

---

२१. पर्वतेन्द्रभावम्; कुचोन्नतेरेवमुक्तिः । पक्षान्तरे गिरीशतां शिवत्वम् । शिवस्य शशिशेखरत्वात् कुचयोरपि नखपदार्पणेन तत्त्वं संपिपादयिषुः नखैर्लिखति स्मेत्याह । अस्ति चास्मिन्नर्थे श्लोको रसमञ्जर्यामुदाहृतः—'स्वयंभूः शम्भुरम्भोजलोचने त्वत्पयोधरः । नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति ॥'

२२. मध्यमो नाम स्वरविशेषः । वेणावस्य स्वरस्य मनोहरत्वं प्रसिद्धम् ।

२३. ग्रामः स्वरसमूहः । २४. रागः अनुरागः, स्वरसन्दर्भश्च

वन्दे हरिमणिनीलं
  वंशीस्वनलोलवल्लवीजालम् ।
वञ्चितभवभयचरणं
  किंचन राधापयोधराभरणम् ॥ ६४ ॥

वपुरञ्जनरुचिभञ्जन-
  मतिखञ्जन[२५]मुन्नतभ्रु विपुलाक्षम् ।
तव वल्लवविटतल्लज-
  मरुदुल्ललदलकबर्हमस्तु हृदि ॥ ६५ ॥

करधृतलीलायष्टिः
  काञ्चीतटघटितवेणुराधत्ताम् ।
गुञ्जाबर्हविभूषः
  कुतुकं मयि गोपकामिनीकमनः ॥ ६६ ॥

नासादरहसा(हासा ?)क्षिविकासाभिनुताना-
  मासान्द्रदृग्ग(दृगा ?)सारसुधासारहसानाम् ।
आसादितरासादिविलासानुभवानां
  कासामपि भासामिह दासा वयमेते ॥ ६७ ॥

मायाविभुर्निजसमाया गुणेषु[२६] सुषमाया विलासभवनं
  मायाशिशुस्तरुणिमायासितव्रजसमायातगोपवनितः[२७] ।
कायासितच्छविनिकायाञ्चितात्तकनकायामि[२८]दिव्यवसनः
  पायादिमं जनमपायादभङ्गुरकृपाया निधिर्निरवधिः ॥ ६८ ॥

---

२५. खञ्जनः कृष्णवर्णः पक्षिविशेषः ।

२६. गुणैः निरुपमाया इति सुषमाया विशेषणम् ।

२७. तरुणिम्ना आयासिताः व्रजसमायाता वनिता येन सः ।

२८. विशालेत्यर्थः ।

जयति पृथुकक्रीडाव्याजावधूतमहासुरः
श्रियमधिगतः सत्या[२९]रुक्मिण्युदञ्चितविभ्रमाम् ।
प्रणतजनतारक्षादक्षश्चिरंतनभारती-
(विनुत ?)महिमस्थेमा सोमान्मया(न्वया)भरणं हरिः ॥ ६९ ॥

वसुदेवपुण्यपण्यं
व्रजवनिताहृदयहारितारुण्यम् ।
जयति निगमान्तगण्यं
जगति महः किंचिदमितलावण्यम् ॥ ७० ॥

श्रीरङ्गोत्सङ्गसङ्गि श्रितजनदुरितक्षेपदक्षस्ववीक्षं
भद्रां निद्रालुमुद्रां दधदपि जगतां रक्षणे जागरूकम् ।
लक्ष्मीलाक्षाङ्घ्रिसाक्षात्कृतरसमसमं ज्योतिरध्यक्षयन्तः
सन्तस्तद्ध्यानधारापरिचयघटनादुल्लसन्तो जयन्ति ॥ ७१ ॥

इति बुक्कपट्टणकुलाम्बुधीन्दुना
तनयेन तातगुरुवेङ्कटाम्बयोः ।
पदवाक्यमानपदवीपटीयसः
सहजेन वेङ्कटगुरोः कृतक्रतोः ॥ ७२ ॥

कृतिरण्णयार्यविदुषा विनिर्मिता
स्तुतिरीशतुः श्रुतिसुधातरङ्गिणी ।
कृतिनां मुदेऽस्तु निरवद्यमाधुरी-
सुषमाधुरीणपदबन्धबन्धुरा ॥ ७३ ॥

---

२९. सत्येति सत्यभामाया नामैकदेशग्रहणम् ।

॥ ईषणानिवृत्तिशिवबोधिनी ॥*

वदामि सरणिं सुखप्रणयिनीं सतां संमतां
सदा सवितुरान्तरं स्मरहरं समस्तेश्वरम् ।
निरञ्जनमनामयं निटिललोचनं निष्कलं
निरन्तरसुखाप्तयेऽनिशमुपास्व नित्यं शिवम् ॥ १ ॥

वदामि हितमादराच्छृणु सखे सखेदान्सदा-
श्रितान्विदधतेऽखिलान्विघटयन्ति ये चामृतम् ।
त्यजाशु विषयान्न संश्रय विचित्रविद्वेषिणो
निरञ्जनपरामृतेश्वरमुपास्व मृत्युञ्जयम् ॥ २ ॥

निवेशय शिवे मनोऽधिगमितस्वभावे मुहुः
प्रवेशय न वा भवे सुविभवेऽप्यभावाश्रये ।
सदाशिवसतीं मुदा भवनिदाघकादम्बिनीं
सदा भज हृदा मतिं किल ददाति पूर्णं शिवम् ॥ ३ ॥

अशेषविषयाः कदाचिदुपयान्ति चेदात्मनो-
पभोक्तुमसि किं क्षमो जड तथापि किं तृप्यसि ।
प्रभूतहविषा विभावसुरिवेदमालोच्य सं-
त्यजाशु किमु खिद्यसे तव निवेद्यते यद्धितम् ॥ ४ ॥

---

* विंशतिश्लोकात्मिकेयं कृतिः तञ्जापुरस्थसरस्वतीमहल्-पुस्तकालयादुद्धृता (No. 8216)। कर्तुर्नाम न ज्ञायते ॥

दृढाङ्गशुभलक्षणानिह परीक्ष्य हि क्रीणते
विनश्वरदशाजुषः सुपुरुषा न[1] चाश्वान् धनैः ।
वियोजननिसर्गकं[2] विषयजालमालोक्य-
न्नपीह ममतां जिहाससि न तत्र चित्रं न्विदम् ॥ ५ ॥

प्रकाममचला अपि प्रचलिता अमी पश्य तान्
शिरीषमृदुलं चिरं किमु शरीरकं स्थास्यति ।
मुधा कलुषमाचरन्ननु रतोऽसि तत्पोषणे
विहाय तनुवासनां व्रज सुधांशुचूडं शिवम् ॥ ६ ॥

कृता उपकृतीर्बहूस्तव परिग्रहा दुर्ग्रहा
स्मरेयुरथवा तनुं क्वचिदुपक्रियां तन्वते ।
क्षणद्युतिवदुज्ज्वलान् क्षणिकभङ्गिसङ्गान्मुहु-
र्निवेश्य हृदि तान् सुखीभव भवाब्धिसेतुं भज[3] ॥ ७ ॥

भवन्ति विभवे सति प्रकटितस्वरागान्वय-
प्रथातनुपरिग्रहाः कलितविग्रहा बन्धवः ।
निरीक्ष्य बत निस्वतां निधुन(व)ति स्वतां ते हि तान्
विहाय विजितान्तकं स्मर सदा सुबन्धुं शिवम् ॥ ८ ॥

प्रियां हरति संभवन् सुभगयौवनध्वंसना-
दिनाथ च धनादिकं वितरणार्चनासाधनम्[4] ।
प्रसूजनकयोरसूनपि हरेद्वयसुर्हन्त यः
सुतो न सुखदस्ततो जड जहाहि तद्वासनाम् ॥ ९ ॥

---

१. विनश्वरदशाजुषः मरणोन्मुखान् अश्वान् सुपुरुषाः प्रेक्षावन्तो जना न क्रीणत इत्यन्वयः । २. वियोगस्वभावमित्यर्थः । ३. क्षणभङ्गिनः तान् सङ्गान् भवाब्धिसेतुं शिवं मुहुः हृदि निवेश्य भजंस्त्वं सुखीभवेत्यन्वयः । शिवचिन्तनं विना ते सङ्गा अनर्थायैवेत्यर्थः । ४. वितरणं दीनेभ्यो दानम्; अर्चनं भगवत्पूजा; एतत्सत्कर्मद्वयसाधनं धनादिकमित्यर्थः ।

घनव्रजसमार्जने बहुधनेऽप्यपर्याप्तितो
बत व्ययविनाशयोस्तदवनेऽपि दुःखं सदा ।
धनं निधनसाध्वसं किमु हरत्यसंख्यं च त-
ज्जहीहि धनवासनां निधनपत्युपास्तिं[५] कुरु ॥ १० ॥

सुखं सुतनुसंगजं क्षणिकमङ्ग मत्वा ध्रुवं
प्रतीक्ष्य तदवाप्तिसंघटनकालदेशादिकम् ।
न तद्विहतितो विरज्यसि हृदा मुधा खिद्यसे
मुहुः प्रयतसे ततस्त्यज सुखं लभस्वाच्युतम् ॥ ११ ॥

वधूषु सुखमस्ति किं जगति पश्य कंडूप्रति-
क्रियोपमरतासु शुक्लपरिहराभूषु ध्रुवम् ।
अहो परिणतौ मनोविरसतां च बीभत्सतां
विचिन्तयसि चेत्तनोर्विशसि मुक्तिमार्गे शिवे ॥ १२ ॥

मुहुस्त्वमुपभुक्तवान्मधुरकोमलाङ्गीं समु-
त्सुकां सुरसिकां स्पृशन्विदधतीं निजस्पर्शनम् ।
रतेरनुपदंसुखंलगति किन्नु तद्भुक्तव-
त्तवालमिति भाति वा जहि दुरन्तकान्तेषणाम् ॥ १३ ॥

मुदं वहसि सुप्रियाभिसरणप्रवृत्यादिना-
प्यहो तदनुबन्धतस्तदनुषङ्गिताविभ्रमात् ।
मनोरथगतिर्वृथा कलय मन्मथारेस्तया[६]
[७]गतक्षयभवव्यथाः शिवपथाञ्चिताः संकथाः ॥ १४ ॥

---

५. निधनपतिर्मृत्युञ्जयः शिवः । ६. तया मनोरथगत्या । ७. गतः प्राप्तः क्षयः याभिः तादृश्यो भवव्यथाः । नष्टभवव्यथा इत्यर्थः ।

इयं वामासक्ता त्वयि यदि च लब्धा किमु दिशे-
    द्यथेष्टं संभोगं सुचिरमुपभुक्तापि कलयेत् ।
न संतृप्तिं नित्याप्यहह नहि ते कामशमनी
    विमृश्येदं विद्वन्भज भज विरागं सुखकरम् ॥ १५ ॥

विवेकविमुखः स्वमेहनजुहूस्थरेतोहविः
    प्रियासुतनुवेदिकाकलितयोनिकुण्डानले ।
जुहोषि यदि ते भवेन्निरयनाकभोगो[८]ऽघतो(ह्यतो)
    विहाय रतिवासनां विहरणं शिवाग्नौ कुरु ॥ १६ ॥

अलभ्यसुभगाङ्गनावपुषि दृङ्निपीते परं
    दृशा स्वमनसा निमज्जसि च तत्र सर्वात्मना ।
विपाकविरसे हृदा रमसि नित्यलब्धे प्रिये
    कुतो न रमसे तथा समरसे शिवे स्वात्मनि ॥ १७ ॥

कदाचिदुपलभ्यते जगति दुर्लभं वस्तु य-
    च्चिरं मनसि लिप्सितं समुपभुज्य तद्विस्मर ।
निवेशयसि चेत्सदा हृदि हितां दुरन्तेषणां
    समर्पयति साऽसुखं जड जहीहि तां वासनाम् ॥ १८ ॥

रमस्व सुरसे सुखे जलजपर्णजालोच्चल-
    ज्जलाणुतरले जगद्दरसुखे रिरंसा यदि ।
प्रभुक्तचरसौख्यसंस्मरणखेदमुज्झन्सता[९]
    सुखेन सुमनोजनोत्तममनोविनोदं कुरु ॥ १९ ॥

---

८. वस्तुतो निरयानुभवरूपः नाकभोगः स्वर्गसुखानुभवः ।

९. सता साधुना, निर्दोषेण सुखेन ।

कुतश्चिदसुखात्सुखासुखमये समुद्भाविता‍त्
न मानुषभवे भवेः कृतविषादपोष(ः) स्वयम् ।
विलोक्य भुवने मुहुर्विहतसौख्यदुःखाधिकान्
विनिश्चिनुतरां तनु स्वमसुखं सुखं भावय[10] ॥ २० ॥

अलभ्यमनुरज्यसे किमिति वस्तु तच्चिन्तया-
नया त(स)मनुबध्यसेऽतनुमनेहसं मानसे ।
यदत्र लभसे यदप्युपगतोऽसि तच्छीलय-
न्नदभ्रमिति निर्वृतिं कलय दभ्रगोष्ठीपतिम्[11] ॥ २१ ॥

प्रतिप्रहरमङ्गसन्धिकलनं परिस्रंसते
बतायुरतनु प्रतिश्वसितमाशु संक्षीयते ।
अपैति सुकृतोत्करः सुखलवोपभोगेऽप्यघं
म(प्र)तिक्रियमिहैधते तत उपास्व नित्यं शिवम् ॥ २२ ॥

वधूतनुतनूजनुर्विषयबान्धवार्थैषणा-
निवृत्तिशिवबोधिनीं दशकयुग्मपद्यावलीम् ।
गृहाण चरणाम्बुजे स्रजमिवार्पितां बिभ्रता-
मिमां सुमनसां सतामनघ देह्यनन्तं शिवम् ॥ २३ ॥

---

१०. स्वं वित्तं तनु फल्गु विनिश्चिनुतराम् । सुखमसुखं भावय ॥ ११. यद् दैवयोगात् त्वं लभसे, तत् स्वल्पमपि अदभ्रं भूरि इति निर्वृतिं शीलय, तृप्तो भव । दभ्र-गोष्ठी दभ्रसभा, चिदम्बरं तत्रार्तिं, नटराज-रूपं शिवं कलय ॥

॥ ऋतुवर्णनम् ॥*

दुर्लभकृतम्

[शारद्वर्णनम्]

श्रीखण्डपङ्काङ्कितपङ्कजोत्करैः
करैश्च कर्पूरपरागपाण्डुरैः ।
स्पृशन्ति कान्तं स्तबकैश्च यावकैः
घनात्यये स्वं प्रमदा मदालसाः ॥ १ ॥

विधुन्तुदभ्रान्तिभरेण[1] भासुरैः
करैः कुठारैरिव बाधितुं तमः ।
विनोदयन्कामिमनो मनोभवै-
र्विहायसा संचरतीह चन्द्रमाः ॥ २ ॥

बन्धूकसौगन्धिकपङ्कजोत्पलैः
प्रकाशिसत्कोकनदैः सकैरवैः ।
हंसैर्भ्रमद्भृङ्गभरैर्मनो नृणां
ह्रदा हरन्ति प्रसभं विचित्रिताः ॥ ३ ॥

विशोषयन्पङ्कमतिप्रकाशितैः
करै रविस्तीक्ष्णतरैर्नदीजलम् ।
प्रसादयंश्चापि करोति मानसं
महीभृतां दिग्विजयाय सोत्सुकम् ॥ ४ ॥

---

*बीकानेरस्थ-अनूपसंस्कृतग्रन्थागारीयमातृकातः उद्धृतमिदं खण्डकाव्यम् । प्रतिलिपिः श्री माधवकृष्णशर्मणा प्रेषिता । मातृका बहुत्र अशुद्धा । वृत्तेषु इन्द्रवज्रावंशस्थमिश्रणं प्रचुरतया दृश्यते ॥

१. तमसि अन्धकारे विधुन्तुदभ्रान्तिः चन्द्रमसः । तमःपदस्यैव राहुरित्यप्यर्थः ।

विकाशिकाशोज्ज्वलवस्त्रभूषिता
तथैव सप्तच्छदगुच्छगुम्फिता ।
सुगन्धिसत्पङ्कजलोचनानना
वनावनीयं रमणीव राजते ॥ ५ ॥

मायूरमारात्यनुयं[२] वितन्वतः
स्वरं शरल्लब्धबलैः स्वनिस्वनैः ।
विलोक्य हंसांस्तरतो जलाशया-
न्समुत्सुकं कस्य मनो न जायते ॥ ६ ॥

विचित्रवीणोत्थितमूर्च्छनाचणाः
शरत्सुधांश्वम्बुकणास्तथाङ्गनाः ।
सुचामरान्दोलनलोलकुण्डलाः
कपोलपालिस्फुरदिन्दुमण्डलाः ॥ ७ ॥

सितोत्पलाढ्यानि पयांसि चन्दनं
सकुङ्कुमं पङ्कजमञ्जु मन्दिरम् ।
सुसूक्ष्मवासांसि निशाः सचन्द्रिकाः
सखे सुखायेह भवन्ति कामिनाम् ॥ ८ ॥

अन्तः सुशीतं बहि(रुष्ण[३])मुत्तमं
सुहंसरावं कमनीयपङ्कजम् ।
विराजते मानसमम्बुदात्यये
प्रसन्नमन्तर्मुनिमानसं यथा ॥ ८ ॥

---

२. मायूरं स्वरमित्यन्वयः । अरातिरेव आरातिः ; अनुयम् अनुगम् ; आरात्यानुयं हंसशत्रुभूतमेघाननुसृत्य शरदागमे नाशं यन्तमित्यर्थः । राजविजययात्राकालत्वाच्छरदः शत्रुनाशादिव्यवहारः मेघ-मयूर-हंसवर्णने औचित्यमावहति ॥ ३. एतदक्षरद्वयमत्र मातृकायां लुप्तम् ।

प्रफुल्लजातीकुसुमैः शिरोरुहा-
  नुदारमुक्ताभरणैः स्तनान्तरम् ।
नितम्बबिम्बं मणिमेखलागुणै-
  र्विभूषयन्ति प्रमदाः सुखप्रदाः ॥ १० ॥

[४]मुग्धस्मिताः स्फीतसुधांशुसन्निभं
  शुभं वसाना वसनं सुचन्दनम् ।
सचन्द्रिकायामभिसारिकाः स्त्रियः
  प्रियानुरागान्निशि यान्ति सत्वरम् ॥ ११ ॥

मन्दं समान्दोलितपङ्कजाशयाः
  स्थलारविन्दावि-[५]गन्धवाहिनः ।
स्वेदच्छिदो वान्ति मुदे विलासिनां
  रते हृतान्तःकरणाः समीरणाः ॥ १२ ॥

सचन्द्रलेखं कमनीयतारकं
  सुमीनरूपं नितरां मनोहरम् ।
नभो ह्रदाम्भो नृपतेर्वितानकं
  विराजतेऽद्य त्रितयं समानकम् ॥ १३ ॥

समुद्रतीरस्थितरत्नसंगता-
  स्तथैव मन्थाचलशृङ्गसंस्थिताः ।
स्वात्यां घनैरुज्झिततोयविप्रुषः
  पिबन्ति मुक्तोद्गिरणाय शुक्तयः ॥ १४ ॥

---

४. मातृकायां 'मुग्धास्मितं' इति ।
५. अत्र मातृकायामेकं लघ्वक्षरं लुप्तम् ।

कादम्बकारण्डवचक्रसारसै
रसद्भिरुच्चैरुपचक्रहंसकैः ।
सुशोभितान्तःपुलिना नृणां मनो
हरन्ति नद्यस्तरलैस्तरङ्गकैः ॥ १५ ॥

जपाधरा खञ्जनमञ्जुलोचना
प्रफुल्लजातीकुसुमोत्कराशया ।
विराजते पुष्पविहासभासुरा
वधूरिवाद्यत्विकपुष्पवाटिका ॥ १६ ॥

सुबद्धसोपानविशुद्धवापिका
तटस्थमेघोन्मुखचातकाङ्किता ।
स्थलारविन्दोद्गतगन्धसंगता
विलोक्यते पुण्यवताद्य वाटिका ॥ १७ ॥

मुक्तायुतौ रक्तमणिप्रकाशितौ
सपद्मरागग्रथितेन्द्रनीलकौ ।
निवेशयन्त्युत्पलकोरकप्रभौ
सुकर्णयोः काञ्चनकुण्डलौ स्त्रियः ॥ १८ ॥

ताम्बूलकर्पूरसुपूरितानना
नवीननीलोत्पलपत्रलोचनाः ।
अभ्यङ्गतस्तीक्ष्णकटाक्षमोचनाः
प्रियं व्रजन्ति प्रमदाः सुयौवनाः ॥ १९ ॥

इयमतिशयरम्या चारुनक्षत्रमाला
विकचकुसुमहासा पक्वबिम्बाधरोष्ठी ।
दिशतु रुचिरवाचा दुर्लभोक्त्यानुरक्ता[६]
शरदतिमुदमुच्चैः कामिनां कामिनीव ॥ २० ॥

॥ इति श्रीदुर्लभकृते [७]ऋतुवर्णने शरद्वर्णनं नाम प्रथमः सर्गः ॥

[हेमन्तवर्णनम्]

प्रफुल्लपुन्नागपरागरागिणां
कस्तूरिकाकुङ्कुमपङ्कशालिनाम् ।
तथैव कालागरुसत्त्वसेविनां
विलासिनामागत एष हैमनः ॥ १ ॥

उद्भिन्ननीलोत्पलभूषितानि
विकासिलोध्रैरुपशोभितानि ।
फुल्लप्रियङ्गूनि सुभूधराणि
वनानि हैमानि मनोहराणि ॥ २ ॥

हंसा नदद्वालमरालमालिनो
निमज्य चोन्मज्य मृणालभोजिनः ।
सरांसि सत्क्रौञ्चनिनादितानि
मनांसि यूनां सुखयन्ति कामिनाम् ॥ ३ ॥[८]

---

६. स्त्रियां मितभाषणत्वात् कामिभिः प्रार्थितदुर्लभत्वाच्च तदुक्तेर्दुर्लभेति विशेषणम्। किञ्चात्र रुचिरवाचा दुर्लभेत्यादौ कवेः स्वनामस्वकाव्यसमाधिरपि ।

७. अत्र मातृकायां 'महाकाव्ये' इत्यसङ्गतं दृश्यते ।

८. अत्र 'युग्मम्' इति मातृकायाम्; एतच्छ्लोकात्पूर्वं श्लोक एको लुप्तः।

विधूप्य कालागरुभिः शिरोरुहां-
स्तथैव सत्कुङ्कुमपङ्कचर्चिताः ।
ताम्बूलरागारुण[९]वक्त्रपङ्कजा
व्रजन्ति काश्चिद्रमणं सुलोचनाः ॥ ४ ॥

सुगन्धिपुष्पोद्ग्रथितैकवेणिका
विचित्रलेखालकशोभितानना ।
पट्टाम्बराच्छादितमन्दिरेऽपरा
विलोकते कान्तपथं सखीजनैः ॥ ५ ॥

[१०]उक्त(ष्ण)स्वभावैर्लघुभिः समावृता
वराम्बरैः कापि कलाप[११]कोमलैः ।
[१२]सन्नाह्यमाना नितरां सखीजनैः
प्रयाति कान्तं कमनीयभूषणा ॥ ६ ॥

[१३]सुराविहारारुणलोचनाङ्गना
सखीजनालम्बितपाणिपल्लवा ।
मनोभिरामैर्निजगीतनिस्वनैः
मुदं तनोति प्रियमानसेऽपरा ॥ ७ ॥

हंसस्वनस्पर्द्धिसुनूपुरस्वनै-
र्वितन्वती कान्तमुदं मदोन्मदा ।
मणिप्रभोद्भासितवक्त्रपङ्कजा
विलोकते सस्मितमङ्गनाऽपरा ॥ ८ ॥

---

९. मातृकायामत्र 'वस्त्रवल्कलं' इत्यधिकं लिखितम् ।

१०. ऋतोः शीतत्वादुष्णस्वभावैरिति अम्बरविशेषणं युज्यते । ११. कलापः काञ्ची वा भूषणसामान्यं वा । १२. सज्जीक्रियमाणेत्यर्थः । मातृकायां सन्नाय° अथवा सन्ताय° इति । १३. प्रायः मातृकायां 'सु' इत्यक्षरं 'धु' इत्येव लिखितम् ।

निचोलमानीलमनेकमौक्तिक-
स्फुरत्प्रभादीपशिखाविभासितम् ।
निधाय देहे वरकाञ्चनप्रभे
प्रयाति काचिन्निजमूलमन्दिरम् (रात् ?)[१४] ॥ ९ ॥

गृहे हिमानीशिखरोत्थमारुतै-
र्विवर्जिते धूमरजोभिरुद्धतैः ।
रतावसानेऽपि कटाक्षमोक्षणैः
प्रियं प्रिया कापि करोति सोत्सुकम् ॥ १० ॥

भृङ्गाङ्गनोद्गीतकपोल(भित्त ?[१५])यः
क्षरन्मदोत्सिक्तधरा[१६] लस(ल ?)त्कराः ।
विभूषयन्तीह महीभृतं गजा
रजोभिरावर्जितमार्जनक्रमाः[१७] ॥ ११ ॥

उत्खातवप्रोद्गतधूलिधूसराः
समीरितोच्छ्वासविकीर्णपल्लवाः ।
उत्क्षिप्तपुच्छाः कृतभीमनिस्वना
भ्रमन्ति मत्ता महिषा विषाणिनः[१८] ॥ १२ ॥

---

१४. अत्र, तथाधस्तात् १७-श्लोके च 'निजमूलमन्दिरम्' इति उभयत्र द्वितीयान्तः पाठो दृश्यते । अत्र ९-श्लोके नायिका नायकसमागमार्थं सज्जीकृतालङ्कारा याति ; १८-श्लोके संयोगानन्तरं प्रियान्तिकात् प्रत्यायाति । अतः अत्र ९-श्लोके 'मूलमन्दिराद्' इति पञ्चम्यन्तः पाठो भवितुमर्हति । दृश्यताम् ऋ. सं. २.२१ ॥ १५. एतदक्षरद्वयं मातृकायां लुप्तम् । १६. धरा भूमिः ।

१७. आवर्जितः दत्तः मार्जनक्रमः शोधनकर्मयैः । गजैः महीभृतः समर्हणं क्रियते, मार्जन-जलसेक-अलङ्काररजो-दानरूपैः गीतसहितैः कर्मभिः । १८. मातृकायां 'विपाणिवः' इति ।

प्रियाभिसारोद्यतकामिनीपथ-
प्रपातसंजातकलङ्कलाञ्छितः ।
वृथापराधाम्बुजदाहदूषितो
हिमे हिमांशुर्न सुखाय जायते ॥ १३ ॥

सूर्योपलोत्क्षिप्तदिवाकरांशवः
पुराणमाध्वीकसुशर्करासवः ।
[19]प्रवेणिकाच्छादनमङ्गणेऽङ्गनां
[20]काश्मीरजातां सुखयन्ति हैमने ॥ १४ ॥

निशासु सद्यः श्रुतकोकनिस्वनां
हठात्समालिङ्गनतत्परां प्रिये ।
कस्तूरिकालेखविशेषमण्डितां
हिमे हसन्ती[21] हसतीव खण्डिताम् ॥ १५ ॥

निशा विशाला सुरतक्षमा रमा
समागमो रत्नमणिप्रकाशितः[22] ।
गृहं सुकालागुरुधूमधूपितं
हिमागमे यान्ति जनस्य सेव्यताम् ॥ १६ ॥

अकालमेघोदयदूषिते दिने
सशीकरे छन्नकरे दिवाकरे ।
[23]अङ्गाररत्नद्युतिभिर्धरागृहे
हिमं हसन्तीव हिमागमेऽङ्गनाः ॥ १७ ॥

---

१९. प्रवेणी भूम्यास्तरणम् । मातृकायां 'प्रपेणैक' इति । २०. अनेन श्लोकेन तथा अङ्गारधान्या निर्देशेन च कविः काश्मीरक इति स्पष्टं ज्ञायते । २१. अङ्गारधानी।

२२. 'प्रकाशिती' इति मातृकायाम् । रत्नानामाभरणमणीनां प्रकाशसाह्येन नायिकानायकयोः समागमः । दृश्यतां समनन्तरः श्लोकः ।

२३. अङ्गारधान्याः आभरणरत्नानां च प्रकाशेन ।

धम्मिल्लबन्धोद्यतपाणिपङ्कजा
सुलोलशोणायतलोचनाञ्चिता ।
प्रियान्तिकात् सिंहविलोकनक्रमैः
प्रयाति काचिन्निजमूलमन्दिरम् ॥ १८ ॥

इति विविधविलासः सर्वसस्यैरुपेतः
प्रमुदितगजवृन्दः फुल्लनीलारविन्दः ।
बहुमृगरमणीयग्रामसीमान्तरोऽयं
प्रभवतु हिमहासो हैमनो नः सुखाय ॥ १९ ॥

॥ इति श्रीदुर्लभकृते ऋतुवर्णने हेमन्तवर्णनं नाम द्वितीयः सर्गः ॥

[शिशिरवर्णनम्]

रोमाञ्चकम्पस्वरभेदसीत्कृती-
स्तथैव वैवर्ण्यजडत्वसाश्रुताः [२४] ।
कुर्वन्वधूनामधरं च सक्षतं
विलासिवेषः शिशिरः समागतः ॥ १ ॥

महीगृहान्तश्चरतां महीभृतां
मणिप्रकाशोज्ज्वलकामिनीजनैः ।
अङ्गारतापोष्मयुतैः सुसंगतैः
प्रतीपरूपः शिशिरो न जायते ॥ २ ॥

सुगन्धितैलान्वितपाणिपल्लवैः
सुवर्णकर्णाभरणाः सुयौवनाः ।
संवाहयन्तीह पतिं वराङ्गना
मणिप्रभाभासितचारुकङ्कणाः ॥ ३ ॥

---

२४. अश्रुसहितत्वम् ।

काचिद्भ्रमद्भृङ्गभयेन भामिनी
　　तिलोद्भवैर्गन्धफलीसुवासितैः ।
अभीक्ष्णशोऽभ्यज्य करान्तदर्पणा
　　सखीजनैस्साधयते शिरोरुहान् ॥ ४ ॥

काचिच्च यूथा(थी ?)[२५] कुसुमाधिवासितैः
　　करोति केशान्नितरां मनोहरान् ।
तैलैस्तथान्या सुमनासमानकैः[२६]-
　　र्मनोरमाऽन्या मदयन्तिकोद्भवैः ॥ ५ ॥

विचित्रकौशेयकृतैः कुशेशयैः
　　[२७]अशीतलैः शीतभयादिवाङ्गनाः ।
विमुच्य मुक्तामणिहेमकिङ्किणीं
　　नितम्बबिम्बाभरणानि कुर्वते ॥ ६ ॥

निशासु दीर्घासु रतप्रपीडिता
　　विमुक्तधम्मिल्लकलापशोभिता ।
कषायितोन्निद्रचकोरलोचना
　　प्रयाति काचिद्भवनं क्षपाक्षये ॥ ७ ॥

कौशेयकूर्पासलसत्पयोधरा
　　हिरण्यवर्णाम्बरसंवृतापरा ।
ताम्बूलदानाधरचुम्बनादिभि-
　　र्विभावयत्यत्र पतिं रहःस्थिता ॥ ८ ॥

---

२५. यूथी - सुमना - मदयन्तिकाः पुष्पविशेषाः तैले गन्धार्थं क्षिप्ताः ।

२६. सुमनासमानकैरित्यत्र गन्धे तत्प्रसूनसदृशैरित्यर्थो ग्राह्यः ।

२७. 'सुशीतलैः' इति मातृकायाम् । साक्षात् हेमाभरणस्य शीतलत्वात्, तत्स्थाने पट्टवस्त्रविरचितैः पद्माकारैः कृत्रिमैः भूषणप्रतिरूपकैर्नितम्बालङ्करणं कुर्वन्तीत्यर्थः ।

प्रसूनसत्त्वैर्मधुसिक्थसंयुतै-

विशुद्धकर्पूरपरागवासितैः ।

प्रवातभीत्या(ध)रवर्म[२८] शर्मदं

करोति काचिद्वनितार्थमोदये ॥ ९ ॥

बालाः लसद्बालमरालगामिनीः

दृढं समालिङ्ग्य कुरङ्गलोचनीः ।

ताम्बूलपूगीफलपूरिताननाः

[२९]निहत्य शीतं सुखिनोऽत्र शेरते ॥ १० ॥

कामाश्रितपोन्नतपीवरस्तनै-

स्तुषारभीत्येव रतोत्सवे पतिम् ।

निरस्य मुक्तामणिहारमङ्गनाः

परिष्वजन्ते नितरां निरन्तरम् ॥ ११ ॥

[३०]न दन्तरत्नातिविमार्जनक्षमाः

न वापि सत्कुङ्कुमपङ्कचर्चिताः ।

न चन्द्रहासासु निशासु सस्पृहाः

भवन्ति नार्यः शिशिरे सशीकरे ॥ १२ ॥

---

२८. अधरवर्म मधुसिक्थेन शीतबाधावारणार्थं कृतः अधरोपरि लेपः ।

२९. ऋतुसंहारे ५.९ 'स्वपन्ति शीतं परिभूय कामिनः' इत्येतत् द्रष्टव्यम् ।

३०. 'तदन्त' इति मातृकायाम् ।

अत्र ऋतुसंहारे ५. ३. श्लोकेन साम्यं दृश्यते ।

तारुण्यपीनोष्ण[३१]तरौ सुनिर्मलौ
नखक्षतार्द्धेन्दुविलेखभूषितौ ।
प्रियस्य काचिद्रजनीषु नायिका
गलोपधानाय कुचौ प्रयच्छति ॥ १३ ॥

अट्टालिकाकुट्टिमपट्टिकाङ्गणे
सुखोपविष्टा सुखदे दिवाकरे ।
सुदर्पणान्तः प्रतिबिम्बितापरा
वरा(ञ्ज)नै[३२] रञ्जयतीह लोचने ॥ १४ ॥

तुषारदग्धाम्बुजिनी[३३]समुत्थितं
निशाक्षये धूममिवाम्बरोन्मुखम् ।
विलोक्य रोषारुणमित्रमण्डलं
वमन्ति बाष्पं शिशिरे महाह्रदाः ॥ १५ ॥

मुक्तामणिद्योतितचूर्णकुन्तला
ललाटपट्टार्पितनागसम्भवा[३४] ।
सत्कुङ्कुमारक्तकपोलमण्डला
हेलाबलाद्भावयतेऽपरा प्रियम् ॥ १६ ॥

---

३१. 'ष्ण' इत्यत्र मातृकायामक्षरमशुद्धमव्यक्तं च ।

३२. मातृकायामक्षरलोपो दृश्यते ।

३३. मातृकायां स्वजिनीति दृश्यते ।

३४. 'सिन्दूरं नागसम्भवम्' इत्यमरः ।

गाढं समालिंग(न)तत्परापरा
वराङ्ग(ना) कान्तनिपीडिताधरा ।
[35]प्रकामकामालिजनं निरीक्षणै-
र्गृहात्समुत्सारयतीह सस्मितैः ॥ १७ ॥

सुशिक्षिता कापि सखीजनैर्भृशं
प्रियेऽपराधिन्यपि कोमलाशया ।
तदग्रतोऽल्पानुनयेन मानिनी
करोति हासं सहसेह भासुरम् ॥ १८ ॥

विचित्रचित्रावलिमण्डिताम्बरैः
शरीरमाच्छाद्य सुगुप्तभूषणा ।
विलासिवेषा करसक्तकन्दुका
तनोति काचिन्निजकान्तवञ्चनाम् ॥ १९ ॥

अतिललितविहारः कान्तनीहारहारः
शिशिरतरसमीरो भव्यताडागनीरः ।
युवजनरमणीयो योषितां वाञ्छनीयो
वितरतु सुखमुच्चैः शैशिरः काल एषः ॥ २० ॥

॥ इति श्रीदुर्लभकृते ऋतुवर्णने शिशिरवर्णनं नाम तृतीयः सर्गः ॥

---

३५. प्राकाम इति मातृकायाम् ।

[वसन्तवर्णनम्]

चन्द्रातपत्रोऽम्बुजपुञ्जचामरः
  पिकस्वराविष्कृतपञ्चनिस्वनः[३६] ।
मत्तालिवैतालिकगीतगर्वितः
  समागतो भूपतिवद्वसन्तकः ॥ १ ॥

प्रफुल्लकुन्दैरिह पुष्पवाटिका
  करोति वृष्टिं कमलैश्च वापिका ।
वनी विमुक्तैरतिमुक्तगुच्छकै-
  र्वसन्तकान्तागमनाय सोत्सुकाः[३७] ॥ २ ॥

मनोभिरामैरिह दक्षिणानिलैः
  कुशेशयामोदपरागपूरितैः ।
स वीज्यमानः शनकैः सुखाकरो
  [३८]मधुर्द्विरेफानुगतो विराजते ॥ ३ ॥

भृङ्गाङ्गनोद्गीतरसालमञ्जरीं
  विलोक्य लोकैरिह जातमन्मथैः ।
न शक्यते स्थातुमिह प्रवासिभि-
  र्भृशं वसन्तागमने मनोरमे ॥ ४ ॥

---

३६. भूपतीनां समागमे प्रयाणे च पञ्च महाशब्दाः पञ्चवाद्यैः क्रियन्ते । अत्र तु पञ्चमस्वरवादिना पिकेन तादृशपञ्चनिस्वनानां कर्म निर्वर्तितमिति भावः ।

३७. वसन्तकान्तस्य आगमनाय उत्सुका एता नायिकाभूता वाटिका-वापिका-वन्यः स्वस्वपुष्पैः तदागमनमार्गे पुष्पवृष्टिं कुर्वन्तीत्यर्थः । ३८. वसन्तः ।

न मानसंधारणमत्र शर्मदं
    न चापि कान्ताविरहः सुखावहः ।
मनोजवाक्यैरिव पंक्ति(वक्ति) कोकिला
    विलोड(ल)यन्ती सहकारमञ्जरीम्[३९] ॥ ५ ॥

वनी वसन्ते सहकारशालिनी
    सरः प्रफुल्लाम्बुजपुञ्जरञ्जितम् ।
निशा स्फुरच्चन्द्रमरीचिमालिनी
    न याति कस्याद्य जनस्य सेव्यताम् ॥ ६ ॥

प्रौढाङ्गनालिङ्गनवाजिवाहनै-
    र्निरन्तराखेटक[४०]जातलाघवाः ।
नियुद्धमध्वासवशूल्य[४१]सेविनो
    वसन्तकालं क्षपयन्ति[४२]कामिनः ॥ ७ ॥

मधौ मनोज्ञोपवनप्रभञ्जनै-
    र्विचित्रवापीशतपत्रसंगतैः ।
निषेव्यमानो मणिकुट्टिमे गृहे
    रतान्तखेदं विनिहन्ति पुण्यवान् ॥ ८ ॥

---

३९. सहकारमञ्जरीं दण्डमिव चालयन्ती, तथा तर्जयन्ती, परभृता मन्मथाज्ञावाक्यादिव एवं स्वीयैः रवैः वदति इत्यर्थः। यथाह कविकुलगुरुः रघुवंशे (९.४७) 'त्यजत मानमलं बत विग्रहैः x x परभृताभिरितीव निवेदिते' इत्यादि ॥

४०. मृगया। ४१. तथोक्तः शलाकपक्को मांसविशेषः। ४२. 'क्षपमन्ति' इति मातृकायाम्।

माकन्दकुन्दार्तगला[४३]ब्जचम्पकैः
[४४]सुवर्णजातीनवकर्णिकारैः ।
[४४a]नेमालिकाकुब्जकरक्तकुब्जकै-
[४४]र्हिरण्ययूथीवकुलातिमुक्तैः ॥ ९ ॥

सन्मल्लिकामाधविकाकुरंटकै-
रशोकचामीकर[४४]केतकीगणैः ।
प्रफुल्लितैर्भृङ्गपिकप्रणादितैः
सपारिभद्रैः - - - - किंशुकैः ॥ १० ॥

विचित्रवर्णैर्नितरां मनो नृणां
समाकुलं कर्तुमतिप्रवासिनाम् ।
वनानि तोयोपवनानि सर्वतः
स्वयं सखे चित्रयतीव माधवः ॥ ११ ॥

श्रीखण्डशैलानिलगन्धमोदिताः
सुवर्णजातीकुसुमानुरञ्जिताः ।
शक्ता न भोक्तुं मधुपाः सुपद्मिनीं[४५]
वसन्तकाले बहुनायका इव ॥ १२ ॥

प्रौढाङ्गनामेव विशाललोचनां
युवा जनः कामयतेऽत्र केवली ।
न हि प्रफुल्लाम्बुजिनीसमीपगं
लवङ्गमङ्गीकुरुते हि षट्पदः ॥ १३ ॥

---

४३. 'अन्तगल' इति मातृकायाम् । अर्तगलो नीलझिंटी । 'नीला झिंटी द्वयोर्बाणा, दासी चार्तगलश्च सा' इत्यमरः ।

४४. सुवर्णः कृतमालः । सुवर्ण-हिरण्य-चामीकर-शब्दैः चम्पक-कृतमालादयो नैके द्रुमा उच्यन्ते । ४४a. नवमालिकैव नेमालिका । ४५. पद्मिनीं सरोजिनीं पद्मिनीजातीयां नायिकां च ।

कस्तूरिकाकुङ्कुमपङ्कचित्रितं
सुरक्तकौशेयनिचोलकाञ्चितम् ।
पीतोत्तरीयं कुसुमाधिवासितं
प्रकुर्वतेऽङ्गं कुसुमाकरे स्त्रियः ॥ १४ ॥

सुवर्णयूथीकुसुमोत्करैः शिरो
विशुद्धमुक्ताभरणैरुरःस्थलीम् ।
कटिं च काञ्च्या चरणौ सुनूपुरै-
र्विभूषयन्तीह रतोत्सवोत्सुकाः ॥ १५ ॥

शिरः शरीरावयवान् सुमन्दिरं
तथैव सज्जासनगोपुराङ्गणम् ।
प्रसूनसर्वै(र्गैं)[46]र्घनसारपूरितै-
रलं प्रकुर्वन्ति निशासु योषितः ॥ १६ ॥

पिकस्वराकर्णनजातमन्मथा
वृथाकथाकौतुकदत्तमानसा ।
क्षणं स्थिता स्थातुमशक्यरूपिणी
जहाति मानं सहसेह मानिपी ॥ १७ ॥

सत्पाटलावासिततोयसंयुतै-
[47]श्चतुःसमैः कापि च यक्षकर्दमैः ।
नखक्षतैरुच्छुरितौ पयोधरौ
विलेपयत्यब्जदलायतेक्षणा ॥ १८ ॥

---

४६. सर्गैः तत्र तत्र यथोचितं पुष्पाणां प्रदानैः, निवेशनैरित्यर्थः ।

४७. यक्षकर्दमो नाम गन्धलेपविशेषः कर्पूरागरुकस्तूरीकक्कोलैः चतुर्भिस्समैस्सम-
भागैः कल्पितः ।

सप्तस्वरग्रामविशेषमूर्छना-
युतैः सुगीतैः कलकण्ठनिस्वनैः ।
शशाङ्कशुभ्रासु निशासु योषितो
हरन्ति चित्तं रमणस्य माधवे ॥ १९ ॥

[४८]तरुणकुसुमहासः सर्वपुष्पप्रकाशः
कृतमधुपविलासः कोकिलानां निवासः ।
रचितशिशिरनाशः प्रोषितानां हुताशो
जयतु [४९]मधुनिधानो(नं) माधवो नः सुखाय ॥ २० ॥

॥ इति श्रीदुर्लभकृते ऋतुवर्णने वसन्तवर्णनं नाम चतुर्थः सर्गः ॥

[ग्रीष्मवर्णनम्]

[५०]प्रचण्डमार्तण्डकरोऽतिदुष्करः
प्रसह्यदावानलदग्धभूधरः ।
ग्रीष्मोऽतिभीष्मो नितरां प्रवासिनां
समागतोऽसौ सुखदो विलासिनाम् ॥ १ ॥

[५१]अथेन्दुकान्तोपलकुट्टिमाङ्गणं
नवाङ्गनाश्चन्दनपङ्कचर्चिताः ।
पुष्पस्रजश्चन्द्रकरा जलाशयाः
सुखाय पुंसां प्रभवन्ति कामिनाम् ॥ २ ॥

---

४८. 'करुण' इति मातृकायाम् ।

४९. मधुनिधानम् , मधूनां स्वादुविषयाणां निधिभूतः इति माधवविशेषणम् ।

५०. ऋतुसंहारे 'प्रचण्डसूर्य' इत्येव उपक्रमो दृश्यताम् ।

५१. 'अथ' इति मातृकायाम् ।

कर्पूरतोयप्लुततालवृन्तजैः
 समीरणैर्मन्दतरं समीरितैः ।
बालाकराभ्यां सुमनोत्कराभ्यां[५२]
 निषेवितो धन्यतरोऽद्य वर्तते ॥ ३ ॥

[५३]सुधांशुपांसूत्करपूर्णपङ्कजे
 मृदूपधाने शयने मनोरमे ।
चन्द्रप्रदीपासु निशासु साङ्गना
 निदाघदाहं शमयन्ति कामिनः ॥ ४ ॥

सोपानबद्धेषु सरस्सु शीकरैः
 करोद्धतैः कङ्कणनिस्वनाञ्चितैः ।
सपाटलापङ्कजपुञ्जसंयुतैः
 प्रियं दिनान्ते स्नपयन्ति योषितः ॥ ५ ॥

[५४]पुस्तस्त्रिया वक्त्र[५५]करस्तनोद्धतै-
 श्चतुःसमाढ्यैः सदुशीरशीकरैः ।
निषिक्तगात्रा जलयन्त्रमन्दिरे
 [५६]वृषार्कतापं गमयन्ति भूभृतः ॥ ६ ॥

---

५२. जातीपुष्पसमूहबद्धयाम् पुष्पनिर्मितकङ्कणादिबद्धयाम् ।

५३. 'शू' इति मातृकायाम् । सुधांशुशब्देन कर्पूरोऽभिप्रेतः ।

५४. 'पुख' इति मातृकायाम् । ५५. 'वन्त्री' इति मातृकायाम् ।

५६. कठोर-सूर्य-तापमित्यर्थः स्यात् । अथवा 'वृथा' इति पाठः स्यात्; तदानीं 'अन्यद् राजकार्यमकुर्वाणाः' इत्यर्थः ।

केचिद् हरित्काच(कांस्य ?)[५७]निभैश्च कीचकै-
विनिर्मिते सेऽव्यगृहेऽब्जसङ्ग्रहे ।
प्रलम्बमानस्तबकाम्रदाडिमी-
फले निदाघं परिभूय शेरते ॥ ७ ॥

अभ्रंकषाः सालरसालशाखिनो
लतावितानस्तबकालिमण्डिताः ।
गाम्भीर्यतो दूरतरं रवेः करा-
न्निरुध्य तापं क्षपयन्ति भूभृताम् ॥ ८ ॥

परस्परोद्घृष्टविशुष्ककीचक-
प्रभूतदावैः परिपीडितं वनम् ।
आक्रन्दतीवाद्य विदग्धभूधरं
दरीमुखोत्थैर्गजयूथनिस्वनैः ॥ ९ ॥

उपत्यकासन्नवनं महीभृतो
भृशं निषिञ्चन्ति हिमाम्बुनिर्झरैः[५८] ।
संदह्यमाना अपि हि प्रियंकरा
भवन्त्यवा-[५९]श्रयिणां महाशयाः ॥ १० ॥

दग्धद्रुमानीह वनानि सर्वतो
विलोक्य चण्डांशुकराभितापिताः ।
सुनिर्भरं शीतसमीरशीकरं
विशन्ति मत्ता गिरिगह्वरं गजाः ॥ ११ ॥

---

५७. हरित-पीत वर्णैः; अपक्वैः पक्वैश्च कीचकैरित्यर्थः ।

५८. निदाघे हिमाद्रेर्हिमद्रवीभावात्प्रसृतैः प्रवाहैरित्यर्थः । इदमपि काश्मीर-प्रदेशीयः कविरिति गमयति । ५९. अत्रैकमक्षरं मातृकायां लुप्तम् ।

प्लुष्णो(ष्टो)दरास्याः पथि तप्तपांसुभि-
विषप्रकोपोष्णकरोष्णशीर्षकाः ।
लब्ध्वाशु रन्ध्रं [६०]निजलोककाङ्क्षया
विशन्ति नागा नितरां [६१]नगान्तरम् ॥ १२ ॥

मृगाः सरोम्बुप्रतिमं महीतलं
विलोक्य धावन्ति जलाशयाशया ।
मरीचिकार्ता नितरामितस्ततो
निदाघकाले चलचारुलोचनाः ॥ १३ ॥

उत्प्लुत्य वर्हाग्रविकाशिताम्बरा[६२]
विहाय दावज्वलितं महीतलम् ।
[६३]खगोरगान्वेषणतत्परा इव
भ्रमन्ति रात्रौ परितः शिखण्डिनः ॥ १४ ॥

कृशानुना दग्धमिति भ्रमैर्भृशं
प्रचण्डवात्याभ्रमिवक्रविक्रमः ।
प्रभञ्जनो [६४]वात्यनु भानुमम्बरं
निसर्गतो ह्यग्निसहाय एव सः ॥ १५ ॥

---

६०. निजलोकः, नागलोकः, पातालः ।

६१. नगोदरमित्यर्थः, न तु अन्यं नगम् ।

६२. प्रकाशितव्योमावकाशाः ।

६३. खगोरगाः उड्डयमानोरगा इत्यर्थः ।

६४. जात्य॰ इति मातृकायाम् ।

म 6

वातातपक्लिष्टकलेबरा भृशं
करोद्धृतास्याम्बुनिषेवितोदराः ।
जलाशयालोकनतत्परा गिरौ
भ्रमन्ति सिंहस्य समीपतो गजाः ॥ १६ ॥

रजोभिराच्छादितसूर्यमण्डलो
विलुम्पतीवाद्य सहस्रलोचनम् ।
झञ्झामरुद्वैरविनोदनेच्छया
विलोडयन् शाखिगणं समन्ततः ॥ १७ ॥

सुनिर्मलस्फाटिकपात्रपूरितं
सुपाटलापङ्कजपुञ्जवासितम् ।
कर्पूरधूलीधवलं सुशीतलं
पिबन्ति तोयं धनिनोऽत्र केवलम् ॥ १८ ॥

सरोऽतिमत्तोग्र[६५]गजावलोडितं
विपन्नमीनं[६६] परिपीडिताम्बुजम् ।
विहाय यान्त्यन्यजलाशयं खगा
न नीरसं हि स्पृहयन्ति जन्तवः ॥ १९ ॥

पिकरसितरसालश्चम्पकाब्जालिमालो
ललिततरमरालः सेव्यशीतांशुतारः[६७] ।
शशिरसिकचकोरः प्रोषितानां कठोरो[६८]
रमयतु मम चेतः सुन्दरोऽसौ निदाघः ॥ २० ॥

॥ इति श्रीदुर्लभकृते ऋतुवर्णने ग्रीष्मवर्णनं नाम पञ्चमः सर्गः ॥ ५ ॥

---

६५. 'मन्तोग्र' इति मातृकायाम् ।
६६. ऋतुसंहारे १.१९ श्लोक इदमेव पदं दृश्यते ।
६७. सेव्याः शीतांशुः ताराश्च यस्मिन् सः ।
६८. अत्र मातृका दुष्टा ।

[वर्षावर्णनम्]

वर्षोपलैः शीतसमीरशीकरै-
दिवाकराच्छादनपङ्कजोत्करैः ।
निदाघदाहं जगतो विनाशय-
न्समागतो[६९] - - वदम्बुदागमः ॥ १ ॥

निरीक्ष्य शुष्कान्सरसीरुहाशयां-
स्तथा [७०]बृहद्भानुविदग्धभूधरान् ।
तडित्प्रभाभिर्द्युमणीनितस्ततो
विलोकयन्तीव नभोङ्गणे घनाः[७१] ॥ २ ॥

कादम्बिनीं कुन्दकदम्बमञ्जरीं
तथा बलाकान्[७२] कुटजार्जुनाम्बुजम् ।
सौदामनीं चेह विलोक्य भीरवो
भ्रमन्ति लोका नितरां प्रवासिनाम् ॥ ३ ॥

पिकाङ्गनाचातकचारुनिस्वनैः
पयोधरध्वानगभीरमर्दलैः ।
कलापिनश्चित्रकलापमण्डपे
वितन्वते नर्तनमत्र नन्दिताः ॥ ४ ॥

---

६९. अत्र मातृकायामक्षरद्वयं लुप्तम् ।

७०. बृहद्भानुरग्निः ।

७१. स्वमित्रभूत-सरो-भूधर-शोषण-दाहापकारकर्तॄन् सूर्यान् तिरोहितान् अपराधिन इव तडिद्दीपहस्ता घना मृगयन्तीति भावः । द्वादशात्मत्वात्सूर्यस्य द्युमणीनिति बहुवचनम् । अग्नेरपि सूर्याहिततेजस्कत्वात्तदन्तर्भावः ॥

७२. 'बलाकाम्' इति मातृकायाम् ।

विजेतुकामा इव कोकिलध्वनिं
घनागमे लब्धबलाः शिखण्डिनः ।
शृङ्गे गिरीणामिह चातकस्वनै-
र्निजस्वनं संवलितं प्रकुर्वते[७३] ॥ ५ ॥

जलप्रपातैरतिबाष्पनिर्गमै[७४]-
र्घनप्रचारैरसिताम्बुदोपमाः ।
नीपप्रकाशैः शिखिचातकस्वनै-
र्मनो हरन्ते नितरां महीधराः ॥ ६ ॥

तटद्रुमोत्पाटनजातनिस्वना-
स्तरंगतोयोद्धृततीरभूमयः ।
घनप्रपीताम्बुमिति प्रधाविताः
सरित्पतिं पूरयितुं च निम्नगाः[७५] ॥ ७ ॥

भेकस्वनैर्भोगिकुलं भयाकुलं
प्रयाति निर्मोकधरं महीधरम् ।
शिखण्डिशावैरपि तत्र ताडिताः
सदापदाढ्या हि भवन्त्यसाधवः ॥ ८ ॥

---

७३. शत्रुजयाय यथा विजिगीषुभी राजभिर्मित्रबलसंग्रहः क्रियते, तथा ।

७४. घर्मतप्ताया भूमेः नवासारापाते जनितस्य ऊष्मणो निर्गमैः ।

७५. सूर्यकरद्वारा घनैरेव पीतजलोऽस्मत्पतिः समुद्रः पुनरस्माभिः प्रभूतजलैः पूरयितव्य इत्याशयेनेत्यर्थः ।

वरेन्द्रनीलोपममम्बुदाम्बरे[७६]
सुरेन्द्रचापं सुभगं तडिद्गणम्[७७] ।
विलोक्य लोकः किल कान्तिकुण्डलं[७८]
समीहते नाब्जदिनेशमण्डले ॥ ९ ॥

धाराधरैः श्यामतरैस्तडिद्धरै-
र्नभः शिलीन्ध्रैश्च महीधरैर्धरा ।
नृत्यन्मयूरैः पिकनिस्वनाकुलैः
सरस्तथाद्याब्जगणैर्विराजते ॥ १० ॥

महीं महासारभरेण भासुरां[७९]
जलैकरूपां स्फटिकेन्दुसन्निभाम् ।
विलोक्य नार्यो नितरां प्रवासिनां
स्थिता निराशा इव जातसाध्वसाः ॥ ११ ॥

नष्टेन्दुतारे गगने सकंकणे[८०]
सकोकभेकस्वनसङ्कुलास्विह ।
गाढान्धकारासु निशासु नायिकाः
परिष्वजन्ते रमणं भयाकुलाः ॥ १२ ॥

---

७६. मेघमयाकाश इत्यर्थः ।

७७. 'तडिद्गुणम्' इति पाठः स्यात् ।

७८. परिवेषमण्डलम् । चन्द्रसूर्यमण्डले कदाचित् वर्णविचित्रं परिवेषमण्डलं यद् भवति, ततोऽप्ययं सुभगः इन्द्रचाप इत्यर्थः ।

७९. अतिवृष्ट्या सर्वत्र जलव्याप्ताम् ।

८०. सन्ततवारिशीकरसहित इत्यर्थः ।

शिरस्सु यूथीकुसुमानि कर्णयो-
　　र्निवेश्य सत्केतकगर्भकुड्मलौ ।
कण्ठेषु जातिस्तबकानिहाङ्गना
　　व्रजन्ति कान्तं निशि जातमन्मथाः ॥ १३ ॥

वलाहकान्वीक्ष्य गभीरनिस्वनान्
　　प्रयान्ति हंसास्त्वरितं हि मानसम् ।
स्वनन्ति भेकाः परितोऽत्र चातकाः
　　कलापिनश्चापि कलापशोभिताः ॥ १४ ॥

नवाम्बुदालीपरिपूरितेऽम्बरे
　　सशीकरे केतकगन्धवासिताः ।
मन्दं समान्दोलितयूथिकोत्करा
　　मनो हरन्ते नितरां समीरणाः ॥ १५ ॥

कादम्बिनीतोयभरावलम्बिनी[८१]
　　कलापिनश्चारुतराः[८२]कलापिनः ।
सौदामनीसंवलिता च यामिनी
　　सुमालिनीं[८३] पीडयतीह कामिनीम् ॥ १६ ॥

---

८१. दृश्यतामृतुसंहारे २. ३, १९: 'तोयभरावलम्बिनः' इति ।

८२. '°तरा' इत्यविसर्गः पाठो मातृकायाम् । कलापिनो मयूराः नृत्तार्थं विस्तृतैः बर्हैः यथार्थकलापिनस्तस्माच्चारुतरास्सञ्जाता इति स्वरसोऽर्थः । अथवा कं सुखमिति द्वितीयकलापिशब्देन सुखजनककेकालापिन इत्यभिप्रेतं स्यात् । अथवा केकाशब्दस्य ककारमात्रघटित्वात् क-शब्दः केकाया उपलक्षणमिति क-लापिनः केकालापिन इति वक्तुं शक्यते ।

८३. 'सुमानिनीम्' इति पाठः स्यात् ।

श्यामाभ्रजालान्तरितेन्दुमण्डलं
विराजतेऽद्य स्पृहणीयचन्द्रिकम् ।
विकीर्णकेशाकुलितं रसाननं[८४]
निरीक्ष्यते किन्न मुदे हि केवलम् ॥ १७ ॥

क्वचिद्घनैरञ्जनराजिसन्निभैः
क्वचित्सुधांशुप्रसरैः सचन्द्रिकैः ।
क्वचिद्बलाकागमनैः सुनिर्मलै-
र्नभोऽद्य विद्युद्द्युतिभिश्च राजते ॥ १८ ॥

विद्युद्गणैः कण्ठमणिप्रकाशनैः
सगोपनैरन्धतमस्यविद्रुताः[८५] ।
विलोक्य पन्थानमतीव दुर्गमं
व्रजन्ति जीवेशमिहाभिसारिकाः ॥ १९ ॥

जलधररमणीयो योषितां वाञ्छनीयः
शिखिकुलकलरावः चारुविद्युत्प्रभावः ।
कुमुदकमलकान्तः पान्थकान्ताकृतान्तो
विमलयतु यशो मे[८६] वार्षिकः काल एषः ॥ २० ॥

॥ इति श्रीदुर्लभकृते ऋतुवर्णने वर्षावर्णनं नाम षष्ठः सर्गः समाप्तः ॥ [८७]

---

८४. रसाया भूमेराननम् ।

८५. स्वकण्ठाभरणभूतानां रत्नानां प्रकाशनैः । 'सगोपकैः' इति स्यात्पाठः **सेन्द्रगोपैरित्यर्थः** । अथवा वर्षजलाद्रक्षणार्थकैः छत्रप्रावरणादिसहितैरित्यर्थः । अविद्रुताः **मन्दमन्दमित्यर्थः** । ८६. मे कवेः । ८७. मातृकान्ते लिखितमिदम्—

॥ रामकृष्ण ॥ संवत् १६२५ समये माघवदी अष्टमी सोमवासरे वकाडग्रामे पुस्तक-**मिदं समाप्तम्** । वीरणाथेनालेखि आत्मपाठार्थम् ॥

अतः कवेः कालः क्रि. १५६९ वर्षतः पूर्वमासीदित्यभ्यूह्यम् ।

अनुबन्धः

अस्य ऋतुवर्णनकाव्यस्य या अनूपपुस्तकालये मातृका वर्तते, सा सव्याख्येति ज्ञायते। सव्याख्यायास्तस्याः प्रतिलिपिरेका कीर्तिशेषेन कुह्नन्-राजमहाशयेन सङ्गृहीता आसीद्, यामादाय अड्यार्-पुस्तकालये प्रकाश्यमानायां ब्रह्मविद्यापत्रिकायां सव्याख्यमेतत् काव्यं डा. कुञ्जणिराजेन मुद्रापयितुमुपात्तम्। एतत्तु नास्माभिः पूर्वमेव ज्ञातम्।

उभयोर्मातृकयोस्तु पाठभेदा दृश्यन्ते, ते तु कथमागता इति नोत्प्रेक्षितुं शक्यते। अस्माकं मातृकाभूता प्रतिलिपिर्बीकानेरस्थपण्डितेन अर्धं तदानीं तत्पुस्तकालयाधिकृतेन श्रीमाधवकृष्णशर्मणा चार्धं विलिख्य प्रेषिता।

अस्मन्मुद्रणानन्तरं विज्ञातया श्रीकुह्नन्-राजप्रतिलिप्या सह संवाद्यमाने काव्ये दृष्टाः केचन उपादेया विशेषा अधो दीयन्ते।

अस्माकं मुद्रणम्	कु. रा. मुद्रणम्
१-१२: द्वितीयपादे अक्षरमेकं लुप्तम्।	अत्र 'स्थलारविन्दावलि°' इति।
१-१६: तुरीयपादे °आद्यतिक° इति।	अत्र 'अद्यान्तिक°' इति।
२-२: इतः परं 'हंसाः' इति श्लोकः, तदन्ते 'युग्मम् इति' च। अतोऽत्र २-३-श्लोकयोर्मध्ये एकः श्लोको लुप्त इति तत्रास्माभिः सूचितम्।	स लुप्तः श्लोकोऽत्र उपलभ्यते। स यथा— माञ्जिष्ठवासांसि सतूलकानि प्रलम्बकूर्पासकसन्निभानि। क्षीराणि पक्वानि सशर्कराणि कृतानि चात्रामृतकल्पितानि॥
२-११: प्रथमपादे 'कपोल' शब्दानन्तरम् अक्षरद्वयलोपः। 'कपोल (भित्त) यः' इत्यस्माभिः पाठस्सूचितः।	अत्र 'कपोलपालयः' इति दृश्यते।
४-१०: तुरीये पादे अक्षरचतुष्टयं लुप्तम्।	अत्र 'सजपैः स०' इति।
४-१२: तृतीयपादे 'मोक्तुम्' इत्यस्य स्थाने 'भोक्तुम्' इति मुद्राराक्षसः।	
४-१६: तृतीये पादे 'प्रसूनसर्वैः (गैः)' इति।	अत्र 'प्रसूनसंघैः' इति।
५-६: तुरीयपादे 'वृषार्कतापम्' इति।	अत्र 'वृथार्कतापम्' इति।
५-१०: 'भवन्त्यवा°' इत्यतः परमेकमक्षरं लुप्तम्।	अत्रापि अक्षरलोपः, किन्तु पादे अन्यत्र निर्दिष्टः; स लोपः पादारम्भ एव 'सदा' इत्यध्याहारेण संपादकेन पूरितः।
६-१०: तुरीयपादे अक्षरद्वयलोपः ... '°वदम्बुदागमः' इति।	अत्र 'मित्रवद्°' इति।
६-९: द्वितीयपादे 'तडिद्गणम्' इति।	अत्र 'तडिद्गुणम्' इति।
६-१६: तुरीयपादे 'सुमालिनीम्' इति पाठः। अत्रास्माभिः 'सुमानिनीम्' इति पाठः स्यादिति सूचितम्।	अत्र 'सुमानिनीम्' इत्येव पाठः।

॥ अन्योक्तिमुक्तावली[१] ॥

॥ सोमनाथकृता[२] ॥

[३]आर्यासूनुसमानं प्रणम्यमानं धरासुरप्रवरैः ।
झम्पाम्बया तयालं[४] मुद्गलमालम्बदं कलये ॥ १ ॥

[५]गणपतिरतितुष्यन् भूरि दानानि[६] यस्मा
वितरति कलगीतीर्नित्यमाकर्ण्य तूर्णम्[७] ।
गजनगजविरामा[८] सत्कला मालिनीयं[९]
जयति मधुकराली रम्यशब्दावलीषु[१०] ॥ २ ॥

---

१. मातृकाद्वयमालम्ब्य परिष्कृतेयं कृतिः । 'क' संज्ञिता मातृका 'एषियाटिक् सोसैटी आफ् बेङ्गाल्', कल्कत्ता, G 1096; ११-काकितपत्रात्मिका; 'ख' संज्ञिता उज्जयिनीस्थ-प्राच्य-ग्रन्थ-संग्रहस्था श्री वि. वेङ्कटाचलेन विक्रमविश्वविद्यायसंस्कृत-विभागाध्यक्षेण प्रेषिता 829-संख्याङ्किता १३-काकितपत्रात्मिका । 'क' मातृकायां तत्र तत्र विवरण-भूतानि लघुवाक्यानि प्रायः कोशवाक्योदाहरणरूपाणि पुटप्रान्तेषु अधिकतया लिखितानि; एतादृशं वाक्यमेकमेव क्वचित् 'ख' मातृकायां दृश्यते । 'ख' मातृकायां बहुत्र एक-द्वि-त्रि-अक्षरात्मका ग्रन्थपाताः, वर्णानुपूर्वीविपर्यासाश्च दृश्यन्ते ॥

२. रागविबोधादिकर्तुरस्य सोमेश्वरापरनाम्नः कवेः संक्षिप्तो वृत्तान्तः अस्यैव मलयमारुतस्य पूर्वस्मिन् स्पन्दे ८४-पृष्ठे दत्तः, यत्र सोमनाथशतकाख्या तदीया कृतिर्मुद्रिता । कवेर्नाम सोमेश्वर इत्यपि दृश्यते; तथैव 'क' मातृकायाम् ॥

३. मलयमारुते १-स्पन्दे ८४-पृष्ठे मुद्रितस्य कवेः शतक-ग्रन्थस्योपक्रमेऽप्ययमेव श्लोको दृश्यते; कवे रागविबोधजातिमालादौ च ।

४. 'क' व्यात्तमालं । ५. विघ्नेश्वरः । ६. दानजलानि । ७. 'क' पूर्णम् । ८. गजेषु, अर्थात्तत्कटेषु; नगजेषु वृक्षप्रसूतेषु पुष्पेषु च विशेषेण रमत इति । ९. मालिनी बद्धपङ्क्तिः १०. रम्यशब्दावलीषु तन्मध्ये इत्यर्थः । यद्यपि रम्यशब्दा जन्तवो वनान्ते वृक्षेषु वा स्युः, तथापि तेषां मध्ये मधुकराली जयति । अत्र शब्दार्थ-व्यञ्जनाद्वारा कविकाव्यसमाधिः; गणपतिः कोऽपि प्रभुः यः कवितां श्रुत्वा भूरि दानानि करोति । कलगीतीराकर्ण्य इत्यनेन गानकाव्यादिश्रवणं तस्य ध्वन्यते । मालिनीत्यनेन मालिनीवृत्तघटितमिदं काव्यं परामृश्यते ॥

[१]कलितमलिनिमालिः फुल्लनानाप्रसूना-
न्यपहरति निपीयाघ्राय यत्सांप्रतं तत्।
[२]विपदुपगमतान्तं भ्रान्तिशीलो नितान्तं
त्यजति न निशि पद्मं तत्र हेतुं न विद्मः ॥ ३ ॥

अगमदयमलिस्त्वां पूर्वहार्दाद्रसाल-
द्रुम! किमु स चलत्त्वत्पल्लवैर्वार्यते यत्।
भवदुदयमवेक्ष्याघ्राय यात्येव नागं[३]
मदजलसुरभित्वोदारदूतोपहूतः ॥ ४ ॥

मलिनमधुप! यत्त्वत्पाल[४]माम्रं विशालं
द्विपदलितमुदस्य श्रीयतेऽरि[५]स्त्वयास्य।
[६]द्रुतमिह मद[७]लोभात्तत्फलं कर्णताल-
प्रतिहतिततिनश्यत्पक्षतैवोचितं ते ॥ ५ ॥

अतिमृदुमधुर[८]स्वाज्जात्य[९]जातीषु जाता-
द्विहितवदनजाड्यः (ब्यात्) तन्निरासाय भृङ्गः।
व्रतयति मधु नानापुष्पजातं रसोनं[१०]
किमु न पिबति बुध्वा दुग्धतृप्तोऽपि तक्रम्[११] ॥ ६ ॥

---

१. प्रथमं भ्रमरान्योक्तयः। २. रवेरस्तंगमने स्वकीयपत्रसंकोचरूपा विपद्। अत्र सुरापस्य बहिर्भ्रमणशीलस्य रात्रौ केवलं स्वगृहमकाले प्रत्यागच्छतः कस्यापि शीलवर्जितस्य पुरुषस्य समाधिः॥ ३. गजम् ४. त्वत्पालकम्। ५. आम्रस्य अरिः, तद्भञ्जको गजः। ६. 'क' हत° ७. गजस्य मदजाल्लोभात् ८. 'ख' रेफो लुप्तः। ९. 'क' ज्जाता १० रसेन ऊनम्। ११. एवं बहुषु श्लोकेषु तुरीयपादेऽर्थान्तरन्यासः कविना निबद्धः॥

[१]द्विजपतिदयितां तां व्यक्तपुष्पां[२] प्रदोषेऽ-
प्यहह कुमुदिनीं किं भृङ्ग भुङ्क्षे स्वदाक्ष्यात्[३] ।
मलिनमधुप[४] मन्ये त्वय्यदः सर्वमर्हं
विहितमविहितं वा चिन्तयेत्को हि लोलः ॥ ७ ॥

[५]मधुकर रसलौल्यं मुञ्च नो मुञ्चसे चे-
दयि[६] न भज जलान्तर्वासिपङ्केरुहालिम् ।
भजसि यदि रमेथा नात्र रात्रौ, यदि स्यात्
तव कथमपि बन्धो[७] मोचयेदज्ञ कस्त्वाम् ॥ ८ ॥

मधुप मधुजडस्त्वं यद्विहायोरुजाती-
मनुवनमनुगासे[८]ऽनर्थकं बन्धुजीवम् ।
मम मतमिति[९] नामान्वर्थता[१०]भ्रान्त्युपेता-
तिथिरुधिरपिबत्वान्मत्कुणारक्तमेतत् ॥ ९ ॥

---

१. द्विजपतिः चन्द्रः, विप्रश्च । २. फुल्लकुमुदपुष्पाम्; अन्यत्र रजस्वलाम् । ३. स्वसामर्थ्यात् । ४. 'ख' 'मधुप मलिन' इति । ५. 'ख' ८-९-श्लोकयोः क्रमे व्यत्यासः । अत्र 'क' मातृकायां 'मधुकरी कामिसरणी' इति टिप्पणीरूपं किमप्यधिकं दृश्यते । ६. 'क' °दपि । ७. बन्धः अन्तर्बन्धनम् । ८. अनुगच्छसि; गाङ् गतौ इति आत्मनेपदिनो धातोः । ९. अहं त्वेवं मन्ये इत्यर्थः । १०. नाम्नः बन्धुजीवरूपस्य अन्वर्थता यथार्थतया बन्धूनां जीवभूतत्वम् । तथेदं पुष्पमिति भ्रान्त्या ये अतिथय आगताः तेषां रुधिरपिबत्वाद् रुधिरस्य पानात् मत्कुणवद् रक्तमन्यरक्तैः रक्तवर्णं भवत्येतत् पुष्पमित्यर्थः ॥

भ्रमर भवसि साधुस्तत्त्वतः सारवेदी
सततमसि मुमुक्षुर्यत्तमोजातबन्धात्[१] ।
कुसुममपि जहासि स्वर्णवद्वर्णवच्च[२]
स्पृहयति न हि मुक्तेर्भाजनं[३] काञ्चनाय[४] ॥ १० ॥

सरसि शिशिरकाले नश्यदम्भोज[५]जाले
कृतमतनु हिमानीसाधनं[६] यन्निशायाम् ।
तदुरुफलमवाप्तं फुल्लमाकन्दलाभा-
द्भ्रमर तदपि लौल्याद्भ्राम्यसीतस्ततः किम् ॥ ११ ॥

इतरतरुषु कृत्वा पूर्वपक्षत्वयोगं
प्रथयितुमलिराम्रे साधुसिद्धान्तभावम् ।
विचरति परितोऽयं, नैव लौल्यान्न ताव-
द्गुणवदपि हि काम्यं निर्गुणं नैक्षि यावत्[७] ॥ १२ ॥

---

१. तमसि लक्षणया रात्रौ जातात् पङ्कजादिषु बन्धात् । अन्यत्र तमोगुणजात् संसारबन्धात् ।

२. स्वर्णतुल्यवर्णवत् चम्पकमित्यर्थः । चम्पकं भ्रमरो न गच्छतीति न्यायात् ।

३. मुक्तेर्यः भाजनीभवति विवेकी स काञ्चनाय स्वर्णाय न स्पृहयतीति ।

४. 'क' मातृकायामधिकतयात्र 'चम्पकः कनकाह्वयः' इति कोशो दत्तः ॥

५. 'क' °धि°

६. तादृशं तप इत्यर्थः ।

७. निर्गुणान् सर्वान् दृष्ट्वैव पश्चादयं गुणवानाश्रयार्ह इति निश्चेतुं शक्यमित्यर्थः ॥

विधुर! मधु[1] सुरभ्या मालती[2]कान्तयालिन्[3]
[4]अहह भज सकामः[5] कुन्दवल्लीं सपुष्पाम्।
अयि तदपि तथा ते नैव सौरभ्यलाभो
न भवति सुखपात्रं प्राप्य साधारणस्त्रीम्[6] ॥ १३ ॥

परिचयमपनीयोड्डीय रोलम्ब! जात्या
श्रयसि सुरभिभावादेव कस्तूरिकां किम्।
[7]मलिन न हि रसोऽस्यां श्यामतास्ये परं स्यात्
तव तु मलिनयार्हः संगमो नो सुजात्या ॥ १४ ॥

बदरमथ च कुन्दं निन्द्यमास्वाद्य मन्दं
मधुकर हिमकालं यापयालं विषादैः।
कतिपयसमयेनोद्भासिता मञ्जरीभि-
स्तव तनुतर[8]याच्ञादैन्यहारी रसालः[9] ॥ १५ ॥[10]

---

१. 'क' मृदु। २. 'ख' मालतीयां। मालतीरूपया कान्तया भार्यया। ३. 'क' अलिं। अत्र अलमिति समीचीनः पाठो भवितुमर्हति। सुरभिमालतीकान्तया यन्मधु लभ्यते तत्ते अलमित्यर्थः। ४. 'क' न दद्द ५. 'भज सकामः' इत्यत्र यदि 'भजसि कामात्' इति पाठः, तदा समीचीनः स्यात्। ६. 'ख' °णं श्रीम्। साधारणस्त्री वेश्या, सा तत्त्वतः सुखाय न भवतीति प्रसिद्धम् ॥ ७. हे मलिन! कृष्णवर्ण, मलयुक्त इत्युभयथा योगः। अस्यां कस्तूरिकायां न कोऽपि रसः, यथा मालत्याम्; परं सापि कृष्णवर्णा, तया च मुखार्पितया श्यामता कलङ्क एव जायते; मलिनया स्वयं कृष्णवर्णया मलयुक्तया निकृष्टप्रदेशजातया संगमो नोचितः; किन्तु सुजात्या शोभनजन्मवत्या जात्या तदाख्यपुष्पेणैव; संगमो युक्त इति वाक्यशेषः। अथवा नो असुजात्या इति विश्लेषेण मलिनयेत्यनेनान्वयः, एकं वाक्यं च ॥ ८. 'क' °तरु। ९. अस्मिन् पुटे 'क' मातृकायां टिप्पणीद्वयं दत्तं 'कुरुम्बवृक्षस्य पुष्पम्' (?) 'लोलश्चलसतृष्णयोरिति विश्वः।' इति। अत्र प्रथमं दत्तं विवरणं कं श्लोकं किं पदं च परामृशतीति न स्पष्टम्। द्वितीयवाक्ये विवृतो लोलशब्दः अलिविषयकः अनेकश्लोकेषु दृश्यते ॥ १०. अस्मिन् पुटे 'क' मातृकायां पुटोपरिभागे अयमन्यदीयः श्लोकोऽधिकतया दृश्यते—पीतानि तानि (?) गुणवति ग्रीष्मकालावसाने यावत्तावत्समयहृतया येन केनाशनेन। पश्चादंभोधर रसपरीपाकमासाद्य तुम्बी कूष्माण्डी प्रभवति यदा भूभुजः के वयं के ॥

[1]सति च गिरिशयत्वे नर्तकत्वे स्वकाले[2]
प्रियदहनसुतत्वे[3]ऽहिच्छटाहारकृत्त्वे[4] ।
शिखिनि च शशिमौलौ नैलकण्ठ्ये[5]ऽपि तुल्ये
स्मरहरवदवेत्किं स त्रिलोकीं[6] वराकः[7] ॥ १६ ॥

कथमपि भवता चेद्भोगिभोगो[8]ऽपि भुक्त-
स्तदपि भवसि बर्हिन्नैव भोगी[9] यथार्थम् ।
सहजमृजुविधे[10]र्यत्प्राप्यते तेन तद्वान्
भवति[11] न तु परस्वैरायतिं नाशयद्भिः[12] ॥ १७ ॥

[13]कलरवचटकाद्या यद्यनेके वराकाः
पथि पथिक यथेष्टं संगतास्तद्वृथैव ।
सुखवसतिरुपास्यस्ते[14] स चाषस्तु यस्या-[15]
शु शुभदमपि दूराद्दर्शनं वामतापि ॥ १८ ॥

---

१. प्रथमश्लोकपञ्चदशके भ्रमरविषयका अन्योक्तयः । इत आरभ्य मयूरविषयकौ द्वौ श्लोकौ । २. वर्षाकाले इत्यर्थः । ३. प्रियः दहनसुतः कार्त्तिकेयः यस्य सः । एतच्च कुमारस्य मयूरवाहनत्वात् शिवे मयूरे च समं घटते । ४. अहिसमूहरूपहारकृत् शिवः; तदाहारकृत् मयूरः । ५. 'क' °ण्ठे । ६. 'क' °की । ७. 'ख' °कम् । स्मरहरवत् शिववत् अयं वराको मयूरः त्रिलोकीमवेत् रक्षेत् किम्? ८. सर्पशरीरम् । ९. सुखी १०. ऋजुविधेः दैवयोगात् । ११. 'ख' भवतु । १२. परस्वैः परकीयैर्द्रव्यैः सर्पशरीरादिभिः । परस्वभोगः पापत्वादायतिनाशकः । १३. कलरवः कोकिलः । इयमन्योक्तिः शुभशकुनभूतचाषपक्षिविषयिणी । १४. ते तव । १५. यस्य आशु शुभदमिति च्छेदः । यस्य चाषस्य दर्शनं, वामता पथि गच्छतः वामपक्षे स्थितिर्दर्शनं वा शुभदम् ॥

जगति विहगपूगाः सन्त्यनेके विचित्रा-
स्तदपि वद समानः कः शुकेनास्ति तेषु ।
युवतितनयचाटु[1] न्यस्य शृण्वन्ति यस्य
स्फुटपदचटु[2] भूपास्ते निशान्ते[3]ऽनिशं तु ॥ १९ ॥

अहरहरिह यातायातमातन्वते ते
नभसि बत बकाद्याः पत्रिणस्तावता किम् ।
यदि सकृदपि दैवादम्बुदुग्धे[4] विवेक्ता
व्रजति विधिपतत्री धन्यता[5] स्यात्तदास्य ॥ २० ॥

रुचिरगतिगुरोः सन्मानसावासचञ्चोः
श्रुतिसखविधिराजत्सत्यलोकप्रियस्य ।
[6]मलिनमपि विभुत्वेनेतराधारयोग्यं
गगनमनु न हंसस्योचितः पक्षपातः[7] ॥ २१ ॥

बककुलमुपयातः स्वभ्रमात्[8] पल्वलेऽस्मिन्
कुरु वर[9] वरटेश[10] श्रान्तिशान्तिं मुहूर्तम् ।
न कथय जलदुग्धद्वैध्यविद्यां [11]तु तस्मै
झषकबलनविद्यां यद्यपि स्वां प्रदद्यात् ॥ २२ ॥

---

१. स्वयुवतीनां तनयानां च चाटूनि न्यस्य त्यक्त्वा । २. 'ख' °मपि । ३. अन्तःपुरे । ४. अम्बु च दुग्धं च अम्बुदुग्धे । हंसविषयेयमन्योक्तिरुपरितने च द्वे । ५. 'ख' इत आरभ्य समनन्तरश्लोके 'श्रुति' इत्येतत्पर्यन्तं ग्रन्थपातः । ६. मालिन्यं तु गगनस्य मेघादीनामध्यासेन । पक्षपातः डयनम्, आनुकूल्यं च । ८. स्वकुलीया इम इति बकेषु भ्रमादित्यर्थः । ९. 'ख' 'वर' इत्यक्षरद्वयं लुप्तम् । १०. वरटा हंसयोषित् । ११. द्वैध्यविद्यां द्विधाविभजनविद्याम् ।

न गिल[1] किल बकोट ! प्रोत्कटं मत्स्यमेतं
गिलितबिडिष[2]माशु छद्मना धीवरास्तम्[3] ।
सति तु कवलितेऽस्मिन्रश्मिनाकृष्यमाणो
यमवसतिनिवासं लप्स्यसेऽनेन सार्धम् ॥ २३ ॥

करट[4] ! सवनकृ[5]न्नन्वेकदृक् सर्वदर्शी
सततकृतसदुञ्छाख्येयवृत्तिर्द्विजस्त्वम् ।
[6]असि यदि किमिदं रे निन्दितं वृत्तमास्ते
यदशुचिनि करङ्के[7] केवलं चित्तमास्ते ॥ २४ ॥

[8]परभृदिति पिकस्येवाख्यया वर्णतश्च
स्पृशति करट किंचित्त्वत्प्रतिष्ठा हठात्त्वाम् ।
द्विज भज निजकीर्त्यै स्थूल[9]वाचंयमत्वं
वहति हि बहुमूल्यं मुष्टि[10]रस्पष्टभावात् ॥ २५ ॥

विरम शफरघातोदारदम्भाद्बक ! त्वं
मृगयुरटति पृष्ठे यष्टिकोटिस्थपाशः ।
नृतमिति मतिश्चेदेष[11] ते कण्ठहारो[12]
भवति पतग कस्यापीषदाहारकारी ॥ २६ ॥

---

१. 'ख' तिल । २. अत्र 'क' मातृकायां 'बिडिषं (बडिशं) मत्स्यवेधनमित्यमरः' इति टिपप्णी लिखिता। 'ख' बिडिश° इति ; प्रायो बडिश इत्यपि रूपमस्य पठितम् । ३. धीवरैरस्तं जले प्रक्षिप्तम् । ४. अत्र 'क' मातृकायां दृष्टमधिकं विवरणम् 'करटः सरटो ज्ञेयो क–टोघ्वां स उच्यते(?) । ५. स्नानकृत् । ६. यद्यसि इति पूर्ववर्तिना त्वंपदेनान्वयः । ७. प्रेते । २४-२५ काकान्योक्ती । ८. परं बिभर्तीति । ९. 'स्थूलौ निष्प्रज्ञपीवरौ' इति 'क' मातृकायां विवरणार्थं कोश उदाहृतः। १०. 'ख' 'मुष्टि' पदं लुप्तम् । मुष्टिरूपेण संवृतस्य पाणेरन्तः शून्यम् , अल्पं, बहु वा संवृतं स्यात् ॥ ११. मृगयुः । १२. कण्ठं हरतीति ।

न परिवद सुधांशुं कामिकेलेर्निदानं
विधिकृतमिह सर्वं कोक! शोकं जहीहि।
अयमुदयति विश्वालोक[1]कुलोकबन्धु-
र्भवतु बत पुनर्वा योग्ययोराशु योगः ॥ २७ ॥

कुरुतमहनि कोकौ केलिमन्योन्यजीवौ[2]
किमपि च[3] परिचेयो वामुदासीनभावः।
अशनिपतनभीमो दैवभावी वियोगः
कथमहह युवाभ्यामन्यथा सोढुमर्हः ॥ २८ ॥

हरिकरधृति[4]योग्यं खेचरं चक्रसंज्ञं
त्वमथ मधुभिदस्त्रं[5] कोकयुग्मे[6]ति तुल्यम्।
[7]विधुगिलगलभित्तत् त्वं तु भेद्यं विधो[8]र्यत्
[9]करिमशकनिभं वामन्तरं तेन सिद्धम् ॥ २९ ॥

---

१. 'आलोको द्योतवैद्योतौ' इति 'क' मातृकायामत्र कोशोदाहरणं दत्तम्॥ आलोकः प्रकाशः। २. परस्परजीवितभूतौ। ३. 'ख' 'न' इति अपपाठः। ४. 'क' °धृत° ५. कोकपक्षे हरेस्सूर्यस्य करैः धृतियोग्यं धार्यम्; निशि वियुक्तस्य कोकमिथुनस्य सूर्योदये पुनस्समागमयोगादेवमुक्तिः। सुदर्शनाख्यं चक्रं तु हरेर्विष्णोः करेण धारणयोग्यम्। उभयमपि खेचरम्, एकस्य पक्षित्वादन्यस्य दिव्यत्वात्। मधुभिदो मधुसूदनस्य अस्त्रमिति सुदर्शनपक्षे; कोकपक्षे मधुभिद् वसन्तर्तुभेदी ग्रीष्मः; अस्यते वियोगरूपं दुःखमनेनेति अस्त्रम्; ग्रीष्म एव अस्त्रं यस्य तत्। ग्रीष्मे रात्रेस्संकोचः, दिवसस्य च दैर्घ्यमिति कृत्वैवमुक्तिः। ६. 'समुदायिभ्यो ना स समुदयः' (?) इत्यत्र 'क' मातृकायामधिकं लिखितम्। ७. विधुं गिलतीति विधुगिलो राहुः तद्गलभित् विष्णोश्चक्रम्। ८. विधोः चन्द्रस्य भेद्यं स्वोदये परस्परसाहचर्याद्वियोजनीयम्। ९. गज-मशकयोर्यदन्तरं तादृशो वां भेदः॥

अजनि हि विनतायामुन्नतायां त्रि(द्वि ?)पुत्री[1]
परमभवदिहान्धः(ण्डः) [2]कश्चनान्यश्च पङ्गुः ।
[3]जयति स गरुडोऽयं[4] क्लेशनाशी स्वमातु-
र्वरमपि हरयेऽदा[5]त्तत्प्रसादासहः सन् ॥ ३० ॥

इह किमविकलाङ्गैस्तैरनेकैर्विहङ्गै-
स्तरुमनुमृगयुः[6] स्वं (चेत् ?) ये तरोरुड्डयन्ते ।
जयति स विभयोरुः[7] कोऽप्यनूरुर्विहङ्ग-
स्तरति वियदनन्तं यद्बलेनार्यमापि ॥ ३१ ॥

अवनि ! तव नितान्तं जन्म संमन्महे [8]य-
त्त्वमवसि वसुभिःस्वैर्भूतजातं वहन्ती[9] ।
अहह महदिदं ते किन्तु निन्दानिदानं
विषमविषमहिम्ना यद्द्विजिह्वेन सङ्गः[10] ॥ ३२ ॥

---

१. 'त्रिपुत्री' इत्यपपाठः ; 'द्विपुत्री' इति भाव्यम् ; पुत्रद्वयमेव प्रसिद्धं, यदेवात्र परामृष्टं च । २. 'अण्डः' इति भाव्यम् ; 'अन्ध' इत्यपपाठः । वर्षसहस्रमण्डतया स्थित्वा ततो गरुड आविर्बभूव ; अकाल एव मात्रा भिन्नादण्डादरुणोऽन्यः पङ्गुर्जातः, तथा जातेन च दास्यमनुभवेति मात्रे शापो दत्तः । विनता च ततः कद्रोर्दासीबभूव । ३. 'ख' स ज(य)ति । ४. 'ख' यः । अमृताहरणेन क्लेशनाशी । मातरं दास्यक्लेशान्मोचयामास । ५. तत्र अमृतनिकटस्थेन प्रीतेन विष्णुना गरुडाय वरो दत्तः । 'अहमेव ते वरं दास्यामि' इति दर्पाद् गरुडेन च विष्णवे वरो दत्तः । 'मम वाहनं भव' इति गरुडाद् विष्णुर्वरं लब्ध्वा गरुडवाहनो बभूव । एतत्सर्वं महाभारते आदिपर्वणि अनुशासने च द्रष्टव्यम् । ६. 'क' °यु° । ७. 'क' विभुपोरुः ; 'ख' विभबोरुः । विभयः अत एव उरुः दृढश्च । ८. 'क' सन्मान्यदे । ९. 'क' °न्ति । १०. यथा वसूनि तथा द्विजिह्वाः सर्पाश्च भूम्यन्तर्वर्तन्ते ।

अचल! सकलपालः स्वैरशेषैर्विशेषै-
रसि तदपि तवैको निर्विवेकोऽयमङ्कः[१] ।
स्पृशति यदुरुधात्रीं पादजालं[२] सहेलं
मलिनजलधरालिं मौलिरालम्बते ते ॥ ३३ ॥

अयि धर[३] करकाणां[४] पातमासारघातं
मलिनजलधरोत्थं मूर्द्धनि क्षाम्यसीति ।
स्थिरधरणिधरत्वं ते गुरुत्वं च वृत्तं
भवति यदुपलानां टङ्कघातैर्बुधत्वम्[५] ॥ ३४ ॥

अगुरुमलयजादेर्वस्तुनो वस्तुतोऽपि
स्फुटमतिसुरभित्वं तेऽस्ति कस्तूरि! लोके ।
न तु विश दहनं स्वस्पर्धिना सार्धमात्मो-
न्नतिमतितनितुं ते वह्निदिव्ये ह्यकीर्तिः[६] ॥ ३५ ॥

कनक! स जनक[७]स्ते पावकः सर्वतापी
गुरुणि च लघुताकृद्दाहतः स्वाश्रयाशी ।
सकलसुखदभावो गौरवं स्वाश्रयोरु-
[८]द्युतिकृतिपटुता च त्वय्यकस्मात्तु कस्मात् ॥ ३६ ॥

हिममृदुधवलत्वादस्मि नाम्नापि चन्द्रः[९]
पर इति वरगर्वं मुञ्च कर्पूर! दूरम् ।
किमु कुमुदविबोधं सिन्धुमोदं च कुर्याः
शिरसि च कलयेत्किं त्वत्कलां चन्द्रमौलिः ॥ ३७ ॥

---

१. कलङ्कः । २. 'पादाः प्रत्यन्तपर्वताः' इति 'क' मातृकायामत्र अधिकम् । पादेन धात्र्याः स्पर्शः पापाय । 'क' °जालैः । ३. पर्वत । ४. 'वर्षोपलस्तु करकाः' इति 'क' मातृकायामधिकम् । ५. पर्वतपार्श्वेषु हि राज्ञां शासनानि टङ्कैरुल्लिख्यन्ते । अतः साक्षरत्वात् पर्वतानां बुधत्वं भवति । ६. 'क' :स्वकीर्तिः । दिव्यं नाम स्वसत्यतादिनिरूपणार्थः वह्न्यादिप्रवेशरूपः साक्षी । तादृशप्रमाणाश्रयोऽपि ते अकीर्तये भवति । यतः स्वतस्सिद्धस्ते अगरुमलयजाद्यपेक्षया अतिशयः । ७. स्वर्णस्य आग्नेयत्वात् । ८. 'क' अस्पष्टमक्षरम् । ९. 'चन्द्रः सुधांशुकर्पूरकम्पिल्लस्वर्णवारिषु' इति 'क' मातृकायामधिकम् ।

उरुगुणमपि रत्न त्वं प्रयत्नात्सुवर्णं
    श्रय निजपरभागप्राप्तये स्पर्द्धयाऽलम् ।
सति हि दहनदिव्ये भव्यता हेमनि स्यात्
    त्वयि तु न च, यतस्तज्जन्मभूः कृष्णवर्त्मा[1] ॥ ३८ ॥

तव हि जलमपत्यं[2] त्वां निहन्तुं यदुत्कं[3]
    दहन तदुचितं त्वत्तापितत्वाच्च जाड्यात् ।
अनुचितमिति तु त्वं बाडवत्वा[4]च्छुचिः[5] स-
    न्नहह दहसि सिन्धौ प्रत्यहं तत्[6] प्रसह्य ॥ ३९ ॥

[7]यदिह तिमिरभारं वारयत्येष सूरो[8]
    भवतु स रुचिसिन्धु[9]र्लोकबन्धुः[10] सुखेन ।
त्रिजगति बहिरन्त[11]र्हेतुराहारसिद्धे-
    र्जयति सकलजीवोज्जीवकः पावकस्तु[12] ॥ ४० ॥

---

१. यतस्तज्जन्मभूरग्निः, ततः स प्रमाणस्पर्धायां त्वां खण्डशो भेत्स्यति, तत्तु सुवर्णं भव्यतरं प्रकाशमेष्यति च। यतश्च स कृष्णवर्त्मा मलिनमार्गाश्रयः, तत एतादृशः स्वापत्यपक्षपातोऽपि तस्य सहज एवेत्यधिकोऽपि ध्वन्यर्थः। २. 'क' अस्पष्टमिदं पदम्। 'अग्निर्वा अपामायतनम्' इति श्रुतेः जलस्य अग्नि-अपत्यत्वम्। ३. 'क' यदुक्तम्। उत्कमुत्सुकम्। यतस्तत् त्वत्प्रसूतमपि त्वया ताप्यते, स्वतश्च गुणतो जडं पितृभक्तिविधुरं च। ४. बाडवत्वात् ब्राह्मणत्वात्। ५. 'शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः' इत्यत्र 'क' मातृकायां कोशोदाहरणम्। शुचिरिति अग्निनाम; शुद्धश्च। ६. तत् जलम् ॥ ७. 'क' त° ८. 'सूरसूर्यार्यमेत्यमरः' इति 'क' मातृकायामधिकम्। ९. कान्तिनिधिः। १०. 'लोकबन्धुस्त्रयीतनुरित्यमरः' इत्यधिकं 'क' मातृकायाम्। ११. बहिः पाकशालायाम्; अन्तर्जठरे जाठराग्निरूपेण। १२. 'क' स्त्वम् ॥

यदजनि भवतो हे चित्रभानो! हिरण्यं
    वितरसि जगतश्चेतन्न मा वा वितारीः।
दहसि तु जगदेतद्धेतुना केन वहे
    न च तव तद[1]पूर्वं स्वाश्रयस्यापि दग्धुः ॥ ४१ ॥

श्रवणचरणहीनः शेष एष द्विजिह्व-
    स्तदपि पवनभुक्त्वात्[2] भूमिभारे नियुक्तः।
स्वयमनशनशीलो यः स एव प्रियो हि
    व्ययचकितविभूनां नाधिकारी गुणी तु[3] ॥ ४२ ॥

अनवरतमगा ये धार्यमाणा धरण्या
    दधति कथमिमां ते[4] तद्वृथा भूधरत्वम्।
परमुचितमगत्वं वृक्षवृ(व)त्[5] तेषु शेष!
    त्वमसि जगति नागो[6] भूधृतेर्भूधरस्तु ॥ ४३ ॥

अजनि सलिलमग्नेर्हेम च द्विष्टदोषा[7]-
    पहृतय उभयं[8] तत्तापयत्येव तातः।
प्रथममपचयं यात्याविलं सत्तु तापा-
    दपरमकलुषं सद्विन्दते मूल्यमुच्चैः ॥ ४४ ॥

---

१. 'क' तव। २. 'क' भूत्का ३. गुणी सेवको नापेक्षितः किन्तु अल्पव्यय-कार्येवेति भावः। ४. ते अगाः पर्वताः। ५. यथा वृक्षा अगा उच्यन्ते स्थावरत्वात्, तद्गुणेनैव पर्वतानां च अगत्वम्। ६. 'अगः शैले द्रुमे भानौ' इति 'क' मातृकायामधिकम्। नागः सर्पः, न अगश्च। शेषस्यैव वस्तुतो भूधरत्वमुचितमिति भावः ॥ ७. 'क' दोषो। द्विष्टस्य सलिल-सुवर्णस्थस्य अपहृतये स्वापत्यमपि द्वयमग्निः तापयति। ८. क °पहृतय तुभयं।

जहि पशुसमजं भो लुब्धकैकं जहीहि
स्थितमिह पृषदश्व[1]प्रेमपात्रं पृषन्तम्[2] ।
यदि जगदसुभूतो हन्त कुप्येन्मरुत्ते
विरचितदुरितौघ त्वद्दशा कीदृशी स्यात्[3] ॥ ४५ ॥

[4]निरवधिरतिवृद्धस्पर्द्धिमित्रावरोधी
बुधरिपुरिह विन्ध्यो[5]ऽबन्ध्यगस्त्येन साधु ।
भगवदधिकबन्धुर्बन्धुरः शुद्धरत्नै-
र्विधिहतधरधामाधायि[6] सिन्धुस्त्वसाधु ॥ ४६ ॥

त्वयि न सुरभिगन्धो बन्धुरत्वं न तादृ-
ग्मधुनि मधुरिमा नो मार्दवं नापि किंचित् ।
तदपि जगदमन्दोन्मादहेतो कुतो[7]रे
निवससि शिवशीर्षे क्रूरधत्तूर ! वग्धि[8] ॥ ४७ ॥

अयि कपिशुककाकादीन्वराकान्पुषाण
स्वमृदुलफलवृन्दैर्वन्द्य माकन्द किं तु ।
[9]त्वदितरमनुपेतं तं वसन्तोल्लसन्तं
परिकलय कलाढ्यं कोकिलं कीर्तिमूलम् ॥ ४८ ॥

---

१. 'क' °दश्व । २. 'पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः' इत्यत्र 'क' मातृकायां कोशः । ३. 'क' वृषं तम् । ४. पृषन्तं मृगम् । ५. त्वं प्राणैर्वियुज्यसे इति भावः । ६. 'क' निरवरति विवृद्ध° । अतिवृद्धः स्पर्धी हिमवता सह मित्रावरोधी सूर्यमण्डलनिरोधी च । ७. विन्ध्यः अबन्धि अगस्त्येनेति छेदः । यद् उपरि वृद्धेर्निवारितः, तत्साधु । ८. भगवतः तत्र स्वपतो नारायणस्य अधिकबन्धुः । विधिहतानां पक्षच्छेदव्यवसायेन, धराणां पर्वतानां धाम शरणभूतः । अधायि पीतः । 'ख' अचायि ; 'अपायि' इति 'ख' पाठः स्यात् । अगस्त्यान्योक्तिरियम् ॥ ९. 'क' जंतो ॥ १०. वग्धि ब्रूहि । ११. त्वत्त इतरं वृक्षमनुपेतं न गच्छन्तम् ; त्वदेकाश्रयमित्यर्थः ।

द्विजकुलमतिरम्यैस्तावदाकार्य गन्धैः
सफलय फलभारं त्वं रसालैतदास्यैः[१] ।
प्रचलति न हि यावन्मेघकालोत्थझञ्झा-
मरुदुरुतरुवृष्टिप्रेरकोऽनोकहारिः[२] ॥ ४९ ॥

अलिरयमुपहूतः सौरभेणामुना ते
सफलयितुममन्दं सूनसारं रसाल[३] ।
तव न मतमिदं चेद्यात्ययं[४] स्वस्ति तेऽस्मिन्[५]
पवनतपनपीते[६] तेऽनुतापस्तु भावी ॥ ५० ॥

अपुषदिह रसालोऽनेकजीवान्वसन्ते
[७]तदलिकुलमिदानीं याति कार्श्यं तपान्ते ।
अथ वरमिदमेव स्वान्[८] न पुष्णाति को वा
जगति तु बहुमान्यो योऽन्यपोषी कृशः[९] स्यात् ॥ ५१ ॥

---

१. रसाल एतदास्यैः द्विजकुलवक्त्रैरिति छेदोऽर्थश्च २. 'अनोकहः कुटः सालः' इति 'क'। वृक्षशत्रुरित्यर्थः। 'क' °री, °रे, °सि इति पाठत्रयम्; 'ख' °रिम्। ३. 'क' °लम्। ४. अयमलिः। ५. अस्मिन् सूनसारे। ६. पवनेन सूर्येण च पीते शोषिते च। ७. इदानीं तपान्ते ग्रीष्मतापात् कार्श्यं याति रसालः, तथापि तदानीमपि अलिकुलं पोषयत्येव। उत्तरार्धेनार्थान्तरन्यासः-स्वीयान् सर्वः सति विभवे पोषयत्येव, किन्तु स एव बहुमान्यः यः स्वयं कृशस्सन् अन्यपोषणान्न विरमति। ८. 'ख' स्वं। ९. 'कृशाश्वः कृशभृत्यश्च कृशधर्मा कृशातिथिः। तं कृशं कृशमित्याहुर्न कृशः कृश एव यः ॥' इत्यधिकं 'क' मातृकायाम्

इह विकटकुटै[1]स्तैः पालितैकस्वकैः[2] किं
जयति स तु रसायां[3] सालराजो[4] रसालः ।
यदुदयमनु जीवाः साधु जीवन्ति सर्वे
घन इव न वदान्यो जीवनार्थी[5] विविच्य ॥ ५२ ॥

इत उरुपिकगीतिः सारिकागीः परत्रा-
प्यलिरुतमितरत्रान्यत्र सत्कीरपाठः ।
तव महदिति भाग्यं प्रेक्ष्य माकन्द ! नन्दा-
म्यपटु[6]रटनखिन्नः कण्टकिन्यामटव्याम्[7] ॥ ५३ ॥

बलिभुगलिकुटुम्बप्रीणनार्होऽप्यनर्होऽ-
नुवनमवनिभारो[8] नास्ति कः को नु[9] शाखी ।
नृपतिरपि फलेभ्यो यस्य हस्तप्रसारी
स तु जयति रसायां[10] सालराजो रसालः ॥ ५४ ॥

---

१. कुटैः वृक्षैः । 'अनोकहः कुटः सालः' इति 'क' मातृकायामधिकम् ; 'ख' मातृकायामप्यस्तीदम् ; तत्र 'इत्यमरः' इत्यधिकम् । २. पालितः एक एव स्वकः स्वकीयः यैस्तैः । 'ख' °त्वचैः । ३. 'ख' 'क' वसन्ते । ४. शालः सालः वृक्षमात्रवाची ; वृक्षराज इत्यर्थः । ५. 'क' °र्थी । 'ख' पाठे जीवनमर्पयतीत्यर्थः कर्तव्यः । स्वमर्थिनं चातकरूपमेकमेव विविच्य तद्विषये मेघो वदान्यो भवति । तन्न साधु ॥ ६. अपटुः अटनखिन्न इति पदच्छेदः । ७. 'क' अवन्याम् । पुटप्रान्ते पृथक् लिखितं 'अटविन्याम्' इति । ८. भूमिभारभूतः । 'ख' अविनि° ९. 'ख' न । १० भूम्याम्

अमृदुलफलसारैर्यद्धिनोषि त्वमिभ्यान्[१]
न तु कृशविहगांस्ता[२]न्नाप्यलीन्नालिकेर ।
[३]तृणतरुरिति निन्द्यं नाम नापैति विष्णोः
पदमपि[४] भजतस्ते मस्तकेना[५]तिमात्रम् ॥ ५५ ॥

सकलसुमनसां यः पोष्य एष द्विरेफ-
स्तदधिकगुणवत्त्वात्ते तु[६] चाम्पेय! बाढम्[७] ।
तदपि न भवता किं पोष्यते द्विष्यतेऽपि[८]
त्वमिह कथय हेतुं संशयं नोऽपनेतुम् ॥ ५६ ॥

विविधसुमनसो यत्संदशन्याति शीघ्रं
तदयमभिधयालिर्वृश्चिको[९] निश्चयेन ।
कथमतिसुमनस्त्वान्मे[१०] न वध्योऽपराधी
कुरुत मदनुमोदं तद्धतो(तौ)[११] शास्त्रदृष्टम् ॥ ५७ ॥

कति कति बत नो सन्त्यर्जुनाः प्रत्यरण्यं
विपिनचरकुठारच्छिन्नविक्रीतकाष्ठाः ।
समिति झटिति बाणोत्कीर्णकर्णादिवीरः
स तु हरिसुहृ[१२]देकः शक्रभूरर्जुनाख्यः[१३] ॥ ५८ ॥

---

१. आढ्यान् । २. 'क' त । ३. 'क' मातृकायां पुटप्रान्ते उदाहृतोऽमरकोशः 'फलमुद्वेगमेते त्व(च)हिंतालसहितास्त्रयः । खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ॥' ४. आकाशमपि । ५. उपरिभागेन । ६. 'क' न । ७. सर्वपुष्पेभ्योऽधिकगुणवत्त्वात् ते तव स बाढं पोष्यः । ८. वस्तुतस्तु न केवलं स त्वया न पोष्यते, अपि तु तस्मिंस्ते द्वेषोऽपि ९. अलिपदस्य वृश्चिकार्थोऽप्यस्ति । अत्र 'क' मातृकायां प्रान्ते 'अलि जो(द्रुणौ च) वृश्चिके ।' इति अमरवाक्यं, 'मोदयेत् साधुरपि वृश्चिकसर्पहत्याम् ।' इत्यन्यदप्यधिकं लिखितम् ॥ १०. अतीव मृदुमनसोऽपि मम कथमयमपराधी न वध्यः स्यात् । ११. 'क' °तो । तद्धतौ शास्त्रदृष्टं तादृशापराधिवधे शास्त्रानुमतमनुमोदं मम कुरुत । १२. कृष्णसखः । १३. पाण्डवेष्वन्यतमः ।

वरमिह वटतुम्बीनिम्बबिम्बीबदर्यः
फलमतिसुखलभ्यं यस्य कस्यापि यासाम् ।
न तु पनसरसाला यत्फलाप्तौ[१] ललाट-
[२]स्फुटनमवनकारिक्षेपणीयाश्मभिः स्यात्[३] ॥ ५९ ॥

[४]विहगविधिबलेन प्राप्तभाग्यो निदाघे
घन[५]फल पिचुमन्द! त्वं रसालायसे चेत् ।
[६]पिकयनि(सि) कट(टु)काकांस्तेऽद्य भाग्यांश[७]योग्या-
न्न यदि, भजति स त्वां कोकिलस्तावता किम् ॥ ६० ॥

कदलि! सदलिजालं पाल्यते सूनसारै[८]
र्विपुलदलतले ते भुञ्जतेऽनेकलोकाः[९] ।
फलमपि कपिकीरै[१०]रिभ्यलभ्यै[११]श्च भोज्यं
तदपि वद फलाढ्यावाङ्मुखी किंनिमित्तम्[१२] ॥ ६१ ॥

---

१. 'ख' °प्त्यै । २. 'ख' ग्रन्थपातः । ३. अवनकारिभिरुद्यानपालकैः फलचोराणां विद्रावणार्थं येऽश्मानः क्षिप्यन्ते, तैरश्मभिः ललाटस्फुटनं स्यात् । ४. काकरूपविहगानां दैवबलेन । ५. 'क' न च । ६. 'क' काकानां पिकीकरणं विना तव रसालीभावो दुर्घटः । तव भाग्ये अंशस्य योग्या हि तव बन्धवस्ते काकाः । त्वद्भाग्ययोगेन तान् पिकीकुरु ; वास्तविकः पिकस्तु त्वां न भजत्येवेत्यर्थः । ७. 'क' भाग्यात्स° ८. 'ख' सूनुसारैः । ९. 'क' °लोलाः । १०. सकीरै° । ११. 'क' -सत्यै° । १२. केन दुःखेनेत्यर्थः ।

[१]उपकृतिरतितुच्छार्थिप्रयासो महीयान्
[२]मदुपगतिवितीर्णा[३] वर्णनं[४] तद्ध्यवर्णः[५] ।
मम धिगिदमगत्वं यन्न गत्वोपकुर्वे
स्वयमिति किमु लज्जावाङ्मुखी त्वं फलाढ्या ॥ ६२ ॥

विटपिवर वट त्वं मौलिघृष्टाम्बरत्वाद्
[६]अथ विकटजटत्वाद्[७]धूर्जटेस्तुल्यरूपः ।
अकटुकफलकोटिप्रीणितानन्तजीवो
[८]निकटलघुवटानां वर्धने किं पटुर्न ॥ ६३ ॥

तव चलदल[९] शाखिन् मौलिमूलान्तरालं
कलयति निलयत्वं देवदेवत्रयस्य[१०] ।
समिदथ दलमेधस्साधनं साधु यागे
तदपि [११]किमिति मन्दस्पृश्यता[१२] तेऽतिवन्द्य ॥ ६४ ॥

---

१. इयमपि कदल्यन्योक्तिः, फलभरैर्यत्सा अवाङ्मुखी तत्र लज्जारूपहेतूत्प्रेक्षा क्रियते। आगतेभ्यः फलवितरणात् स्वयं गत्वा फलप्रदानं हि श्लाघ्यतरं, तत्तु मे अगत्वात् स्थावरत्वान्न कर्तुं शक्यमिति रम्भाया लज्जा उत्प्रेक्षिता। २. 'क' मृ°। ३. 'क' °णो ; मदुपगतौ सत्यामेव वितीर्णा उपकृतिरिति अन्वयः। ४. 'क' वर्णतः। ५. 'क' स ह्यवर्णः। 'ख' तर्द्ध°। मदुपकृतिवर्णनं वस्तुतो मम अवर्णःअपयश एव । अत्र 'क' मातृकायां कोशोऽधिकतया पुटप्रान्ते लिखितः 'अवर्णाक्षेपनिर्वादपरिवादापवादवत्' ६. 'क' अप्य। ७. सटत्वाद्। ८. न केवलं शिववद् अकटुफलानि जीवेभ्यो न ददासि, किन्तु स्वान्तिकेऽपि न अन्यान् लघुवटान् स्वप्ररोहरूपान् पोषयसि ; किन्तु स्वस्यैव जटा विसृज्य स्वीयामेव स्वरूपाभिवृद्धिं तनोषीति भावः॥ ९. 'पिप्पलः' इत्यर्थः 'क' मातृकायां पुटप्रान्तेऽत्र लिखितः। १०. त्रिमूर्तीनाम्। ११. 'ख' च तव। 'क' 'भुवि निविष्टं (निविद्धं) स्पर्शनं वन्द्य किं ते' इति पाठान्तरमपि दत्तम् । १२. मन्दस्पृश्यता मन्दस्य शनैश्चरस्य वासर एव स्पृश्यता अश्वत्थस्य। दिनान्तरेषु तस्य स्पर्शो निषिद्धः शास्त्रे। मन्दवासर एव तस्मिन् वृक्षे लक्ष्मीर्वसतीत्युक्तम्। तथा च शब्दकल्पद्रुमे पाद्म-उत्तरखण्ड-१३१ तमाध्यायादुद्धृतं वाक्यम्—'अश्वत्थवृक्षमासाद्य सदा लक्ष्मीः स्थिरा भव। × × मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति। अस्पृश्योऽसौ भवेत्तस्मान्मन्दवारं विना किल॥' इति॥

त्वमसि महदनन्तं छेदभेदाद्य[1]योग्ये
विभु च बहु[2] किमुक्त्या शाम्भवी कापि मूर्तिः[3] ।
इति सति बहिरन्तर्यत्त्वया[4]ङ्गीकृतस्स[5]
[6]त्यजति गगन न त्वां[7] प्रागवस्थां घटोऽयम् ॥ ६५ ॥

द्विजपतिरमृतात्मा कोमलोऽपि स्वसारै-
[8]र्न यद् अवति पिपासून् हन्त, कांश्चिद् द्विजान् स्वान् ।
यदपि विनददुग्रं स्वं ददज्जीवितं तान्[9]
अवति मलिनमभ्रं चित्रमेतत्त्वदभ्रम् ॥ ६६ ॥

त्वमसि जगदसुः सन्नुच्चकै[10]र्दीनबन्धुः
कलयसि यदसारं वस्तु हित्वा ससारम्[11] ।
इति सति भवता किं प्रेर्यते वात! वह्नि-
र्यदयमखिलधक् सन्नाशु निःसारदाही ॥ ६७ ॥

---

१. ‘क’ ‘ख’ °त्य° २. ‘क’ ‘बहुलं वहु’ इत्यधिकं लिखितं पुटप्रान्ते। ३. शम्भोरष्टासु मूर्तिषु आकाशोऽप्यन्तर्भवति। ४. ‘ख’ °स्तया ५. ‘क’ तं तद्। ६. ‘क’ ‘गगन किमु न मुञ्चत्यात्मनः प्रागवस्थाम्’ इति पाठान्तरमपि दत्तम्। ७. ‘क’ स्त्वां. ‘ख’ तस्यां। ‘घटाकाश’ इति यथा प्रसिद्धं वेदान्ते उदाहरणं तथा घटस्य अन्तर्बहिश्च आकाश एव वर्तते । घटोत्पत्तेः पूर्वं विनाशात्परं वा सर्वत्र स एव विभुराकाशः। अत एवमुच्यते कविना आकाशस्य एतादृशमहिमविशिष्टस्य यो भावः, यश्च वराकस्य घटस्य स्वप्रागवस्थारूपः, स तादृशीं महिमविशिष्टामवस्थां न त्यजत्येव। यः कोऽपि फल्गुः पुरुषः महति वंशे प्रसूतः, अथवा तादृशेन वंशेन तद्भवेन वा सम्बन्धवान्, स तादृशं संबन्धमात्मनः सदा प्रकटयन्नेव आस्ते इति लोकस्वभावोऽयम् ॥ ८. कमप्येव द्विजं पिपासुं चकोराख्यमवति, न त्वन्यान्। ९. उच्चैः क्रन्दतः प्राणानपि मुमुक्षून् चातकाख्यान् अभ्रं मेघोऽवति, एतद्द्वयमपि अदभ्रं महत् आश्चर्यम्, पक्षपातदोषादिति भावः ॥ १०. ‘क’ ‘जगदसुत्वेऽप्युच्चकैः’ इति पाठान्तरं च दत्तम्। ‘ख’ °सुस्सन्नुच्चकैः ११. ससारस्य वस्तुनो घनत्वात् असारमेव वस्तु वातो धुनोति वहति च। अर्थात्त्वं असारेषु पक्षपाती। एवं सति त्वत्प्रेरितो वह्निस्तु प्रथममसारमेव आशु दहतीति विपरीतं चित्रं च ॥

पटुरसि घट पूर्वं साधनेऽग्नेस्तु[1] पश्चा-
दतिहिमजलवासे नित्यमित्थं तपस्वी[2] ।
तदुचितमिह जन्मन्युच्चपुण्येन सूनुः[3]
चुलकितजलधिस्ते वस्तुतोऽगस्त्य आस्ते ॥ ६८ ॥

निजकरपरिचर्याकारिणि प्रेम पद्मे
वहति यदुदयस्थो भानुमांस्तन्न चित्रम् ।
[4]अभजदपि यदिन्दुः स्वोदयेन प्रमोदं
नयति कुमुदवृन्दं तद्विचित्रं त्वमन्दम् ॥ ६९ ॥

त्वमपि भवसि पात्रं रात्रिभेदा[5]द्विपत्तेः[6]
व्यथयसि किमु कोकौ ; युज्यते वा[7] क्षपेश[8] ।
दिनकरपरितप्तः क्षीणदेहश्च यस्मात्
प्रसभमकरुणाः स्युर्ये नराः क्षीणतप्ताः ॥ ७० ॥

सफलितजनचक्षुः घूकमेकं वराकं
कथमहह विधत्से लोकबन्धो दिनान्धम् ।
सकलतिमिरहर्तु[9]स्तत्र कस्ते प्रयासो
न हि भृतशकटस्था राजिका भारहेतुः ॥ ७१ ॥

---

१. अग्नेःसाधने पञ्चाग्निमध्ये तपसि । आमो घटः प्रथमं अग्नौ ताप्यत इति कृत्वा एवमुक्तम् । २. तप्तस्य घटस्य कुलालेन कमपि कालं जलाधिवासः क्रियते ; अतश्च जलमध्ये तपस्ततः क्रियत इत्युक्तम् । ३. एतादृशतपोद्वयपुण्येन जलधिपानसमर्थः पुत्रः अगस्त्यरूपस्तव जात इत्यर्थः । अगस्त्यस्य कुम्भजत्वादेवमुक्तिः ॥ ४. अभजदित्यस्येन्दुः कर्म; विशेष्यं तु कुमुदवृन्दम् । ५. शुक्लकृष्णभेदात् । ६. क्षयरूपायाः । ७. वा अथवा ; युज्यते युज्यत एव । कुतः ? यस्मात् त्वमेव तप्तः क्षयशीलदेहश्च, तादृशानां च प्रायो दयाराहित्यात् । ८. 'ख' °शः ॥ ९. 'ख' भर्तुः ।

सवितरुदयमिच्छुः[1] प्रागनूरुं विधत्सेऽ-
भ्युदयसहितमेत[2]द्भ्रातरं नैव घूकम् ।
तदिदमवगतं मे येन कार्यं विभूनां
[3]परमपदमवाप्यः स्वं[4] पुनर्नो तदीयाः ॥ ७२ ॥

हरसि तिमिरबन्धं ध्वान्तवैरिन् जनाक्ष्णाम्[5]
उषसि न तदपूर्वं भानिधे ![6] तैजसानाम् ।
तदिह महदपूर्वं पद्मबन्धोऽबलानां
यदखिलमधुपानां पद्मबन्धं भिनत्सि ॥ ७३ ॥

कति कति न हि जाताः कश्यपाद्देवतास्ताः
क्षितिवलयसमुद्यद्यागभागैकजीव्याः ।
जयति तु परमेकः कर्मसाक्षी समक्षो
यदुदयमनु सिद्धैरध्वरैर्देवपोषः ॥ ७४ ॥

तव तनुरवनीशागारसेनाविभूषा
बलमचलभिदे[7]ऽलं कालवद्धीमता[8] च ।
इति करिवर सर्वोदारचिन्तामकिंचि-
त्कर इव चिरमन्तर्मीलिताक्षः[9] किमेषि[10] ॥ ७५ ॥

---

१. 'ख' °मीप्सुः । २. 'क' °मेतं भ्रा° ३. 'ख' 'स' इत्यधिकम्; पदमिदमपेक्षितमप्यध्याहार्यमेव, अन्यथा वृत्तभङ्गात् । ४. 'क' स्वाः 'ख' स्वां । ५. 'क' जपाक्ष्णाम् । ६. 'ख', °धेः । ७. पर्वतभेदनाय । ८. 'क' °द्धीमता 'ख' कोलवद्धीमता । यमवद् भयङ्करत्वमित्यर्थः । ९. 'क' °क्षं । १०. 'क' किमेशि ।

शितितनुरतिगर्जन्वारिवर्षी[१] वरीयान्
[२]मुदिर इति करी ते [३]चातकासौ न याच्यः ।
बत मधुप[४]कुलानां पोषकोऽयं मदान्धो
[५]न तु चिरतृषितानां त्वादृशानां द्विजानाम् ॥ ७६ ॥

कति कति न विरोधिव्याधवाक्याभिधाव-
त्पिशुनशुनकदन्तैरङ्कितांङ्गाः कुरङ्गाः ।
स तु जयति कुरङ्गः कोऽपि[६] भूपोत्तमाङ्गेऽ-
र्हति पदमदरिद्रो यन्मदः[७] सौरभेण[८] ॥ ७७ ॥

परिहर गिरिशत्रोः[९] पत्रवैरं[१०]हरे[११] चेद्
[१२]गिरिवनचर ! वाञ्छा जीविते तेऽन्यथा तु ।
कुपितकुलिशपातात्त्वं वनं पर्वतश्च
क्व नु[१३] ननु बलवद्भिः स्पर्द्धनं नैव वृद्धयै ॥ ७८ ॥

[१४]धवलिमहरिनाम्नोर्योग्यभावाद्विधोः[१५] त्वं
सुहृदिति जहि राहुं ध्वान्तमैत्र्या[१६]स्य शत्रुम् ।
तम इति शिति चेति प्राप्तया साम्ययोगात्;
न कुरु मृगपतित्वात्सिंह ! हिंसां पशूनाम् ॥ ७९ ॥

---

१. हस्तद्वारा शीकरासारकारी । २. मेघः । ३. चातक इति सम्बुद्धिः । ४. मधुपा अलयः, सुरापायिनश्च ५. 'क' ननु । न तु पोषक इत्यर्थः । ६. कस्तूरीमृग इत्यर्थः । ७. कस्तूरीरूपः । ८. सौरभेण अदरिद्र इत्यन्वयः । ९. इन्द्रस्य । १०. पत्रं वाहनं मेघः । गर्जन्तं मेघं सिंहः स्पर्धयानुगर्जति हि । ११. सिंह । अत्र 'क' मातृकायां कोश उदाहृतः—"यमानिलेन्द्रचन्द्रार्कविष्णुसिंहेषु (हांशु)वाजिषु" इत्यमर इति । १२. गिरीत्यादि सिंहस्य विशेषणम् । १३. सर्वं नश्येदित्यर्थः । १४. धवलिम्नः हरिनाम्नश्च योगात् । १५. 'ख' विभोः । विधोः चन्द्रस्य । १६. ध्वान्तेन मैत्र्या, राहोरिति शेषः । 'तमस्तु राहुः' इति तस्य नाम्न एव तत्सिद्धेः । तदेव प्रपञ्च्यते तृतीयपादेन तम इति इत्यादिना । अस्य चन्द्रस्य शत्रुं राहुम् ।

प्लवग ! समुचितं तद्धान्यमुष्टिश्लथत्वे
  यदतिकृपणता[1] ते बन्धने प्रस्तुतेऽपि ।
[2]पशुरुत नर इत्थं वानरत्वं तु तेषा-[3]
  मपि विपदि हि तेषां (येषां) बद्धमुष्टित्वमर्थे ॥ ८० ॥

भवति समगुणानां मत्सरित्वं युवां तु
  [4]प्रतिगतिकलहौ स्तः सिंहहंसौ सवर्णौ ।
[5]स्थिरगतिविलसन्तौ मौक्तिकोदारगेहौ[6]
  रजतललितदेहौ देवतावाहने[7] च ॥ ८१ ॥

करभ सरभसत्वेऽप्युच्चलत्वं गतौ ते
  वचसि च कठिनत्वं चारुता न प्रतीके[8] ।
तदपि तव तु गर्वात्कन्धरोच्चेयती[9] चेत्[10]
  किमपि ललितता स्यात्सा विभिन्द्याद्धत द्याम्[11] ॥ ८२ ॥

---

१. वानरान्योक्तिः । कपेर्हि अयं स्वभावः यद्यद् हस्त आदीयते तद् अतिदृढं धत्त इति । श्लथत्वे कृपणता धारणे दृढतेत्यर्थः । २. पशुः उत नरः इति पदच्छेदः । 'क' पशभृत ३. 'क' येषाम् । ये दृढबद्धमुष्टयो न किमपि हस्तगतं मुमुक्षन्ति, ते हि वानरमुष्टय इत्युच्यन्ते ॥ ४. प्रतिपदम् । सवर्णौ प्रायो धवलवर्णौ ; किञ्च स्वनाम्नश्च 'स, ह'-वर्णाभ्यां घटितत्वात् सवर्णौ । ५. गतिविलासवर्णने पुरुषस्य स्त्रियश्च सिंहो हंसश्च उपमानभूतौ । ६. सिंहपक्षे तद्धतगजानां मस्तकात्तत्पादलग्नानि मौक्तिकानि तद्गेहे गुहायां कीर्णानि भवन्तीति सङ्गतिः । हंसपक्षे मौक्तिकोदाराणि सरोमात्रे वा मानससरसि वा श्वेतपद्मानि पुण्डरीकाख्यानि तद्गेहीभवन्तीति निर्वाहः शक्यः । ६. देव्याः सिंहो वाहनं, ब्रह्मणो हंसश्च ॥ ८. 'अङ्गं प्रतीकोऽवयवः' इति 'क' मातृकायाम् । ९. इयती उच्चा कन्धरा इत्यन्वयः । १०. स्याच्चेदित्यन्वयः । अत्र 'क' मातृकायां 'ते' इत्यपि पाठान्तरं दत्तम् । ११. आकाशमेव भेत्स्यतीत्यर्थः ।

यदहमखिलसैन्ये दुन्दुभेः पात्रमित्थं[1]
जहिहि करभ! गर्वं सर्वभावैरवद्यम्[2]।
सुललितपृतनायां लोकदृग्दोषहत्यै
बत नरपतिना त्वं तद्ध्वनिख्यापितोऽसि[3] ॥ ८३ ॥

गुणसुरभिसुरभ्याः सूनुता सूनृता सा
गुरु च गिरिशपत्रं[4] ते सगोत्रं पवित्रम्[5]।
[4]विविधवि'वधसिद्धौ साधनं देहिनां त्वं
वद तदपि किमुक्षन्! काङ्क्षसे शृङ्गधूत्या[5] ॥ ८४ ॥

भवतु मदुपकारो जीवलोके कथंचि-
न्न तु सुरभुजगानां लोकयो[6]र्दृश्यते सः।
[7]जनुरनुचितमेव प्राणिनः पङ्क्तिभेत्तु[8]
र्वृष किमपरितोषेणेति शीर्षं धुनोषि ॥ ८५ ॥

कुचयुग! कृतमुक्ताहारकर्पूरगौर
त्वयि धवलगरुत्त्वं[9] न त्विदानीं कुचत्वम्।
इह न बिभिहि नीरक्षीरभेदापटुत्वेऽ-
त्यनुरजति हि बाह्याडम्बरेणैव लोकः ॥ ८६ ॥

---

१. दुन्दुभिवाद्यं हि प्रायः करभोपरि वाद्यते। २. दुष्टम्। ३. तद्ध्वनिना दुन्दुभिताडनध्वनिना ख्यापितोऽसि दृष्टिदोषहरणार्थमग्रे चाल्यस इति। ४. शिववाहनम्। त्वत्सगोत्रः कश्चन पुण्य उक्षा महेशस्य वाहनम्। ४. अत्र 'क' मातृकायां कोशः 'पर्याहारश्च मार्गश्च वीविधौ विविधौ च तौ' इति; अनेकविधवीवधसंपादने इत्यर्थः। ५. शृङ्गधूननमप्रीत्यसन्तुष्टिसूचकमिति कृत्वैवं कवेः प्रश्नः। ६. देवनागलोकयोः। ७. 'जनुर्जननजन्मानि' इति 'क' मातृकायामधिकम्। ८. पंक्तिभेत्ता पंक्तिदूषकः पापी। अन्यत्र पङ्क्तिः पृथिवी, तस्या वृषेण स्वखुरविषाणैः भेदः क्रीडयाऽन्यथापि क्रियते। ९. अत्र 'क' मातृकायां 'हंसाश्च श्वेतगरुत' इत्यधिकम्। त्वयि गौरत्वेऽपि न हंसत्वं, किन्तु कुचत्वमेव।

प्रियपरिचयकाले कञ्चुकीं मुञ्चसे किं
कुचयुग! बहुमूल्यं [1]ते यदाच्छादितत्वात् ।
उचितममृदुभावादन्यमर्माविधस्ते[2]
यदुपकृतिकृतामप्यस्मृति[3]र्भाग्ययोगे ॥ ८७ ॥

नयन सरलभावो नायिकाभावबोधे
तव युवनिवहे[4] किं वक्रता पीडनाय ।
इदमपि घटते यद्वक्रतां प्रेक्ष्य कोऽपि
व्रजति मलिनसङ्गादङ्गनाङ्गत्वतश्च[5] ॥ ८८ ॥

[6]अघटितमतिदन्ताः सत्यपूर्वे द्विजत्वे
इह हसितवशाद्यन्मर्म[7] भिन्दन्ति नृणाम् ।
तदुचितमपि तेषां रागिणो द्वेष्यमुक्ता
युवतिवदनभाजोऽनारतं ये तु तीक्ष्णाः ॥ ८९ ॥

---

१. 'क' नेय० । २. 'ख' तद् । ३. 'क' कृत्वे मध्यस्थिति । कुचयुगस्य कठिनत्वात् परमर्मघट्टकत्वाच्च उपकारकृतः, मूल्यं बहुलीकुर्वतः कञ्चुकस्य, अस्मृतिः परित्यागः, भाग्ययोगे प्रियपरामर्शरूपे सति उचितमेव ॥ ४. "'समूहनिवहव्यूह' इत्यमरः" इति 'क' मातृकायाम् । ५. कोऽपि प्रेक्ष्य मलिनसङ्गात् कृष्णवर्णस्य तव नयनस्य सङ्गात् अङ्गनाया अङ्गत्वतश्च तस्या अधीनत्वतश्च वक्रतां व्रजति दुष्यतीत्यर्थः ६. अत्यन्तमयुक्तमित्यर्थः । ७. अथवा उचितमेव तत् तेषां दन्तानां, ये रागयुक्ताः, मुक्ताफलेभ्यः मुक्तेभ्यः अर्थाद् ज्ञानिभ्यो ये द्वेषिणः ; युवतिवदनभाजः चुम्बनक्रियायाम् ; तीक्ष्णाः तादृशाग्रभागाः दशनकर्मयोग्याश्च ॥

सहजगुणपिधायी[1] द्वन्द्वजाते समानः[2]
[3]सदवधिरधिमुक्तासक्तताराजमानः[4] ।
अतिशुचिरबलायाः कण्ठसङ्गेऽपि[5] हार !
त्वमसि जगति साधुर्दर्शनात्खेदहारः ॥ ९० ॥

[6]अवति मुखमनेकान्[7] रागितीक्ष्णान्द्विजां[8]स्तु
[9]द्विजपतिममुमेकं द्वेष्टि शुद्धं मृदुं[10] यत् ।
तदुचितमतिलक्ष्मीराजितत्वेन तस्य
प्रविदधति न युक्तायुक्तचिन्तां रमाढ्याः ॥ ९१ ॥

भृशमवगणितैणीहङ्निवासे वरेण्ये
कमितुरुरसि शेषे केन पुण्येन वीणे ।
भवदनुरणिताति[11]प्रीणितप्राणिदत्ता-
शिषमनिशमुपैषीत्येष हेतुर्मतोऽत्र ॥ ९२ ॥

दिशि दिशि विलसन्ति स्फारकासारभारा
बककुलजलकाकाहारशम्बूक[12]पूर्णाः ।
[13]सितगरुदुपभुक्तोन्मुक्तमुक्तौघयुक्तं[14]
मदयति तदपीदं मानसं मानसं मे ॥ ९३ ॥

---

१. अन्तर्ग्रथनार्थकगुणस्य पिधायकः अप्रकाशकः ;; स्वगुणाविष्कृतिर्दोषो भवति हि । २. द्वन्द्वसञ्जाते कुचद्वये समानः । अन्यत्र द्वन्द्वभावो वैरम् ; तद्वतोर्मध्ये समानः । ३. सदवधिः अन्ते तरलादियोजनया साधुः शोभन इत्यर्थः । अन्यत्रा-साधूनां गतिरिति । ४. मुक्ताफलयोगाद्राजमानः । ५. स्त्रीसङ्गेऽपि अतिशुचिरिति ॥ ६. इयं मुखान्योक्तिः । ७. 'क' °नेका । ८. दन्तान् । ९. चन्द्रम् ; अर्था-च्चन्द्रात्सुन्दरतरम् । १०. 'क' मृदं । ११. 'ख' °पि । १२. अत्र 'क' मातृकायां 'शम्बूका जलशुक्तय' इति कोशः । १३. सितगरुतो हंसाः । १४. मानसे याः शुक्तयः तत्रान्तर्मुक्ताफलानि सन्तीति कृत्वा एवमुक्तम् ।

विलसति कमलायाः सत्करे यत्प्रसूनं
    व्रजति च[1] ललनानामाननस्योपमात्वम् ।
जनयति च जनेशं[2] सर्जनादौ किमन्यत्
    कमलिनि! तुलनां ते तल्लता[3] का[4] प्रयातु ॥ ९४ ॥

[5]मधुकरनिकरस्य स्वै रसै[6]रप्रमेयैः
    कमल! विमल पोषं दोषमूलं करोषि ।
यदयमपरनारीरात्मगीतैर्विगीतै-
    स्त्वरयति रतिहेतोर्भिन्नसेतुः सतीनाम् ॥ ९५ ॥

स्थलकमल! वरत्वं ते जलाज्जन्म यन्नो[7]
    पतितमपि रजस्ते मारुतेनोह्यते[8] च ।
सततमधिगतिस्ते यस्य कस्याप्ययत्नाद्
    दृढमिति जलजत्वान्नैव धन्यं त्वदन्यत् ॥ ९६ ॥

परिमलमकरन्दैर्वृन्दमिन्दीवराणा-
    मपुषमिदमिदानीमीदृशी मे दशेति[1] ।
कुमुद! न कुरु खेदं नन्दते सर्वदा को
    यदुदयसुदशः[2] त्वं सोऽपि दीनो यदिन्दुः ॥ ९७ ॥

---

१. 'ख' कलयति । २. प्रजापतिम् । ३. 'क' का लता । ४. 'क' तत् । ५. अत्र 'क' मातृकायमधिकतया पुटप्रान्ते कोशो दत्तः 'भ्रमरे "चञ्चरीकभसलेन्दिन्दिर-रोलम्बा देश्याः" (इति) क्षीरस्वामी' (अमरव्या° २.५.३०) इति । ६. मधुरूपैः । ७. यत्ते जलात् न जन्म, किन्तु स्थलादेव ततो वरत्वं ते; जलजातकमलापेक्षया । ८. 'क' °नोचिछते, नोद्धिते । ९. 'क' दृशेति । १०. 'क' 'ख' °दश ।

अयि पिक ! सुसमृद्धं याहि माकन्दबन्धुं
श्रितमपि तमनेकैराश्व[1]नाकारितोऽपि ।
विलसति न विना त्वां पञ्चमालापिनं स
त्वमपि न हि विना तं राजसे वृक्षराजम् ॥ ९८ ॥

शुककरटकपोताः कोकिलश्चैककालं
कलकलमनुवेलं कुर्वतां वा रसाले ।
स्थगयतुमतिभूयान्[2]मन्द्र[3]मध्ये तु तारं
यदपि सपदि[4] नादे तारतम्यं स्फुटं स्यात् ॥ ९९ ॥

कलकलमपनीय स्वीयमाकर्णयध्वं
मधुमधुरगलाच्चत्कोकिलालापमत्र[5] ।
[6]कलरवकलविङ्काः सद्रसालप्रसादात्
फलितमलिक[7]पट्टोदारलेखेन वोऽद्य ॥ १०० ॥

अनुवनमिह को मत्पञ्चमालापसारं
रसयतु सरलात्मा खिद्यसे किं पिकेति ।
[8]ध्वनितनुरनुरागाधीङ्गदुर्गो गिरं ते
कलयति सकलात्मा साधुतुष्टोऽष्टमूर्तिः ॥ १०१ ॥

---

१. आशु अनाकारित इति च्छेदः । २. मन्द्रमध्ये स्थायिनी स्थगयितुं स कलकलः अति उच्चैः भूयाद् इत्यर्थः । ३. 'ख' मध्य° । ४. 'ख' तदपि । ५. 'ख' °मात्रम् । ६. अत्र 'क' मातृकायां कोशः 'पारावतः कलरवः' इति । 'ललाट-मलिकं गोधिः' इति 'क' मातृकायामधिकम् । ७. 'ललाटलिखितेन अर्थाद्दैवादिदमेवं भवतीत्यर्थः ॥ ८. नादतनुः शिव· ।

सकल[1]कलकुलोद्यत्सोमनाथाणुमेधा[2]-
गुणविहितशतोक्तान्योक्तिमुक्तावलीयम् ।
अधिगलमनुधार्या साधुभिः शुद्धबुद्धै-
रधिकममलयित्वा स्वप्रसादो[3]दकेन ॥ १०२ ॥

॥ इति श्रीसकलकलकुलालंकार[णक][4]
सोमनाथ[5] विरचिता[6]न्योक्ति-
मुक्तावलीयं समाप्ता[7] ॥

---

१. 'क' कलोद्यत्° २. अणुरूपो मेधागुणः । ३. 'ख' कानिचिदक्षराणि लुप्तानि । ४. 'ख' सकलकुलोपनामसकलकलापण्डितताराराण° ५. 'क' सोमेश्वर°। ६. 'ख' कृता°। ७. 'ख' °तिमिता ॥

॥ चारुचर्या[1] ॥

॥ श्रीभोजराजप्रणीता ॥

सुनीतिशास्त्रसद्वैद्यधर्मशास्त्रानुसारतः ।
विरच्यते चारुचर्या भोजराजेन[2] धीमता ॥ १ ॥

(अथ शौचविधिः, दन्तधावनं च)

ब्राह्मे मुहूर्त उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्वर्त्य कृतशौचविधिस्ततः ॥ २ ॥

प्रातरुत्थाय विधिना कुर्याद्दन्तप्रधावनम् ।
वाग्यतः पुण्यकाष्ठेन अत(ध ?) ऊर्ध्वं क्रमेण तु ॥ ३ ॥

'आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते' ॥ ४ ॥[3]

---

१. अस्याः दश मातृका विदिताः, आसु च सप्त सुलभाः । अत्र मद्रास्‌शासकीयहस्तलिखितकोशागारस्थां D. 13269, 13265 संख्याङ्किते मातृके(म, म२), मैसूर् ओरियण्टल् इन्स्टिटयूट् संग्रहे वर्तमानां मातृकां(मै) चालम्ब्य सम्पादितोऽयं ग्रन्थः । पश्चान्निर्दिष्टायां मातृकायां चारुचर्याग्रन्थो विपुलो दृश्यते ; तन्मध्ये १८१-१९२ तमेषु पृष्ठेषु दृश्यतेऽत्र दत्तो भागः । मद्रास् D. 13265 मातृकायां प्रायः ६०० श्लोकवानयं चारुचर्या-ग्रन्थो दृश्यते । एवं च चारुचर्या-ग्रन्थः लघुः, मध्यमो, बृहन्निति त्रिविधपरिणाहो दृश्यते । अत्र लघुः ग्रन्थः संपादितो वेदितव्यः । मद्रास् D. 13265-मातृकातः समानभूतेषु भागेषु दृश्यमानाः केचन पाठभेदाः 'म२' संकेतेन दत्ताः । 'मै'-मातृकासंवादे साह्यार्थं मै. इन्स्टिटयूट-निदेशको डा० मरुलसिद्धय्यो धन्यवादार्हः ॥ २. मै. भूपेन । ३. इति दन्तकाष्ठादानकृते वनस्पतिं प्रति प्रार्थना ।

[1]सर्वे कण्टकिनः पुण्याः क्षीरिणश्च[2] यशस्विनः ।
आम्ल(म्र)पुन्नागबिल्वानामपामार्गशिरीषयोः ।
कटुतिक्तकषायाश्च घनारोग्यसुखप्रदाः ॥ ५ ॥

दशाङ्गुलं तु विप्राणां क्षत्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलं तु वैश्यानां शूद्राणां सप्तसंमितम् ।
चतुरङ्गुलमानं तु नारीणां तु न संशयः[3] ॥ ६ ॥

उदङ्मुखः प्राङ्मुखो वा दन्तधावनमाचरेत् ।
दक्षिणेन तथा क्रौर्यं पश्चिमेन पराजयम् ।
पूर्वस्यामुत्तरस्यां च कुर्वन्[4] कामानवाप्नुयात् ॥ ७ ॥[5]

चतुर्दश्यष्टमी दर्श(:) पूर्णिमा सङ्क्रमो[6] रवेः ।
एषु स्त्रीतैलमांसानि दन्तकाष्ठं च वर्जयेत् ॥ ८ ॥[7]

सर्जे धैर्यं वटे कीर्तिः करञ्जे विजयो रणे ।
जातौ चैवार्थसम्पत्तिः बदर्यां मधुरस्वरः ॥ ९ ॥ [8]

खदिरे चैव सौन्दर्यं बिल्वे तु विपुलं धनम् ।
शाल्मल्यश्वत्थभव्यानां धवकिंशुकयोरपि ॥ १० ॥

कोविदारशमीपीलु[9]श्लेष्मातकविभीतकान् ।
वर्जयेद् दन्तकाष्ठं तु गुग्गुलुं क्रमुकं तथा ॥ ११ ॥[10]

---

१. वृक्षा इति शेषः । २. 'म', 'म'-°रिण्यश्च । ३. 'म' निर्णयः । 'नारीणामिति निर्णयः' इति समीचिनः पाठः स्यात् । अयं श्लोकः गर्गस्येति स्मृतिमुक्ताफले ॥ ४. 'मै'-सर्वान् । ५. अयं श्लोकः कात्यायनस्येति स्मृ. मु. फ. ॥ ६. 'म'-°मा । ७. इदं वाक्यं यमस्येति स्मृः मु. फ. । ८. इदं गर्गस्येति स्मृ. मु. फ. । ९. 'म' अत्र ग्रन्थलोपः । १०. इदं मार्कण्डेयवाक्यमिति स्मृ. मु. फ. ।

उदुम्बरे वाक्यसिद्धिः बन्धूके च दृढा श्रुतिः ।
आम्ले(म्रे) कीर्तिश्च सौभाग्यं कदम्बे[1] सिद्धिरुत्तमा || १२ ||

गुवाकतालहिन्तालाः केतकी च महावटः ।
खर्जूरी नारिकेलश्च सप्तैते तृणराजकाः[2] || १३ ||

तृणराजसिरापत्रैर्यः कुर्याद्दन्तधावनम् ।
तावद्भवति चण्डालो यावद्गङ्गां न पश्यति || १४ ||

भल्लातकीदेवदारुमदयन्तीक्षुवालुकैः ।
तृणाङ्कुल्यश्मलोहाद्यैः शत्रुभ्यः साध्वसं जगुः || १५ ||

हरीतकीविघ्ननागकेतकोद्दालतापसैः ।
कार्पासार्द्रकवाकूचीबलाश्लेष्मातकैर्गदः || १६ ||

पलाशाश्वत्थजम्बीरमातुलुङ्गकपित्थकैः ।
अगस्त्यतालहिन्तालकुशकाशै[3]स्तथा निशा || १७ ||

तिन्त्रिणीकशमीवेणुशुद्धामलक[4]वञ्जुलैः ।
विकङ्कतव्याघ्रपादसंज्ञवृक्षैर्यशःक्षयः || १८ ||

यो हि[5] गण्डूषसमये तर्जन्या वक्रचालनम् ।
यदि कुर्वीत मूढात्मा नरके पतति ध्रुवम् || १९ ||

---

१. 'म' करञ्जे । २. 'म', 'मै' प्रथमार्धमस्पष्टम्, लुप्ताक्षरं च । पारिजाते दत्तोऽयं श्लोक इति स्मृ. मु. फ.; तत्रैव स्मृत्यन्तरवाक्यं चैतत्समानं दत्तम्—'तृणराजाह्वयस्तालो नारिकेलश्च लाङ्गली । खर्जूरः केतकी पूगो हिन्तालश्च महावटः ॥' इति ॥ ३,४. 'म' अक्षरपातः । ५. 'म' वा ।

[1]नाद्यादजीर्णवमथुश्वासकासज्वरार्दितः[2] ।
तृष्णास्यपाकहृन्नेत्रशिरःकर्णामये च तत्[3] ॥ २० ॥

मध्याह्नस्नानवेलायां यः कुर्याद्दन्तधावनम् ।
निराशास्तस्य गच्छन्ति देवताः पितृभिस्सह[4] ॥ २१ ॥

अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैः मुखशुद्धिर्भविष्यति[5] ॥ २२ ॥

जिह्वानिर्लेखनं कार्यं सौवर्णं ताम्रमेव वा ।
तन्मलापहरं शस्तं मृदुश्लक्ष्णं षडङ्गुलम्[6] ॥ २३ ॥

पित्तश्लेष्महरं मेध्यं[7] नैर्मल्यं चक्षुषोर्हितम् ।
[8]श्रोत्रनासा विशुद्ध्यन्ते[9] नराणां दन्तधावनात् ॥ २४ ॥

(स्नानविधिः)

पुण्यनिर्मलतोयेन पादौ प्रक्षाल्य वाग्यतः ।
मलापकर्षणार्थाय स्नानं कुर्यात्प्रयत्नतः ॥ २५ ॥

उष्णाम्बुनाधःकायस्य परिषेको बलावहः ।
तेनैव चोत्तमाङ्गस्य बल[10]हृत्केशचक्षुषोः ॥ २६ ॥

स्नानमर्दितनेत्रास्य कर्णरोगाति[11]सारिषु ।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥ २७ ॥

---

१. ‘म’ अक्षरपातः । २. ‘म’ °ज्वरादिषु । ३. तत्, दन्तकाष्ठमित्यर्थः । ४. अयं श्लोकः पाठभेदेन पाद्मात् क्रियायोगसारादिति शब्दकल्पद्रुमे । ५. शौनकस्येति स्मृ. मु. फ., नृसिंहपुराण इति नित्याचारप्रदीपे । ६. शब्दकल्पद्रुमे विनाकरमुद्धृतोऽयं श्लोकः ; तत्र ‘कार्य’ मित्यत्र ‘रौप्यम्’ इति, ‘ताम्रम्’ इत्यत्र ‘वार्क्षम्’ इति ‘षडङ्गुलम्’ इत्यत्र ‘दशाङ्गुलम्’ इति च पाठः । ७. ‘म २’ नित्यम् ‘मै’ रुच्यम् । ८. ‘म’ ‘मै’ श्रोत्रनाड्यः । ९. ‘म २’ विशुद्ध्यै च । १०. ‘म’ ‘मै’ बलाद् । ११. ‘म’ नेत्राभ्यां

स्नानास्यानन्तरं[1] सम्यग्वस्त्रेणोद्वर्तयेत्तनुम् ।
कान्तिदं च शरीरस्य कण्डूत्वग्दोषनाशनम् ॥ २८ ॥

पिटकाद्यङ्ग[2]दोषघ्नमुद्वर्तनमुदाहृतम् ।
भूमेः समुद्धृतं पुण्यं ततः प्रस्रवणोदकम् ॥ २९ ॥

ततोऽपि सारसं पुण्यं तस्मान्नादेयमुत्तमम् ।
तीर्थतोयं ततः पुण्यं गाङ्गं[3] पुण्यं च सर्वतः[4] ॥ ३० ॥

रूपं तेजो बलं कान्तिश्शौचमाप्यायनं तनोः ।
दुःस्वप्ननाशनं पुण्यं स्नानमायुष्यवर्धनम् ॥ ३१ ॥

अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।
स्रवत्येव दिवा रात्रौ प्रातःस्नानेन शुध्यति ॥ ३२ ॥

(सन्ध्योपासनादि)

कुलाचारं ततः कुर्यात्संध्योपासनमादितः ।
सूर्योपास्तिं ततः कुर्यात्सर्वरोगा[5]पनुत्तये ॥ ३३ ॥

(पुण्ड्रधारणम्)

केशानां निचयं कुर्यात्कस्तूरीमनुलेपयेत् ।
सुगन्धीनि सुपुष्पाणि नित्यं शिरसि धारयेत् ॥ ३४ ॥

केशक्लेद[6]समुद्भूतस्वेददुर्गन्धनाशनम् ।
चक्षुष्यं दाहशमनं सौमनस्यस्य धारणात् (णम्) ॥ ३५ ॥

जीवाद्याविद्ध[7]केतक्याः कोमलं धारयेद्दलम् ।
जातीं कुन्दं च नेपालं श्रीकण्ठं गिरिमल्लिकाम् ॥ ३६ ॥

---

१. 'म' मै स्नानानन्तरकं २. 'म' 'मै' पिटकव्यङ्ग ३. 'म', 'मै' गङ्गा । ४. इदं मार्कण्डेयवाक्यमिति स्मृ. मु. फ. ५. 'म' दोषा° ६. 'मै' क्लेश । ७. 'म' लिप्त°

मकरन्देन संयुक्तं शिरसा धारयेन्नरः ।
मलिने मल्लिका धार्या निर्मले जातिपाटले ॥ ३७ ॥

अभ्यङ्गे केतकी धार्या चोत्पलं सततं धरेत्[1] ।
सर्वाण्येतानि शीतानि रसतो वीर्यत[2]स्तथा ॥ ३८ ॥

त्रिदोषशमनं श्रीमान्[3] धर्मकाले प्रधारयेत् ।
केतकी बकुलं पुष्पं श्रीखण्डं शतपत्रकम् ॥ ३९ ॥

श्रीपर्णं चम्पकं पुष्पं वातश्लेष्महरं परम् ।
उष्णवीर्यं वातनाशं शीतकाले प्रधारयेत् ॥ ४० ॥

ह्रीबेरं मरुवं चैव नीलोत्पलसुचम्पकौ ।
कुरवं पाटलं चैव[4] करवीरं तथैव च ॥ ४१ ॥

नात्युष्णं न च वा शीतं सर्वदोषनिबर्हणम् ।
निर्मलं नेत्र[5]दोषघ्नं वर्षाकाले प्रधारयेत् ॥ ४२ ॥

मुहूर्तं जातिकुसुमं नेपालं चोत्पलं[6] तथा ।
त्रिरात्रमुत्पलं चैव पंचरात्रं तु केतकी ॥ ४३ ॥

द्विरात्रं शतपत्रं[7] च अर्धरात्रं तु मल्लिका ।
अहोरात्रं चम्पकं तु यूथीपुष्पं[8] तथैव च ॥ ४४ ॥

---

१. 'मै' वहेत् । २. म °वत् । ३. ४. ५. पदमिदं लुप्तम् । ५, ६. 'म' अक्षरद्वयं लुप्तम् । ७. 'म' अक्षरत्रयपातः । ८. 'म' पदं लुप्तम् ।

श्रीकण्ठमेकरात्रं च बकुलं माधवी तथा ।
अहरेकं तु श्रीपर्णं पुण्यवारं[1] निधारयेत् ॥ ४५ ॥

मन्दारं मरुवं चैव करवीरं तथैव च ।
यावत्कालं वहेद्गन्धं तावत्कालं च पाटली ॥ ४६ ॥

त्रिदोषशमना जाजी महादाह[2] विनाशिनी ।
सुगन्धं दोषशमनं कोटरं पुष्पमुच्यते ॥ ४७ ॥

पित्तहृद्विशदं शैत्यं चक्षुष्यं चोत्पलं तथा ।
श्लेष्मवातप्रशमनमुष्णभावं च निर्मलम् ॥ ४८ ॥

पुष्पाणां प्रवरं श्रेष्ठं केतकीपुष्पमुच्यते ।
ईषदुष्णं सुशीतं च सुगन्धं पुष्टिदायकम् ॥ ४९ ॥

शिरोभ्रमविनाशं च शतपत्रं सुशोभनम् ।
आघार्यं मल्लिकापुष्पं दृष्टिहानिर्न[3] जायते ॥ ५० ॥

चम्पकं वातशमनं चक्षुष्यं विशदं शुभम् ।
पाटलं च महाशीतं श्लेष्मवातप्रवर्धनम् ॥ ५१ ॥

मन्दारं पित्तदोषघ्नं कर्णबाधिर्यनाशनम् ।
पाटलं धारयेद् यस्तु मरुवेण समन्वितम् ॥ ५२ ॥

ज्वरमूर्छामवातघ्नं चक्षुष्यं दाहनाशनम् ।
हेमन्ते शिशिरे चैव शतपत्रं तु शोभनम् ॥ ५३ ॥

वसन्ते केतकी धार्या घर्मे नेपालमालती ।
वर्षे श्रीकण्ठपाटल्यौ शारदे चम्पकं वहेत ॥ ५४ ॥

---

१. 'म'-रं 'मर' वासं २. 'म' पाप° ३. 'मै' °निस्तु

रक्तोत्पलं सर्वकालं भवेद्[1] लक्ष्मीविवृद्धये ।

(गन्धधारणम्)

कुङ्कुमं[2] चन्दनं चैव तथागरुविमिश्रितम् ॥ ५५ ॥

उष्णभावमिदं[3] श्रेष्ठं शीतकाले तु लेपयेत् ।
चन्दनं चेन्दुना युक्तं कस्तूर्या सह मिश्रितम् ॥ ५६ ॥

सुगन्धं च सुशीतं च घर्मकाले प्रधारयेत् ।
चन्दनं घुसृणोपेतमीषत्कस्तूरिकायुतम् ॥ ५७ ॥

न चोष्णं न च वा शीतं वर्षाकाले प्रधारयेत् ।
आदौ चोद्वर्तयेद्गन्धं पश्चाद्गन्धं प्रलेपयेत्॥ ५८ ॥

(वस्त्रधारणम्)

शीतकाले तु कौशेयं कषायं घर्मवासरे ।
वर्षासु शुक्लवस्त्रं स्यात् त्रिधा[4] वस्त्रस्य धारणम् ॥ ५९ ॥

कौशेयं चित्रवस्त्रं च रक्तवस्त्रं तथैव च ।
[5]वातश्लेष्महरं नृणां शीतकाले तु धारयेत् ॥ ६० ॥

मध्यं सुशीतपित्तघ्नं काषायं वस्त्रमुच्यते ।
तद्धारयेद्धर्मकाले काषायं वस्त्रमुत्तमम् ॥ ६१ ॥

शुक्लं सुशीतलं चैव शीततापनिवारणम् ।
न चोष्णं न च वा शीतं शुक्लं वर्षासु धारयेत् ॥ ६२ ॥

मलिनं परवस्त्रं तु स्त्रीवस्त्रं तु तथैव च ।
खण्डं च मूषकैर्विद्धमग्निदग्धं च वर्जयेत् ॥ ६३ ॥

---

१. 'मै' धरेत् २. 'म' 'मै' कुसुमं ३. 'म' उष्णकाले **दमनम्(?)**
४. 'म' पदं लुप्तम् । ५. 'म' प्रथमं पदं लुप्तम् ।

मलिनं न शिवं तत्तु कण्डूत्वग्दोषकारणम् ।
सुकृतस्य फलं नास्ति परवस्त्रस्य धारणात् ॥ ६४ ॥

कार्यहानिर्दुर्बलत्वं[1] स्त्रीवस्त्रेण प्रजायते ।
खण्डवस्त्रे वसेज्ज्येष्ठा तस्मात्तत्परिवर्जयेत् ॥ ६५ ॥

भयदं मूषिकैर्विद्धं दग्धेन च मृतिर्भवेत् ।
तस्मात्सर्वप्रयत्नेन शोध्यवस्त्रं प्रधारयेत् ॥ ६६ ॥

सुहृत्सु शुभदं चैव दर्शनेन प्रजायते ।

(रत्नादिधारणम्)

रत्नानि देवतातुष्ट्यै भूषणान्यपि धारयेत् ॥ ६७ ॥

आदित्ये पद्मरागं च सोमे मुक्ताफलं तथा ।
मङ्गले विद्रुमं चैव बुधे मरकतं तथा ॥ ६८ ॥

गुरौ तु पुष्यरागं च भार्गवे वज्रमुत्तमम् ।
मन्दे तु नीलमित्युक्तं राहोर्गोमेदकं तथा ॥ ६९ ॥

केतोर्वैडूर्यमित्युक्तं क्रमाद्रत्नस्य लक्षणम् ।
लोहो रजतहेमन्नौ[2] ताम्रं कास्यं च पंचकम् ॥ ७० ॥

स्त्रीशूद्रवृद्धघाती च तथा गोब्रह्मघातकः ।
सर्वपापविनिर्मुक्त्यै पंचलोहस्य (हादि?) धारयेत् ॥ ७१ ॥

(तर्पणम्)

धर्मसंग्रहणं कुर्याद्दानतीर्थोपवासकैः ।
स्वबन्धुपितृदेवानां[3] ब्राह्मणानां च तर्पणम् ॥ ७२ ॥

---

१. 'म'-लं च २. 'म' हेमेन ३. 'म' पदद्वयं लुप्तम्

स्वर्ग्यं यशस्यमायुष्यं सर्वपापहरं शुभम् ।
देवब्राह्मणबन्धूनां तर्पणेन प्रजायते ॥ ७३ ॥

(अष्टमङ्गलवीक्षणम्)

ततो भोजनवेलायां कृताचारस्सदात्मवान् ।
देवान् पितॄन् समभ्यर्च्य कुर्यान्मङ्गलवीक्षणम् ॥ ७४ ॥

लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
सुवर्णं सर्पिरादित्य आपो राजा ततोऽष्टमः ॥ ७५ ॥

एतानि सततं पश्येन्नमस्येद[1]र्चयेद्यथा ।
प्रदक्षिणं च कुर्वीत आयुर्वर्धनमुत्तमम् ॥ ७६ ॥

(भोजनम्)

पत्नीविहितशृंगारं प्राप्य भोजनमन्दिरम्[2] ।
यथाऽचाग्नि[3]बलं वीक्ष्य भोजनं कारयेद्बुधः ॥ ७७ ॥

एक एव न भुंजीत यदीच्छेत्प्रियमात्मनः ।
भोक्तुकामश्च धातुश्च क्रोधवानपि गर्हितः[4] ॥ ७८ ॥

अन्नं विषसमं प्राहुरजीर्णं प्राप्नुयान्नरः ।
द्वित्रिभिर्बन्धुभिः[5] सार्धं भोजने न प्रजायते[6] ॥ ७९ ॥

अभीष्टफलसंसिद्धिस्तुष्टिकाम्यसुसंपदः ।
चकोरं कुक्कुटं[7] कृष्णं[8] शारिकां[9] च शुकं तथा ॥ ८० ॥

---

१. 'म', 'मै' न पश्येद° २. 'म' पादो लुप्तः । ३. 'म' वाग्नि । स्वजाठराग्निवेगं वीक्ष्य तदनुरूपमित्यर्थः । ४. भोक्तुः, तच्छरीरधातोश्च प्रकोपः भोजनकाले न श्रेयानित्यर्थ इति भाति । ५. 'म' 'मै' बहुभिः । ६. पूर्वोक्तो दोष इति वाक्यशेषः । ७. 'मै', 'म२' मर्कटम् । ८. 'म' दृष्ट्वा ९. म. अक्षरलोपः ।

अमात्यराजपुत्राणां गृहेष्वेतानि रक्षयेत् ।
चकोरश्चक्षुषो नैल्यं[1] विष्ठां मुञ्चति कुक्कुटः[2] ।
दृष्ट्वान्नं विषसंयुक्तं कूजन्ति शुकशारिकाः ॥ ८१ ॥

तेषां दृष्टिनिपातेन अन्नाद्यं निर्विषं भवेत् ।
परविद्या[3]दिनाशार्थे तेषां दर्शनमुच्यते ॥ ८२ ॥

कार्तिक्यामपरः पक्षो मार्गशीर्षस्य चादिमः ।
द्वावेतौ यमदंष्ट्राख्यौ मिताहारः स जीवति ॥ ८३ ॥

आदौ मधुरमश्नीयान्मध्ये च कटुतिक्तकम् ।
अन्ते तिक्तकषायं च सम्यग्जीर्णं सुखावहम् ॥ ८४ ॥

भोजनादौ पिबेत्तोयमग्निसादः[4] कृशाङ्गता ।
मध्ये कार्ये(य)विवृद्धे (द्धिश्च) अन्ते श्रेष्ठं रसायनम् ॥ ८५ ॥

अत्यम्बुपानादविपच्यतेऽन्नमनम्बुपानच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेद्भूरि ॥ ८६ ॥

पिबेद्घटसहस्राणि याव[5]दस्तं गते रवौ ।
निशि भोजनवेलायां स्वल्पमप्युदकं विषम् ॥ ८७ ॥

अन्नेन कुक्षौ द्वावंशौ पाने[6]नैकं प्रपूरयेत् ।
आश्रयं पवनादीनां चतुर्थमवशेषयेत् ॥ ८८ ॥

अत्याहाराद्भवेद्व्याधिरनाहाराद्बलक्षयः ।
समाहाराद्बलं सम्यग् आयुर्वर्धन[7]मुत्तमम् ॥ ८९ ॥

---

१. 'म' 'मै' न्मीलं । २. 'मै', मर्कटः 'मर' वानरः । ३. विद्या दुर्मन्त्र-विषादिप्रयोगः । ४. 'म' पानं । ५. 'म' अक्षरद्वयं लुप्तम् । ६. 'म' 'मै' पादे° । ७. 'म' पञ्चाक्षराणि लुप्तानि ।

[१]तृषार्तस्तु न भुञ्जीत क्षुधार्तो न पिबेज्जलम् ।
तृष्णार्तो जायते गुल्मी क्षुधार्तस्तु भगन्दरी ॥ ९० ॥

[२]भोक्तुकामश्च(स्य ?) धा(दा ?)तुश्च कोपवादो(वि?)गर्हितः ।
अन्नं विषसमं प्राहुरजीर्णं प्राप्नुयान्नरः ॥ ९१ ॥

आमं[३] विदग्धं विष्टंभि रसशेषं तथैव च ।
चतुर्विधमजीर्णं तु तक्रं तत्र परि(प्रति?)क्रिया ॥ ९२ ॥

भुक्त्वा तु मथितं सम्यक्कराभ्यां च विशेषतः ।
तत्तोयं नेत्रयोः क्षिप्त्वा नेत्ररोगं जयेन्नरः ॥ ९३ ॥

भुक्त्वोपविशतस्तुन्दः[४] भुक्त्वा संविशतस्सुखम् ।
आयुष्यं चरमाणस्य[५] मृत्युर्धावति धावतः[६] ॥ ९४ ॥

भुक्त्वा चान्न[७]मपः(मुप)स्पृश्य गत्वा शतपदं[८] शनैः ।
वामपार्श्वे शयानस्य भिषग्भिः किं प्रयोजनम् ॥ ९५ ॥

दिवास्वापं न कुर्वीत मिथ्यावादं न कारयेत् ।
दिवास्त्रीसङ्गमो नृणामायुःक्षय[९]करो भवेत् ॥ ९६ ॥

धर्मशास्त्राणि सततं पुराणश्रवणं तथा ।
[१०]कारयेत् विधिना सम्यगात्माभ्यांसांश्च नित्यशः ॥ ९७ ॥

---

१. 'मै' तृष्णा°। २. इदमर्धं पूर्वमप्येकधागतम् । ३. 'म' 'मै' अन्नं । ४. 'म' 'मै' तु शयनस्तुदः। भुक्त्वा उपविशतः तुन्दो भवति, वर्धत इत्यर्थः। ५. भुक्त्वा पादचारं कुर्वंत इत्यर्थः। ६. 'म' 'मै' °ति। ७. 'म' 'मै' अम्भि°। ८. 'मै' °पथं। ९. 'म' चत्वार्यक्षराणि लुप्तानि। १०. 'म' 'म' प्रथमं पदं लुप्तम्।

(ताम्बूलचर्वणम्)

ताम्बूलं चर्वयेद्भुक्त्वा प्रागेव[1] त्रिचतुस्तथा ।
एकपूगं चतुःपत्रं सुधाव्रीहिद्वितीयकम्[2] ॥ ९८ ॥

[3]पूगं सुदेश[4]संभूतं कठिनं गुरु चिक्कणम् ।
शशामांससमं छिन्नं[5] क्रमुकं[6] तु सुशोभनम् ॥ ९९ ॥

पूगः कषायो मधुरो रूक्षो दोषहरः परम्[7] ।
सुपक्वः सर्वदोषघ्नः[8] अपक्वो[9] दोषदो[10] भवेत् ॥ १०० ॥

कटुकी[11]रससंयुक्तं[12] नागपत्रं[13]सुशोभनम् ।
सुपक्वदलसंयुक्तं सर्वदोषविवर्जितम्[14] ॥ १०१ ॥

कफवातहरं चेति[15] नागपत्रं प्रकीर्तितम् ।
दीपनं कृमिदोषघ्नं वि[16]शदं निर्मलं लघु ॥ १०२ ॥

सुधा पाषाणजं वापि शंखेनापि विनिर्मितम् ।
शुक्तिशम्बूकसंभूतं[17] चूर्णं मुक्ताफलोद्भवम् ॥ १०३ ॥

चूर्णं पाषाणसंभूतं त्रिदोषशमनं लघु ।
वातपित्तहरं शंखशुक्तिजं शीतलं भवेत् १०४ ॥

[18]शम्बूकं श्लेष्मदोषघ्नं मुक्ताचूर्णं तु वातलम् ।
मनसो हर्षणं श्रेष्ठं रतिदं मद[19]कारणम् ॥ १०५ ॥

---

१. 'म' अक्षरत्रयं लुप्तम् । २. 'म२' सुधामात्रा यथाक्रमम् । ३. 'म' अक्षरत्रयं लुप्तम् । ४. 'म' प्रदेश ५. 'मै' भिन्नम् । ६. 'म' अक्षरद्वयं लुप्तम् । ७. 'म' अक्षरत्रयं लुप्तम् । 'म२' दोषत्रयापहम् । ८. 'म२' तत् त्रिदोषघ्नम् । ९. 'म' 'मै' अस्पष्टमक्षरम् । १०. 'म' एकमक्षरं लुप्तम् । ११. 'म२' कटकुम् । १२. 'म' अक्षरद्वयं लुप्तम् । १३. 'म' धौतवस्त्रम् । १४. 'म' अक्षरत्रयं लुप्तम् । १५. 'म२' 'मै' भेदि । १६. 'म' अक्षरत्रयं लुप्तम् । १७. 'म' प्रथमपादो लुप्तः । १८. 'म' जाम्बूकं । १९. 'म' अक्षरद्वयं लुप्तम् ।

मुखरोगक्रिमिहरं[1] ताम्बूलं चन्द्रसंयुतम् ।
[2]दन्तानां स्थैर्यदं चैव वक्त्रदुर्गन्धनाशनम् ॥ १०६ ॥

मुखरोगक्रिमिहरं खादिरेण विमिश्रितम् ।
पित्तदोषप्रशमनं रक्तपित्तप्रवर्धनम् ॥ १०७ ॥

श्लेष्मरोगहरं रुच्यं नेत्ररोगहरं शुभम् ।
नासारोगहरं कण्ठ्यं ताम्बूलं चन्द्रसंयुतम् ॥ १०८ ॥

आदौ विषोपमं पीतं द्वितीयं भेदि दुर्जरम् ।
पश्चात्सुधासमं पीतं सम्यग्जीर्णं सुखावहम् ॥ १०९ ॥

क्षीरं पीत्वा मुहूर्तेन ताम्बूलं यदि चर्वितम् ।
कुष्ठी भवति मेही च मूत्रदोषी च वा भवेत् ॥ ११० ॥

अक्षिरोगी क्षयी पाण्डुरोगी भ्रममदात्ययी ।
अपस्मारी श्वासरोगी हृद्रोगी रक्तपैत्त्यकी ॥ १११ ॥

ग्रहणीवा[3]नतीसारी ताम्बूलं परिवर्जयेत् ।
ताम्बूलं क्षतपित्तास्रग्रूक्षो[4]त्कुपितचक्षुषाम् ॥ ११२ ॥

[5]विषमूर्छामवातानामपथ्यं शोषिणामपि ।
[6]दिवा संध्यां वर्जयित्वा ताम्बूलं खादयेन्नरः ॥ ११३ ॥

अनिधाय मुखे पर्णं[7] खादेत्पूगीफलं नरः।
दरिद्रत्वमवाप्नोति शक्रतुल्योऽपि मानवः ॥ ११४ ॥

---

१. 'म२' रोगहरं हृद्यम् । २. 'म' अक्षरत्रयं लुप्तम् । ३. 'म' अक्षरद्वयं लुप्तम् । ४. 'म' अक्षरमेकं लुप्तम् । ५. विष-मूर्छा-आमवातग्रस्तानामित्यर्थः । ६. 'म' अक्षरद्वयं लुप्तम् । ७. 'म' अक्षरद्वयं लुप्तम् ; चूर्णम् ।

एकद्वित्रिचतुःपञ्चषड्भिः पूगीफलैः क्रमात् ।
लाभालाभौ सुखं दुःखमायुर्मरणमेव वा[1] ॥११५॥

प्रातः पूगीफलाधिक्यं[2] मध्याह्नेऽधिकचूर्णता[3] ।
रात्रौ तु पर्णबाहुल्यमेतत्ताम्बूललक्षणम् ॥ ११६ ॥

प्रत्यूषे[4] भुक्तसमये वर[5]युवतीनां च संगमे प्रथमे[6] ।
विद्वान्(विदुषां)राज्ञां मध्ये[7] ताम्बूलं यो न खादयेत्स पशुः ॥११७॥

पर्णमूले भवेद्व्याधिः पर्णाग्रे पाप[8]संभवः ।
चूर्णपर्णं हरत्यायुः सिरा बुद्धिविनाशिनी ॥ ११८ ॥

तस्मादग्रं च मूलं च सिरां चैव विवर्जयेत् ।
चूर्णपर्णं वर्जयित्वा ताम्बूलं खादयेत्सुधीः ॥ ११९ ॥

(स्त्रीभोगः)

दिवा संध्यां वर्जयित्वा तथा पर्वदिनेषु च ।
रात्रौ व्यवायं कुर्वीत योषितं यौवने स्थिताम् ॥ १२० ॥

कुरूपिणीं कुशीलां तु विधवां च परस्त्रियम् ।
अतिकृष्णां च हीनां च पुत्रमित्रनृपस्त्रियम् ॥ १२१ ॥

त्यजेदन्त्यकुलोद्भूतां वृद्धस्त्रीं कन्यकां[9] तथा ।
वयोधिकां स्त्रियं गत्वा तरुणस्स्थविरो भवेत् ॥ १२२ ॥

तारुण्यं तरुणीं गत्वा वृद्धोऽपि समवाप्नुयात् ।
रतिकालैकशयनमन्यत्काले पृथक्छयी॥ १२३ ॥

---

१. 'मै' च । २. 'म' लं भक्ष्यम् 'मर' पूर्वाह्ने क्रमुकाधिक्यम् । ३. 'म' अक्षरद्वयं लुप्तम् ; °वर्णता । ४. 'मर' प्रत्युषसि । ५. 'म' नव° । ६. 'मर' परमे । ७. 'मैर' राजनि विद्वन्मध्ये । ८. 'म' वायु° । ९. 'मै' कन्यकाः ।

स्त्रीणां श्वासानिलैः पुंसां दौर्भगत्वं[1] प्रजायते ।
एकशायी द्विभोजी च षण्मूत्री द्विपुरीषकः ।
स्वल्पसंगमकारी च शतवर्षाणि जीवति ॥ १२४ ॥

अत्यम्बुपानादतिसङ्गमाच्च
स्वप्नाद्दिवा जागरणाच्च रात्रौ ।
निरोधनान्मूत्रपुरीषयोश्च
षड्भिः प्रकारैः प्रभवन्ति रोगाः ॥ १२५ ॥

[2]गोशतादपि गोक्षीरं प्रस्थं धान्यशतादपि ।
प्रासादादपि शय्यार्थं शेषाः परविभूतयः ॥ १२६॥

क्षुतं[3] वक्त्रेण[4] वहति[5] जृंभणं नासया पुनः[6] ।
[7]बिन्दुसंरक्षणे चैव शतवर्षाणि जीवति ॥ १२७ ॥

विचार्य देशकालौ च वयस्सत्त्वं तथा बलम् ।
जलपानमुषःकाले पीत्वा शतसमं वसेत् ॥ १२८ ॥

अम्भसः प्रसृतान्यष्टौ पिबेदनुदिते रवौ ।
वातपित्तकफान् जित्वा जीवेद्वर्षशतं सुखी ॥ १२९ ॥

परद्रव्यं परस्त्रीं च परनिन्दां च बुद्धिमान् ।
अमित्रभाषणं शाठ्यं स्त्रीष्वालापं च वर्जयेत् ॥ १३० ॥

वर्जनं चाप्यगम्याया अभक्ष्यायाश्च(क्ष्यस्याप्य?)भक्षणम् ।
असूयावर्जनं चैव पतितैः सङ्गवर्जनम्[8] ॥ १३१ ॥

---

१. 'म२' दौर्भाग्यत्वम् । २. गोशते सत्यपि कस्यचित् साक्षादुपयोगार्थमपेक्षितं परिमितं गोक्षीरमेव; एवमेव धान्यकूटे सत्यपि प्रस्थमितमेवाहारार्थमपेक्षितम् ; सत्यपि महति प्रासादे शयनार्थं स्वल्प एव प्रदेशोऽपेक्षितः । अनुपयुक्तमवशिष्टं सर्वं केवलं स्वविभवमात्रसूचकम् ॥ ३.'मै' क्षतम् । ४. 'म' 'मै' वस्त्रेण । ५. 'म','मै' सहितम् । ६. 'म' 'मै' नासिकेन तु । ७. बिन्दुः रेतोबिन्दुः 'म२' बन्धु° । ८. 'म' 'मै' शाठ्यं पतितैस्सह संगमः ।

क्रौर्यस्य वर्जनं चैवमात्मस्तुतिविवर्जनम् ।
दानं मनोरमं कार्यमिष्टापूर्तस्य वर्धनम् ॥ १३२ ॥

अशेषदेवताभक्तिर्गोषु विप्रेषु तर्पणम् ।
शुश्रूषणं गुरुस्त्रीणां तपस्तीर्थेषु मज्जनम् ॥ १३३ ॥

विद्यायाः सेवनं चैव सततं साधुसंगमः ।
दीनान्धकृपणानां च भ्रातॄणां चैव पोषणम् ॥ १३४ ॥

कारयेत्सततं भक्त्या कीर्तिलक्ष्मीविवृद्धये ।
हिताय राजपुत्राणां सज्जनानां विशेषतः ।
चारुचर्या प्रिया श्रेष्ठा रचिता भोजभूभुजा ॥ १३५ ॥

॥ इति भोजराजचारुचर्या समाप्ता[1] ॥

---

१. एतादृशपुष्पिकानन्तरं २६ श्लोकाः प्रायः पूर्वपरामृष्टार्थविषयका एव 'म२' मातृकायामधिकं दृश्यन्ते ॥

“ एकादशद्वारनिबद्ध उपदेशः ”*

धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं
धर्मेणैव भवन्ति निर्मलयशोविद्यार्थसंपत्तयः ।
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते
धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥ १ ॥

(धर्म) सिद्धौ ध्रुवं सिद्धिर्द्युम्नप्रद्युम्नयोरपि ।
दुग्धोपलम्भे सुलभा संपत्तिर्दधिसर्पिषोः ॥ २ ॥

धर्मो महामङ्गलमङ्गभाजां धर्मो जनन्युद्दलिताखिलार्तिः ।
धर्मः पिता पूरितवाञ्छितार्थो धर्मः सुहृद्वर्धितनित्यहर्षः ॥ ३ ॥

जैनो धर्मः प्रकटविभवः संगतिः साधुलोके
विद्वद्गोष्ठीवचनपटुता कौशलं सत्कलासु ।
साध्वी लक्ष्मीचरणकमलोपासना सद्गुरुणां
शुद्धं शीलं मतिरमलिना प्राप्यते नाल्पपुण्यैः ॥ ४ ॥

मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः[1] ॥ ५ ॥

---

* पुण्यपत्तनस्थ-भाण्डारकर-प्राच्यविद्या-संशोधन-संस्थावर्ति-मातृकासंग्रहे १५८९-९१ वर्षीयाया १११३-संख्याङ्किताया मातृकाया उद्धृत एष उपदेशपरः श्लोक-संग्रहः । तत्संस्थापालका डा० पूसलकर्-महाशया धन्यवादार्हाः । केनापि जैनसंप्रदायानुसारिणा नानाकरेभ्यः संकलितोऽयम् । ये मातृकायां प्रकटा लेखकप्रमादा अपभ्रंशा वा ते शोधिताः ।

1. भर्तृहरेर्नीतिशतकात् ।

श्रद्धालुतां याति जिनेन्द्रशासने धनानि क्षेत्रेषु वपत्यनारतम् ।
किरत्यपुण्यानि सुसाधुसेवनादतोऽपि तं श्रावकमाहुरुत्तमाः ॥ ६ ॥

व्याकुलेनापि मनसा धर्मः कार्यं(र्यो) निरन्तरम् ।
[1]मेढीबद्धोऽपि हि भ्राम्यन् घासग्रासं करोति गौः ॥ ७ ॥

तक्रादिव नवनीतं पङ्कादिव पद्ममममृतमिव जलधेः ।
मुक्तामणिरिव वंशाद्धर्मः सारं मनुष्यभवात् ॥ ८ ॥

शिष्टे संगः श्रुतौ रंगः सद्ध्याने धीर्धृतौ मतिः ।
दाने सक्तिर्गुरौ भक्तिः षडेते सुकृताकराः ॥ १० ॥

भवकोटीदुष्प्रापामवाप्य नृभवादिसकलसामग्रीम् ।
भवजलधियानपात्रे धर्मे यत्नः सदा कार्यः ॥ ११ ॥

धर्मे रागः श्रुतौ चिन्ता धने व्यसनमुत्तमम् ।
इन्द्रियार्थेषु वैराग्यं संप्राप्तं जन्मनः फलम्[2] ॥ १२ ॥

संपदो जलतरंगविलोला यौवनं त्रिचतुराणि दिनानि ।
शारदाभ्रमिव चञ्चलमायुः किं धनैः कुरुत धर्ममनिन्द्यम्[3] ॥ १३ ॥

चला विभूतिः क्षणभङ्गि यौवनं कृतान्तदन्तान्तरवर्ति जीवितम् ।
तथाप्यवज्ञा परलोकसाधनेष्वहो नृणां विस्मयकारि चेष्टितम्[4] ॥१४॥

उद्यमं कुर्वता पुंसां भाग्यं सर्वत्र कारणम् ।
समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्[5] ॥ १५ ॥

आरोहतु गिरिशिखरं समुद्रमुल्लङ्घ्य यातु पातालम् ।
विधिलिखिताक्षरमालं फलति कपालं न भूपालः[6] ॥ १६ ॥

---

१. मेढी खलमध्ये वृषबन्धनार्थं निखातः स्तम्भः । २. चाणक्यराजनीतौ । ३. सुभाषितावलौ ३३१६, तुरीयपादे पाठान्तरेण । ४. तत्रैव ३३१५ । ५. चा. रा. नी. । ६. सुभाषितरत्नभाण्डागारे पृ. ९१ श्लो. ४४,

प्रचलति यदि मेरुः शीततां याति वह्नि-
रुदयति यदि भानुः पश्चिमायां दिशायाम् ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न हि भवति हि मिथ्या भाविनी कर्मरेखा[१] ॥ १७ ॥

औचित्यमेकमेकत्र गुणानां कोटिरेकतः ।
विषायते गुणग्राम औचित्यपरिवर्जितः[२] ॥ १८ ॥

आचारः कुलमाख्याति देशमाख्याति भाषितम् ।
संभ्रमः स्नेहमाख्याति वपुराख्याति भोजनम्[३] ॥ १९ ॥

नाविदु(द ?)ग्धः प्रियं ब्रूयान्नाकामी मण्डनप्रियः ।
निःस्पृहो नाधिकारी स्यात् स्फुटवक्ता न वञ्चकः[४] ॥ २० ॥

सुखी न जानाति परस्य दुःखं न यौवनस्था गणयन्ति शीलम् ।
आपद्गता निष्करुणा भवन्ति आर्ता नरा धर्मपरा भवन्ति ॥ २१ ॥

अभ्यासकारिणी विद्या लक्ष्मीः पुण्यानुसारिणी ।
त्यागानुसारिणी कीर्तिर्बुद्धिः कर्मानुसारिणी ॥ २२ ॥

पदे पदे निधानानि योजने रसकूपिकाः ।
पुण्यहीना न पश्यन्ति बहुरत्ना वसुन्धरा[५] ॥ २३ ॥

शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता शतसहस्रेषु दाता भवति वा न वा[६] ॥ २४ ॥

क्षमासमं तपो नास्ति संतोषान्न परं सुखम् ।
नास्ति विद्यासमं दानं नास्ति धर्मो दयासमः[७] ॥ २५ ॥

---

१. चा रा. नी. । २. धर्मबिन्दोर्मुनिचन्द्रव्याख्यायाम् । ३. व्यासशतके । ४. सु. र. भा. १७१. ५१०. ५. चा. रा. नी., सु. र. भा. १६६. ३११ । ६. महाभारते ; व्यासशतके । ७, सु. र. भा. १६६. ६००,

क्षमाखड्गं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेव विनश्यति[१] ॥ २६ ॥

ओमिति पण्डिताः कुर्युरश्रुपातं च मध्यमाः ।
अधमाश्च शिरोघातं शोके धर्मे विवेकिनां (नः ?) ॥ २७ ॥

यूथं(पं) कृत्वा पशून् हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गो नरके केन गम्यते[२] ॥ २८ ॥

नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया
संतुष्टस्तृणभक्षणेन सततं साधो न युक्तं तव ।

स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनः
यज्ञं किं नु करोति मातृपितृभिः पुत्रैस्तथा बान्धवैः[३] ॥ २९ ॥

काके शौचं द्यूतकारेषु सत्यं सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता राजा मित्रं केन दृष्टं श्रुतं[४] वा ॥३०॥

जीवन्तो मृतकाः पञ्च श्रूयन्ते किल भारते ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥ ३१ ॥

हे दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
येन पश्याम्यहं सर्वान् न मां कोऽपि (हि ?) पश्यति[५] ॥ ३२ ॥

स एव त्वं स एवाहं स एव तव आश्रमः ।
आदरं शिथिलीकृत्य किम(र्थं ?) पुनरागतः (?) ॥ ३३ ॥

धनमर्जय काकुत्स्थ धनमूलमिदं जगत् ।
अन्तरं नैव पश्यामि निर्धनस्य मृतस्य च[६] ॥ ३४ ॥

---

१. वृद्धचाणक्ये । २. प्रसिद्धोऽयं चार्वाकवचनानुवादः ; प्रथमपादे 'वृक्षांश्छित्वा' इति पाठेन सांख्यकारिका (२) माठरवृत्तावुदाहृतः । ३. पूर्वश्लोकानुसारी पशोर्यजमानं प्रति वाक्यम् । ४. सुभाषितावलौ ३२४०. ५. शार्ङ्गधरपद्धतौ ४०२. ६. प्रसङ्गाभरणे ।

आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां
मूकत्वं मितभाषितां वितनुते मौग्ध्यं भवेदार्जवम् ।
पात्रापात्रविचारभावविरहो यच्छत्युदारात्मतां
मातर्लक्ष्मि तव प्रसादवशतो दोषा अपि स्युर्गुणाः[1] || ३५ ||

भक्ते द्वेषो जडे प्रीतिः स्वभावो गुरुलंघने ।
मुखे च कटुता नित्यं धनिनां (ज्व) रिणामिव[2] || ३६ ||

अर्थानामर्जने कष्टमर्जितानां च रक्षणे ।
[3]नाशे दुःखं....धिगर्थान् दुःखभाजनम् || ३७ ||

धर्मस्य फलमिच्छन्ति धर्मं नेच्छन्ति मानवाः ।
फलं नेच्छन्ति पापस्य पापं कुर्वन्ति सादराः || ३८ ||

गतेर्भङ्गः स्वरो दीनो गात्रे स्वेदो महाभयम् ।
मरणे यानि चिह्नानि तानि चिह्नानि याचने[4] || ३९ ||

दानेन भोगाः सुलभा नराणां दानेन भूतानि वशीभवन्ति ।
दानेन वैराण्यपि यान्ति नाशं तस्माद्धि दानं सततं प्रदेयम् || ४० ||

दाता सदैवाक्षयवैभवः स्याद्धनीपकस्तादृश एव निस्वः ।
नद्यो भृता अप्यचिरेण रिक्ताः कूपः पयोभिस्तु तथैव पूर्णः[5] || ४१ ||

वरमेका कला रम्या ययाऽलंकियते भवः ।
बह्वीभिरपि किं ताभिर्भवो यासु कलङ्क्यते || ४२ ||

---

१. सूक्तिमुक्तावली ४१८. १४. २. सू. मु. प्रभृतिषु । ३. महाभारते । 'आये दुःखं व्यये दुःखम्' इति प्रसिद्धः तृतीयपादपाठः । ४. चा. र नी., सु. र. भा. ७३.९. ५. अस्मिन्नर्थे वेदान्तदेशिकानां सुभाषिनीव्यां श्लोकः—एकयापि कलया विशुद्धया कोऽपि कोऽपि भजते गिरीशताम् । भूयसीरपि कलङ्किताः कलाः प्राप्य कश्चिदपचीयते शनैः ||

वनेऽपि दोषाः प्रभवन्ति रागिणां गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते निवृत्तरागस्य गृहं तपोवनम्[१] ॥ ४३ ॥

निद्रा मूलमनर्थानां निद्रा श्रेयोविघातिनी ।
निद्रा प्रमादजननी निद्रा संसारवर्द्धनी ॥ ४४ ॥

कूटसाक्षी मृषावादी कृतघ्नो दीर्घरोषणः ।
चत्वारः कर्मचण्डालाः पञ्चमो जातिसंभवः ॥ ४५ ॥

माताप्येका पिताप्येको मम तस्य च पक्षिणः ।
अहं मुनिभिरानीतः स च नीतो गवाशिभिः[२] ॥ ४६ ॥

गवाशनानां स गिरः शृणोति अहं तु राजन् मुनिपुंगवानाम् ।
प्रत्यक्षमेतद्भवतापि दृष्टं संसर्गतो दोषगुणा भवन्ति[३] ॥ ४७ ॥

संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वातौ सागरशुक्तिसंपुटगतं बज्जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते[४] ॥ ४८ ॥

स्वगुणं परदोषं च वक्तुं प्रार्थयितुं परम् ।
अर्थिनं च निराकर्तुं सतां जिह्वा जडायते ॥ ४९ ॥

अयं निजः परो वापि(वेति) गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुंबकम्[५] ॥ ५० ॥

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासङ्गो मुक्तिर्निर्विषयं मनः ॥ ५१ ॥

---

१. पुराणेषु; शान्तिशतके २-२८ ; चा.र.नी; हितोपदेशे च ४-८४ । २,३. तन्त्रोपाख्याने (T.S.S. edn.) पृ. ५; चा. रा. नी. ४. भर्तृहरेर्नीतिशतके । ५. बहुत्र ।

उत्तमाः स्वगुणैः ख्याता मध्यमाः स्वपितुर्गुणैः ।
अधमा मातुलैः ख्याताः श्वशुरैस्त्वधमाधमाः[१] ॥ ५२ ॥

गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम् ।
केतकीगन्धमाघ्राय स्वयं गच्छन्ति षट्पदाः[२] ॥ ५३ ॥

गुणैरुत्कर्षतां यान्ति नोच्चैरासनसंस्थितः ।
प्रासादशिखरस्थोऽपि काकः किं गरुडायते[३] ॥ ५४ ॥

गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः ।
अलिरेति वनात्कमलं न दुर्दुरस्त्वेकवासेऽपि[४] ॥ ५५ ॥

नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी ।
गुणी च गुणरागी च विरलः सरलो जनः ॥ ५८ ॥

यो वेत्ति यस्य न गुणान् सततैनापि(?) तत्र किं कुरुते ।
द्राक्षावनेऽपि फलिते काकः फलमत्ति निम्बस्य ॥ ५९ ॥

तच्छ्रेयो[५] यातु पातालं तच्चातुर्यं विलीयताम् ।
विविशन्तु गुणा वह्नौ येषु सत्स्वप्यधोगतिः ॥ ६० ॥

राज्यं यातु श्रियो यान्तु यान्तु प्राणा अशाश्वताः ।
या मया स्वयमेवोक्ता वाचा माया तु शाश्वती ॥ ६१ ॥

किं चित्रं यदि दण्डनीतिनिपुणो राजा भवेद्धार्मिकः
किं चित्रं यदि वेदनीतिनिपुणो विप्रो भवेत्पण्डितः ।
तच्चित्रं यदि रूपयौवनवती साध्वी भवेत्कामिनी
तच्चित्रं यदि निर्द्धनोऽपि पुरुषः पापं न कुर्यात्पुनः ॥ ६२ ॥[६]

---

१. शा. प. ६८, चा. रा. नी. २. शा. प. २९०. ३. शा. प. ३०२.
४. नीतिद्विषष्टिकायाम्; शा. प. २९३. ५. अत्र 'ते' इत्यधिकम् । ६. चा. रा. नी.

अहङ्कारे सति प्रौढे वदत्येवं गुणावली ।
अहङ्कारे पतिष्यामि समायाता च दंतिके(?) ॥ ६३ ॥

जितेद्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणाधिके पुंसि जनोऽनुरज्यते जनानुरागप्रभवा हि संपदः ॥६४॥[1]

क्रोधान्धस्य मुनेश्चण्डचण्डालस्य च नान्तरम् ।
तस्मात्क्रोधं परित्यज्य भजोज्ज्वलधियां पदम् ॥ ६५ ॥

अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ ६६ ॥

लोभमूलानि पापानि रसमूलाश्च व्याधयः ।
स्नेहमूलानि दुःखानि त्रीणि त्यक्त्वा सुखी भव ॥ ६७ ॥

क्षते प्रहाराः प्रपतन्त्यवश्यं धान्यक्षये स्फूर्जति जाठराग्निः ।
आपत्सु मित्राणि विसंवदन्ति छिद्रेष्वनर्था बहुलीभवन्ति ॥ ६८ ॥

यास्याम्यायतनं जिनस्य लभते ध्यायंश्चतुर्थं फलं
षष्ठं चोच्छितुमुद्यतोऽष्टममधोगन्तुं प्रवृत्तोऽध्वनि ।
श्रद्धालुर्दशमं बहिर्जिनगृहात्प्राप्तस्ततो द्वादशं
मध्ये पाक्षिकमीक्षिते जिनपतौ मासोपवासं फलम् ॥ ६९ ॥

भक्तिर्जिनेषु दृढता जिनभाषितेषु श्रद्धा च धर्मकरणेषु गुणेषु रागः ।
दानेषु तीव्ररुचिता विनयेषु वृत्तिः कस्यापि पुण्यपुरुषस्य भवन्त्यवश्यम्॥
॥७० ॥

स पण्डितो यः करणैर्न खण्डितः स तापसो यो निजपापघातकः ।
स दीक्षतो यः सकलं समीक्षते स धार्मिको यो परमर्म न स्पृशेत् ॥७१॥

---

१. प्रसिद्धोऽयं श्लोकः, भारवेरिति च प्रसिद्धिः ।

इक्षो रसं यथादाय कूर्चकस्त्यज्यते नरैः ।
धर्मः(र्मं) सारं तथादाय देहं त्यजति पण्डितः ॥ ७२ ॥

लभ्यन्तेऽपि महार्घ्याणि रत्नानि द्रविणैः सुखम् ।
दुर्लभो रत्नकोट्यापि क्षण एको मनुजायुषः[1] ॥ ७३ ॥

गात्रं संकुचितं गतिर्विगलिता दन्ताश्च नाशं गताः
दृष्टिर्भ्रश्यति रूपमेव हसते वक्त्रं च लालायते ।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते
हा कष्टं जरयाभिभूतपुरुषं पुत्रोऽप्यवज्ञायते[2] ॥ ७४ ॥

दन्तैरुच्चलितं बलेन गलितं पाण्यङ्घ्रिणा कम्पितं
दृग्भ्यां कुड्मलितं धिया तरलितं देहश्रिया प्रोषितम् ।
प्राप्तायां यमभूपतेरिह महाधाट्यामियं सर्वतः
तृष्णा केवलमेककैव सुभटी हृत्पत्तने नृत्यति[3] ॥ ७५ ॥

संपदि यस्य न हर्षो विपदि विषादो रणेऽप्यधीरत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥ ७६ ॥

विग्रहमिच्छन्ति भटा वैद्याश्च व्याधिपीडितं लोकम् ।
भृतकबहुलं च विप्राः क्षेमसुभिक्षं च निर्ग्रन्थाः ॥ ७७ ॥

सुलभानि सर्वशास्त्राणि दुर्लभं भाववेदनम् ।
शिरो वहति पुष्पाणि गन्धं जानाति नासिका ॥ ७८ ॥

तृणं ब्रह्मविदः स्वर्गं तृणं शूरस्य जीवितम् ।
विरक्तस्य तृणं नारी निरीहस्य तृणं नृपः ॥ ७९ ॥[4]

---

१. एकाक्षराधिक्यमत्र । २. भर्तृहरेर्वैराग्यशतके ७३. ३. सु.र.भा. ७७-५२.
४. चा. रा. नी.

न वीतरागादपरोऽस्ति देवो न ब्रह्मचर्यादपरं तपोऽस्ति।
नाभीतिदानात्परमस्ति दानं चारित्रिणो नापरमस्ति पात्रम् ॥८०॥

बुद्धेः फलं तत्त्वविचारणं च देहस्य सारं व्रतधारणं च।
अर्थस्य सारं किल पात्रदानं वाचः फलं प्रीतिकरं नराणाम् ॥ ८१ ॥

रणे वने शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि[1] ॥ ८२ ॥

भीमं वनं(भवति)तस्य पुरं प्रधानं सर्वा च भूर्भवति सन्निधिरत्नपूर्णा।
सर्वो जनः स्वजनतामुपयाति तस्य यस्यास्ति पूर्वरचितं सुकृतं नरस्य[2]
॥ ८३ ॥

याति कालो गलत्यायुः क्षीयन्ते च मनोरथाः।
सुकृतं न कृतं किंचित्सतां संस्मरणोचितम् ॥ ८४ ॥

अवाप्य धर्मावसरं विवेकी कुर्याद्विलम्बं न हि विस्तराय।
तातो(यातो ?) जिनस्त[ा]क्षशिलाधिपेन रात्रिं व्यतिक्रम्य पुनर्न नेमे
॥ ८५ ॥

जिनेन्द्रपूजा गुरुपर्युपास्तिः सत्त्वानुकंपा शुभपात्रदानम्।
गुणानुरागः श्रुतिरागमस्य नृजन्मवृक्षस्य फलान्यमूनि ॥ ८६ ॥

संपत्तौ नियमः शक्तौ सहनं यौवने व्रतम्।
दारिद्र्ये दानमत्यल्पमतिलाभाय कल्पते ॥ ८७ ॥

रम्येषु वस्तुषु मनोहरतां गतेषु रे चित्त खेदमुपयासि वृथा किमेवम्।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा पुण्यैर्विना न हि भवन्ति समीहितानि ॥ ८८ ॥

१, २. भर्तृहरेर्नीति° ९९, १००,

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रिया ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता[१] ॥ ८९ ॥

आदौ चित्ते ततः काये सतां संगच्छते जरा (त्वरा ?) ।
असतां तु पुनः काये चित्ते न वचने न च ॥ ९० ॥

उतः(ओतुः)[२]पयः पश्यति नैव दण्डं कीरस्तु शालीन्न तु सानुखण्डम्(?)
काकोऽपि मांसं ननु सिंहतुण्डं जीवस्तथाशां न यमं प्रचण्डम् ॥९१॥

मानं (हि ?)दारिद्र्यहरं शीलं दुर्गतिनाशनम् ।
अज्ञाननाशिनी प्रज्ञा भावना भवनाशिनी ॥ ९२ ॥

अजीर्णं तपसः क्रोधो ज्ञानाजीर्णमहंकृतिः ।
परनिन्दा क्रियाजीर्णमन्नाजीर्णं विषूचिका ॥ ९३ ॥

तार्णं जीर्णं कुटीरं वृषनकुलकुलैराकुलं धान्यहीनं
काणी कोलाकुरूपा कटुरटनपरा गेहिनी स्नेहहीना ।
खण्डी हण्डी त्रिखण्डी श्रुतिविकलखरी(?) द्वारि कोकूयमाना
एवं सत्यां विभूत्यां रमति जनमनो ही महामोहचेष्टा ॥ ९४ ॥

सुभाषितेन गीतेन युवतीनां च लीलया ।
मनो न भिद्यते यस्य स योगी अथवा पशुः ॥ ९५ ॥

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा निवेशिता ॥ ९६ ॥

यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किं पुनस्तच्चतुष्टयम्[३] ॥ ९७ ॥

---

१. सु. र. भा. ४६, ३६ (विक्रमचरितात्) २. ओतुर्मार्जारः । ३. हितोपदेशे प्रस्ताविका ११.

राजनि धर्म्ये धर्मिष्ठाः पापे पापाः समे समाः ।
राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ॥ ९८ ॥

भवविटपिसमूलोन्मूलने मत्तदन्ती
न(ज)डिमतिमिरनाशे पद्मिनीप्राणनाथः ।
नयनमपरमेतद्विश्वविश्वप्रकाशे
ह(क?)रणहरिणबन्धे वागुरा ज्ञानमेव* ॥ ९९ ॥

---

* इतः परमुपसप्तति प्राकृतगाथाः, तदनन्तरं द्वित्राणि जैनधर्मकथानकानि तदन्तर्भूतानि संस्कृतप्राकृतोपदेशपद्यानि च दृश्यन्ते ।

॥ श्रीभोजराजाङ्कः[१] ॥

॥ सुन्दरवीररघूद्वहसूरि-विरचितः ॥

अस्तु नः स्वस्तिदं वस्तु कौस्तुभप्रभमुज्ज्वलम् ।
क्षमाक्षमा[२] सदा लक्ष्मीर्यस्य वक्षसि लक्ष्यते ॥ १ ॥

नान्द्यन्ते सूत्रधारः (समन्तादवलोक्य)-

अहो विरतप्रायैव शर्वरी ! यतः—

साधूनां हृदयमिव प्रसन्नमभ्रं
सर्वत्र प्रसरति मन्दगन्धवाहः ।
उद्बुद्धयाम्बुजविपिनं प्रयाति भृङ्गः
चन्द्रो वि(ऽपि ?)प्रिय[३]वनितामिव प्रतीचीम् ॥ २ ॥

(सहर्षं) कथमुदित एव भगवानम्भोजिनीप्राणनाथः !

---

१. दशरूपकेषु अङ्कनामा य एकाङ्को भेदः, तदुदाहरणभूतमिदं भोजराजचरितमधिकृत्य प्रवृत्तं रूपकं मद्रास्-शासकीयहस्तलिखितकोशागारस्थ R. 1702 संख्याङ्कितां मातृकामालम्ब्यात्र मुद्रितम् । कविर्द्रमिडदेशे दक्षिण-आर्काड्-सीम्नि 'शिरुवल्लूर्' नामकाग्रहाराभिजनः वाधूलः कस्तूरिरङ्गतनयः । दक्षिण-पेण्णार्-नदीतीरे तिरुक्कोयिल्लूर्-नाम्नि क्षेत्रे देहलीशनाम्नो विष्णोर्यात्राप्रसङ्गेन प्रणीतमिदं रूपकम् । कविनानेन कृता 'अभिनवराघवं' नाम नाटकम्, 'रम्भारावणीयं' नाम ईहामृगः, पाञ्चरात्रे निबन्धद्वयमित्यन्या अपि कृतय उपलभ्यन्ते । सार्धशतवर्षेभ्यः प्रागासीदिति श्रूयते ।

२. क्षमाक्षमा भूमेः क्षमेव क्षमा यस्याः सा । ईदृश्यः टिप्पण्यः काश्चित्का मातृकायां दत्ताः । ताभिस्सहास्माभिश्च काश्चनात्र लिखिताः ॥

३. यथास्थितपाठे उषसि प्रतीच्यामस्तोन्मुखस्य चन्द्रस्य म्लायमानकान्तित्वात् विप्रियवनितागमननिर्बन्धान्म्लानिः संभाव्यत एव । तथापि 'चन्द्रोऽपि प्रियवनिताम्' इति पाठः स्वरसतरो भाति ॥

यतः—

कर्णावतंसरुचिमद्रितटे वनश्रीः
बालातपेन वहते नवपल्लवेषु ।
मुग्धाङ्गनाजनघनस्तनमण्डलाभं
कोकः करोति गमनं प्रिययान्तरिक्षैः(क्षे)[1] ॥ ३ ॥

(इति सर्वत्र दृष्टिं चालयित्वा) अहो भाग्यवती गोपनगरी[2] !

यतः—

वण्णानदी[3]पवनपावितपुण्यभूमिः
[4]कृष्णाटवीचरगवीपदरेणुसान्द्रा ।
श्रीदेहलीश[5]वनिताजनगुल्फलम्बि-
मञ्जीरशिञ्जितशुचिध्वनिचुम्बितास्ते ॥ ४ ॥

(कर्णं दत्वा) किन्निमित्तेयं भगवतः श्रीनन्दनन्दनस्य श्रवणानन्दकरी सिन्धुनन्दिनी[6]सुन्दरकन्दुकविहारसमयविलोलमेखलालम्बमानमणिगणशिञ्जितानुकारिणी सशुद्धसरससंल्लापपरपुष्टमिथुनसुश्रूयमाणा निरन्तरभगवद्ध्यानपरमैकान्तिकुलकलिता गीतिस्समुज्जृम्भते । (विचिन्त्य) आः, ज्ञातं ज्ञातम् ।

अद्य खलु—

चैत्रशुद्धनवमीमहोत्सवः[7] जानकीकुचविमर्दितोरसः[8] ।
तत्समर्चनकृते द्विजोत्तमैः सारसान्द्रमिह साधु गीयते ॥ ५ ॥

---

१. द्वन्द्वीभूय । प्रातर्मिलितकोकमिथुनमविरहितमन्तरिक्षगमनसमयेऽङ्गनाया निबिडस्तनबिम्बोपमं प्रतिभातीत्यर्थः ॥ २. गोपालपुरी, द्रविडभाषायां तिरुक्कोव(यि)लूर् इति ख्याता । ३. 'तेन् पेण्णै' इति द्रमिडभाषायां दक्षिणपिनाकिनीति च संस्कृतभाषायां विदिता । ४. क्षेत्रस्यास्य कृष्णारण्यमिति नामान्तरम् । ५. तत्र कृतालयस्य भगवतो विष्णोर्नामेदम् । ६. लक्ष्मीः ७. रामजन्मोत्सवः । ८. रामस्येत्यर्थः ।

(अन्यत्र दृष्ट्वा) अहो, कथमत्र महतां समाजः । तदेनमुपतिष्ठे । (अञ्जलिं बद्ध्वा)

नमः श्रीजानकीजानिनिध्यानरसवेदिने ।
श्रुतिस्मृतीतिहासादिनिधये सदसे सताम् ॥ ६ ॥

(आकाशे लक्ष्यं बद्ध्वा)

किं कथयन्त्यार्यमिश्राः । भो भो भरतपुत्र, अद्य परितोषयास्मान्नव्येन रूपकाभिनयेनेति । (सविनयम्) आर्यमिश्राः—

नव्येषु बहुषु सत्स्वपि
नवरसभरितेषु रूपकेष्वधुना ।
केन भवामि गुरूणां
हृदयं सम्यग्विनोदयितुम् ॥ ७ ॥

किं ब्रूथ—

करुणा[१]रसभूयिष्ठं शृङ्गाररसमेदुरम् ।
कन्यारत्नकथारम्यं रूपकं तत्प्रयुज्यताम् ॥ ८ ॥ इति ।

(सहर्षं) धन्योऽस्मि ।

अम्भोजपञ्जरमरालनिजाङ्कमध्य-
भ्राजत्क एव जनयेद्भवतां प्रमोदम् ।
आस्ते यतस्सकललोकमनोभिरामः
[२]प्राचीननाथमहितस्स [३]नवप्रवृत्तिः ॥ ९ ॥

---

१. करुण इत्येव भव्यम्; वृत्तप्रयुक्तो दीर्घः । २. 'प्राचीननाथः प्रख्यातनायकः । ३. नवप्रवृत्तिः-नूतनकथा ।' इति मातृकास्थटिप्पणी । आम्भोजमध्ये मरालराजमानः को ब्रह्मा इत्यर्थः । यतो यस्मात् नवप्रवृत्तिः नूतनः सर्गः । प्राचीननाथः पुराणपुरुषो नारायणः, तन्महिता सृष्टिरित्यर्थः । प्रथमपादस्थाक्षरयोजनया 'भोजराजाङ्क' इति रूपकस्य नामापि उपलभ्यते ॥ ९ ॥

पुनः किं ब्रूथ ? अये! रसिकशेखरोऽसि । यदस्मद्धृदयस्थं विदित्वा 'भोजराजाङ्कं' निरूपयितुं प्रवृत्तोऽसीति । (पुनः सविनयम्) सर्वोऽप्यार्यानुग्रहपरिणाम एव । (सप्रमोदं शिरः कम्पयन्)—

सरसो रसिकश्लाघ्यो
ग्रन्थस्सोऽयं कविश्च वाधूलः ।
दासो भागवतानां
सुन्दरवीररघुनायकाचार्यः ॥ १० ॥

यस्तु—

श्रीबालकिंगृहपुरीविहरद्रमेश-
पादाब्जरेणुपरिमण्डितमूर्धभागः ।
श्रीसात्वतामृतमहोदधिपूर्णचन्द्रः
कस्तूरिरङ्गतनयो जयतिस्सुमेधाः (?)[1] ॥ ११ ॥

(इति समन्तादवलोक्य) अहो वसन्तोपक्रमः !

यतः—

मलयादचलान्मृदुप्रचारो
मदनामोदभरैः श्रमापनोदम् ।
सहकारवने विधाय मल्ली-
लतिकाविभ्रममातनोति हर्षात् ॥ १२ ॥

अहो मे भागधेयं यदद्यैषामेकासिकता !

कविरपि रसिकः श्लाघ्यः
कविता सरसा च भोजनृपवृत्ता ।
समयश्चापि वसन्तः
सवश्च सीतारमणवर्धन्त्योः(न्त्याः?)[2] ॥ १३ ॥

---

१. एवमेव मातृकायाम्; 'जयते' इति स्यात् । २. वर्धन्ती जयन्ती ।

(रङ्गस्थलं विलोक्य सहर्षम्)

सङ्कीर्णाः प्रसवाश्च[1] मद्दलरवैस्तालध्वनिः श्रूयते
वीणागानरवेण गीतिनिपुणैस्सङ्गीतमुद्गीयते ।
कर्णानन्दकरं च तत्सुसुषिरं चेतस्समाकर्षति
स्वच्छन्दं ललनाजनस्सकुतुकं नृत्ताय सज्जोऽधुना ॥ १४ ॥

(नेपथ्यमालोक्य)

कथं कलितनैपथ्या इव कुशीलवाः । अहमप्यनन्तरकरणीयाय सज्जीभवामि ।

॥ इति निष्क्रान्तः ॥

॥ प्रस्तावना ॥

(ततः प्रविशति गोविन्दपण्डितः ।)

गोविन्दपण्डितः—अहो सिन्धुलप्रभोः प्रभावः !

मूकश्चापि विलोकनान्नरपतेरासाद्य सर्वज्ञतां
वाणीं वाचि विहारयन्नपि सभां सम्यक् समाह्लादयन् ।
कोशागारविभूषणैकनिरतैरावापकाद्यै[2]श्शुभैः
तैस्तैश्च प्रतिकर्मितस्सकुतुकं संभावितः काञ्चनैः ॥ १५ ॥

देवी शशिप्रभापि नष्टमुष्टिः[3] इति प्रसिद्धा ।

यतः—

यद्दत्तमुक्ताभरणानि नित्या-
[4]दानेन वोढ्रा परिवर्जितानि ।
लज्जावशादम्बरमभ्युपेत्य
नक्षत्ररूपेण परिक्रमन्ते ॥ १६ ॥

---

१. सुमनसश्च । २. आवापः कटकः । ३. कृपणवाचिनो दृढमुष्टिशब्दस्य प्रत्यनीकतया नष्टमुष्टिशब्दः 'अतिदानशीला' इत्यर्थे प्रयुक्त इति भाति । ४. आदानेन ग्रहणेन ।

(विचिन्त्य) किं ब्रवीमि तत्तनयस्य भोजकुमारस्य विक्रमम् !

तेनान्तरक्षितिपतेर्युधि विक्रमो य-
स्सन्दर्शितोऽरिमथनार्थमहो विचिन्त्य ।
भूत्वा रविर्दिवमुपेत्य किमत्र शिष्टा(न्?)
जेष्यामि तानि वि(तानिति?) चिनोति दिशो दशापि ॥१७॥

तादृशे पराक्रमवति दुरात्मा तत्पितृव्यः समारोपयति दोषमेव । स भवतु यथा तथा वा । (सविषादम्) न दृश्यते चिराय स भोजः, न श्रूयते तस्य स्थितिरपि । (पुरोऽवलोक्य) कोऽयमायाति ? (सम्यङ् निर्वर्ण्य) अहो भोजमित्रं भवभूतिः । एष जानात्येव तद्वृत्तान्तम्; तन्मुखाज्जानामि । (इति पश्यन्नास्ते ।)

(ततः प्रविशति भवभूतिः)

भवभूतिः— (सनिर्वेदम्)

अदृष्ट्वा तन्मित्रं कविकुमुदशीतांशुमनघं
वलन्ते विद्वांसो हृतजलजहंसा इव पुरे ।
कथं वक्ष्ये तेषामहमतिरहस्येन विपिने
चरन्तं भोजं तं मृदुमधुरवाचं विधिवशात् ॥ १८ ॥

गोविन्दपण्डितः—(श्रुत्वा, सखेदमुपसृत्य) वयस्य भवभूते ! किमपि खिन्नं मे हृदयं भवद्वचनश्रवणेन। कथय तावदतिरहस्यमपि भोजकुमारस्य काननसञ्चारकारणम् ।

भवभूतिः—(स्वगतम्) कथमार्यगोविन्दपण्डितमत्रस्थितमपश्यता किंचित्कथितं मया । इतो न गोपयितुं शक्यमस्मिन्महानुभावे पण्डितकण्ठीरवे । भवतु, रहस्येन विज्ञापयामि । (प्रकाशम्) आर्य अभिवन्दे । (सनिःश्वासम्) किं वच्मि मुञ्जदेवचरितस्य असामञ्जस्यम् ? विदितमेव भवद्भिः कुमारो

रूढमूलो भविष्यतीति मत्वा आदित्यवर्मणः पुत्रीं लीलावतीं भिल्लमल्लैर-श्रुतोदन्तां विधाय, नष्टपितृकां चारुमतीसुतां विलासवतीमदापयदिति ।

गोविन्द०—(स्वगतम्) सत्यमेतत् । अवसानसमये स्वेन संरक्ष्य-माणा आदित्यवर्मणः पुत्री लीलावत्येव परिणेया कुमारेणेति मुञ्जाय कथयित्वा कालधर्मं गतस्य सिन्धुलस्याज्ञामुलङ्घ्य स्वसीयां विलासवतीमदापयत् । आवन्तिकापि बाला स्वमल्लैः क(न ?)ष्टप्रायेति महती वचनीयता मुञ्जस्य ।

भवभूतिः—अन्तरदेशजयशीलेन भोजकुमारेणात्मनः क्षयो भविष्यतीति भिया स्वसेनापतये वत्सराजाय आज्ञापयामास—'वञ्चनया समाहूय भुवनेश्वरी-विपिने निशि कुमारो हन्तव्यः । नो चेन्मम चन्द्रहासधारया भविष्यस्या-हाराय' इति ।

गोविन्द०—(कर्णौ पिधाय) शान्तं पापं शान्तं पापम् । ईदृशे दुरात्मनो देशे वासोऽप्यात्महानिकरोऽस्माकम् ।

भवभूतिः—दयार्द्रहृदयो वत्सराजो भोजं प्रणम्य 'कुमार ! भुवनेश्वरी-प्रीत्यै मया प्रार्थ्यमानो वरो दातव्य इति पौनःपुन्येन पृष्टा वदान्यशिरोमणे स्तथास्त्विति लब्धवरः मुञ्जाज्ञां विज्ञाप्य कंचित्कालमस्मत्प्राणपरित्राणाय कानने निगूढं वस्तव्यं भवता' इति कुमारं प्रार्थयामास । भोजश्च कंचिच्छ्लोकं विलिख्य राज्ञेऽर्पयेति दत्त्वा दुःखयन् काननं गतः । वत्सश्च भोजदत्तं श्लोकं पैशाचविद्यया कलितं भोजशिरश्च राज्ञे प्रादर्शयत् ।

गोविन्द०—आः कष्टं कष्टम् । विदितमद्य भवन्मुखेन भोजप्रवास-कारणम् । तद्भवतु । अपि नाम विज्ञातो भवता भोजलिखितश्लोकः ।

भवभूतिः—विद्वन् ! आलोकितश्च मया ।

'मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति ॥'

गोविन्द०—श्लोकमेतं विलोक्य किं चिन्तयति दुरात्मा मुञ्जः ?

भवभूतिः—आर्य ! किं ब्रवीमि क्रुद्धस्य तस्य दुश्शेमुषीव्यवसायम् ? (दीर्घं निःश्वस्य)

देवीं शशिप्रभां तां च विलासामपि च स्नुषाम् ।
भोजक्रोधेन दुर्मेधाः कारागारे न्यवेशयत् ॥ २० ॥

गोविन्द०—(सनिर्वेदं मुञ्जमुद्दिश्य) अये पापिष्ठ ! महाकुलप्रसूतस्य ते कुतो विपरीतासीन्मनीषा ।

भवभूतिः—आर्य ! मन्ये यदि जानाति स मुञ्जः काननस्थं सत्यं हनिष्यति भोजेन सह वत्सराजं च ।

गोविन्द०—मन्ये न कश्चिदपि अवद्यो भविष्यति प्रोषितस्य भोजस्येति । यद्भोजाङ्गलक्षणं वीक्ष्य शारदानन्द एवमाह । यथा—

"पञ्चाशत्पञ्चवर्षाणि सप्तमासा दिनत्रयम् ।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः ॥" इति ।

भवतु, किं चिन्तयत्यत्र महामात्यो बुद्धिसागरः ?

भवभूतिः—स तु मुञ्जेऽन्तर्निलीनमत्सरेण वत्सराजेन संमन्त्र्य सिन्धुलप्रियवयस्यं लीलावतीव्यसनसञ्जातेर्ष्यम् आदित्यवर्माणं समरोन्मुखं कारयितुं कालिदासं प्राहिणोत् । अहमपि वृत्तान्तमेतं भूपालराज्ञ्यै चारुमत्यै निवेदयितुं गच्छामि ।

गोविन्द०—(दीर्घं निःश्वस्य) सखे ! कथमासीद्देव्योर्वृत्तान्तः ?

भवभूतिः—मुञ्जे कलितासूयुभिः[१] पौरजानपदैः कलहायिते नगरे कथञ्चिद्बुद्धिसागरः कारायाः निर्गमय्य सिन्धुलनिशान्तं निनाय ।

---

१. 'असूयुभिः' इति, 'कलितासूयैः' इति वा भाव्यम् ।

गोविन्द०— तर्हि सखे सत्वरं गच्छ । अहमपि भोजकुमारस्य राज्याभिषेकसमये आगच्छामि । (इति निष्क्रान्तौ ।)

॥ शुद्धविष्कम्भः ॥

(ततः प्रविशति भिक्षुवेषेण भोजः

भोजः—(दीर्घं निःश्वस्य)

कथं ते धर्माद्या द्रुपदसुतया साकमनघा
महारण्येऽज्ञाताः कथमपि विचेरुः कुरुकुलैः ।
मया तर्तुं शक्त्या न हि भवति कश्चिच्च दिवसो
विनेष्येऽहं यावन्मयि विधिदयोदेति महती ॥ २२ ॥

(विचिन्त्य सबाष्पगद्गदम्)

पिता मे स्वर्यातो मयि वसति बाले प्रभुवरः
पितृव्यश्चासूयां विरचयति राज्यार्थमनिशम् ।
प्रियालापोऽमात्यैरपि विघटितो यौवनपदे
वने वासः कष्टो जनयति परं दुःखमधुना ॥ २३ ॥

(समन्तादवलोक्य) आः ईदृशे समये वनश्रीः स्मारयति मे प्रेयसीं विलासवतीम् । यदियमद्य—

मन्देनैव समीरणेन नितरां मां वीजयत्यन्तिके
मल्लीकुड्मलकैतवेन कुरुते मन्दस्मितं सादरम् ।
सम्यग्दर्शयतीह तैस्सुरभिलैश्शोणाधरं पल्लवै-
र्गायन्तीं मृदु षट्पदप्रियवधूनिस्वानगुम्फेन नः ॥ २४ ॥

(प्रियामुद्दिश्य सकरुणम्) अयि विलासवति !

नालोकितासि सरसं न च भाषितासि
नालिङ्गितासि च मुदा न च चुम्बितासि ।

स्पृष्टासि नैव कुचयोरसि संभ्रमैस्त्वं
भुक्ता न चासि दयिते विधिदुर्विलासात् ॥ २५ ॥

(पुनर्निःश्वस्य) आः कष्टम्! किं करिष्ये? पश्य-

मनोजो मे पुष्पायुधचयकृशानुं परिसृजन्
समीरैरव्यक्तैरयि सुतनु दाक्षिण्यरहितः।
तुदन्नङ्गं सर्वं दहति सवसन्तोऽपि च वन-
प्रियामोदालापैर्जनयति भयं बर्हिनटनैः ॥ २६ ॥

अयि मनोहारिणि!

सौवर्णपिण्डसदृशं हृदयं मदीयं
संप्राप्यते घनपयोधररत्नमूषाम्।
वक्ष्ये किमद्य कुसुमायुधवह्निजालै-
स्सन्द्रावितं प्रसरतीव तव प्रतीकम्[1] ॥ २७ ॥

(सवैरस्यं दुःखयन्) अयि कान्ते!

आवयोर्यौवनं भीरु जगाम विलयं स्वयम्।
यन्मे कामगजेन्द्रस्य समासीत्सचिवोऽङ्कुशः ॥ २८ ॥

(क्षणं विचिन्त्य) मूर्खोऽहं महाप्रज्ञे बुद्धिसागरे दोषमारोपयामि। यदुपदेशेन खल्वहमापदमनासाद्य एतावन्तं कालं जीवितोऽस्मि। यदि विलासवतीविहरणकौतूहलेन तदन्तःपुरं प्रविष्टोऽस्मि, मुञ्जकृतिमोपायेन नाममात्रावशिष्टो भवामि। (कर्णं दत्त्वा) किमत्र श्रूयते कन्यकानामिवालापः? यस्तु

कर्णद्वारमुपेत्य मानसमहो पर्णाशनानामपि
स्वच्छन्दं स्ववशे विधातुमुचितो यश्चाकिशोरौहिषाः।
वीणाकोकिलवंशषट्पदशुकस्वानेष्वबद्धादरा-
श्चित्राकारकलेबराः स्थिरधियः श्रोत्रोत्सवं भुञ्जते ॥ २९ ॥

---

१. तव प्रतीकं प्रति, तदाकारतां प्राप्तुमित्यर्थः।

भवतु, का इमाः, किमर्थमिहागताः, पश्यामि। (इति न्यग्रोधतिरोहितात्मा पश्यन्नास्ते।)

(ततः प्रविशति सखीभ्यां सह लीलावती)

लीलावती—सखि कलहंसिनि ! समाहरस्व सुगन्धशीतलोदकम्, अयि वनप्रिये ! परिकल्पय कुसुमपल्लवफलादिकं, यदभ्यर्च्यते भगवती परदेवता मङ्गलदेवता।

भोजः—(साश्चर्यं दृष्ट्वा)

पुष्पायुधप्रियवधूर्हृदयङ्गमाङ्गैः
पद्मासनाननतटी शुभया गिरेयम्।
पद्मा मुरारिललना रुचिराङ्गदीप्त्या
बर्हिर्मुखेशदयिताऽखिलभाग्यपङ्क्त्या ॥ ३० ॥

(पुनर्निर्वर्ण्य) अपि नामेयमस्मद्धृदयविलासिनी विलासवती ? (सविचारम्) कथं तस्या लोकान्तरं गतं मां मत्वा महति व्यसनार्णवे निमग्नाया निकेतनं विहाय अत्रागमनस्य अवकाशः ? (पुनर्विचार्य) मन्येऽहं वत्सराजमुखाद्विदितास्मद्वृत्तान्ता नृपनिकेतननिवासं निरयवासं मन्यमाना मामेव शरणमभिलषन्ती कान्तारवासिनीं कमलवासिनीमभ्यर्च्य तत्कटाक्षप्रवाहेण कथञ्चन मामुपेतुमायातीति।

कलहंसिनी—भट्टिदारिए ! एसो गंधो, एदं सीअलोअअं। [भर्तृदारिके ! एष गन्धः, एतच्छीतलोदकम्।]

वनप्रिया—हला ! एआइ कुसुमाइ, इमाइ फलाइ। [हला ! एतानि कुसुमानि, इमानि फलानि।]

लीलावती—(अञ्जलिं कृत्वा, द्रव्याणि स्पृष्ट्वा) हला ! पूजिता मया मङ्गलदेवता।

कलहंसिनी–सहि! पत्थेहि जह होइ भट्टिणो जोओ। [सखि! प्रार्थय यथा भवति भर्तुर्योगः।]

भोजः— अयि मुग्धे! सन्नद्धे मयि किमितः प्रार्थनया?

लीलावती—(दीर्घं निःश्वस्य) सखि! अपि नाम अस्मत्प्रार्थनां सार्थयति माधवप्रियसहधर्मिणी?

भोजः— अयि मे मनोरङ्गविलासिनि! यदा स्मृता भगवती तत्रभवती भवत्या, तदैव सार्थ एव आवयोर्मनोरथः।

वनप्रिया—सहि! चिंतेहि सच्चं भअवदीए पणामो पसाआवहत्ति। [सखि! चिन्तय सत्यं भगवत्याः प्रणामः प्रसादावह इति।]

लीलावती (प्रणम्य)—

अयि भगवति सिन्धुराजकन्ये
मुरहरवक्षसि लक्षितस्तनार्द्रे।
नरपतितनयः करं मदीयं
कुरु करुणां परिपीडयेद्यथा त्वम् ॥ ३० ॥

भोजः—अहो मे बुद्धिशैथिल्यम्, यदियं विवाहार्थिनी काचन कन्यका मे पाणिगृहीते(ती?)ति चिन्तिता। (क्षणं विचिन्त्य) तथापि तस्यास्सौन्दर्यलहर्या स्वान्तं मे सम्यगाक्रान्तम्; किं करिष्यामि? (इति मूर्छति)।

लीलावती— (सहर्षं, स्वगतम्) कथं प्रार्थनामात्रेण मे हृदये कश्चन मङ्गलार्थः श्लोकः स्वयमेव ध्वन्यते। यथा—

वत्से शृणुष्व जनकेन समीहितो यः
शेते वटद्रुमतलं समुपेत्य भोजः।
भर्ता स एव तव सिन्धुलराजसूनुः
कन्दर्पदर्पहरसुन्दरपुण्यगात्रः ॥ ३१ ॥

(इति विचिन्त्य) मन्येऽहं भगवत्या मङ्गलदेवतयैव मे मनोमोदनार्थं गुम्फितं पद्यमिति। अपि वैष सत्यं भवति पद्यलक्षितोऽर्थः। (ससंभ्रममुत्थाय) सख्यावत्र स्थापयित्वा केनापि व्याजेन वटप्रदेशं गत्वा पश्यामि। (प्रकाशम्) हला! स्थातव्यं युवाभ्यामत्रैव। अहमभीष्टवरदवटवृक्षं प्रदक्षिणप्रणामादिभिः सभाजयित्वा यावदागच्छामि। (इति परिक्रम्य) अहो आगतैव। (वटमूलं विलोक्य) कोऽत्र भिक्षुश्शेते? (निर्वर्ण्य, साश्चर्यम्)—

किं वैष मन्मथसखः[1] किमु वेक्षुधन्वा[2]
किं वा स एव भगवान् मदनाभिरामः[3]।
किं गोपिकाकुलकुचाचलमर्दितोराः
किं फल्गुनः पृथुयशाः न च भिक्षुरेषः ॥ ३२ ॥

(सानुरागम्) अहो सौन्दर्यमस्य!

कुन्दालिश्रीर्वदनकमले कोमला दन्तपङ्क्तिः
नेत्रं किंचिन्मुकुलितमिदं निर्जितानङ्गशक्ति[4]।
बाहू वृत्तायतपरिघयोस्साम्यमासेदिवांसा-
वूरू दन्तावलकुलपतेर्नासिकागर्वहारी ॥ ३३ ॥

अपि च—

कमलनयनं कान्तं वक्त्रं प्रवाललताधरं
शशधरसमं श्मश्रुश्रेणीपरंपरयोल्लसत्।
करतलयुगं ज्याघाताङ्कं विशालमुरःस्थलं
नरपतिसुतं मन्ये भोजं तमेव सुलक्षणैः ॥ ३४ ॥

(समन्तादवलोक्य) नात्रान्यः कश्चन। न चान्यथा भवति भगवत्या वचनम्। (समीपमुपसृत्य) किमयं निद्रातीव दृश्यते। तरसाव-

---

१. वसन्तार्थकेन शब्देन 'मन्मथसखः' इत्येवंरूपेणात्र भाव्यम्। २. धन्वा धनुः; मन्मथः। ३. शिवः, कुमारो वा। कवेर्जन्मग्रामस्य निकट एव 'मैलम्'-नामकस्य कुमारक्षेत्रस्य सत्त्वान्मुहुः कवेः कुमारस्यात्र कीर्तनं भवति॥ ४. शक्तिः 'वेल्' इति मातृकायाम्। द्रमिलभाषायां 'वेल्' इति शूलायुध विशेषस्य नाम।

काशेन[1] द्रष्टुं शक्नोमि। (इति सम्यङ्‌ निर्वर्ण्य, अङ्गुलीयके भोज इति अक्षरं विलोक्य) अहो कटाक्षपरीवाहो मयि सिन्धुकन्यायाः! यदद्य—

भिल्लागार[2]मुपेत्य तैर्विरचितैराहारचर्यादिभि-
मैल्लद्वन्द्वविलोकनेन च पुनः कालं नयन्त्या मम।
फुल्लाम्भोरुहमुग्धसस्मितमुखश्रीभोजमूर्त्या मिथः[3]
श्रीपुत्रः कुरुते नितान्तमधुना दिव्योत्सवं नेत्रयोः ॥ ३६ ॥

(निःश्वस्य) निद्रालुममुं कथं प्रबोधयामि। असांप्रतमेवात्र स्थातुमस्माकं यच्छङ्कां विरचयतस्सख्यौ सावकाशेन। अपि च, न च लक्षणमिदं साधु कन्यकानां युवजनोपकण्ठे मिथोऽवस्थानम्। तदहं यथागतं गच्छामि। (कतिचित्पदानि गत्वा) आः कष्टम्! प्रस्थितमपि मे चरणमाशापाशेन निबध्य तस्मिन्नेव समाकर्षति चेतः। (पुनरुपसृत्य)

हृदयदयित मां विलोकयाशु
स्मरहतकायुधवह्निदग्धगात्राम्।
यदि न हि कुरुषे कृपावसिक्तां
ध्रुवमयि भिल्लकुलाधमो हरेन्माम् ॥ ३७ ॥

आः कथं सुप्रार्थितोऽपि न मां विलोकयति। (विचिन्त्य) तादृशी निद्रा! भवतु, उपचारव्याजेन प्रबोधयामि। (इत्युशीरहिमोदकं संसिच्य, सुगन्धचन्दनेनानुलिप्य) कथं न बुद्धयते कान्तः? तद्व्याहारेण प्रबोधयामि। अयि कान्त!

---

१. द्रमिलप्रयोगानुसारेणैवं प्रयुक्तम्।

२. क्षेत्रमिति पाठान्तरं दत्तम्।

३. मिथः-रहसि।

कान्तारसञ्चारपरिश्रमेण
क्लान्तं भवन्तं करुणाविहीना ।
निद्रापि संक्रम्य हठेन भुङ्क्ते
(निद्रामुद्दिश्य, सरोषहुङ्कारं)
विमुच्य नाथं व्रज दूरदेशम् ॥ ३८ ॥

(निर्वर्ण्य) निर्भर्त्सितापि निद्रा न जहाति । हा किं करिष्यामि ? (विमृश्य) कथमत्रागतया मया चिरायते समयः । तदद्यास्मिन्नस्मदागमनलक्षणं विधाय गच्छामि । (इति भोजाङ्गुलीयकं गृहीत्वा, वटपत्रमादाय ताम्बूलरसेन कौचिच्छ्लोकौ विलिख्य भोजवक्षसि निक्षिप्य सनिःश्वासं कतिचित्पदानि गत्वा, सख्यौ विलोक्य) हला ! प्रसादितो न्यग्रोधराजः । तद्गच्छामो निशान्तम् । (इति निष्क्रान्ता ।)

भोजः—(समाश्वस्य) अयि गूढपातकिनि ! मम हृदयसरोरुह-विलासकलहंसिनि ! क्वासि, कथं त्वां प्राप्नोमि ? (इत्युन्मीलिताक्षः घ्राणसुखं विदित्वा) कथमद्यायमपूर्वस्सुरभिः ? (इत्यात्मानं विलोक्य) आश्चर्यमाश्चर्यम् !

सिक्तोऽहं हिमवारिभिः सुरभिलैः काश्मीरजन्मद्रवैः
कस्तूरीघनसाररेणुरुचिरैश्श्रीगन्धसारैरपि[1] ।
वक्षो मे परिघोपमावपि भुजावाकल्पितौ किन्विदं
(शिखां स्पृष्ट्वा)
संश्लेषैर्गणिका[2]सुमैरपि शिखा मल्लीसुमैरावृता ॥ ३९ ॥

(विचिन्त्य) आः कष्टं कष्टम्, मन्ये विलासवत्येव मम विरहमसहमाना अत्यन्त-व्यसनेन त्यक्तकलेबरा परिगृहीतमोहिनीरूपा निद्रायां मामुपस्थिता । (इति दीर्घं निश्वस्य) कथं पुनरिमां द्रक्ष्यामि ? हा हतविधे !

---

१. गन्धसारो मलयजः ।

२. गणिका यूथिकापुष्पम्; 'मुल्लै' इति द्रमिडभाषायाम् ।

तादृशः किमु मे मन्तु[1]र्जनकं वापि सिन्धुलम् ।
विलोक्य न त्वया कस्मात् रक्षिता महिषी मम ॥ ४० ॥

(विलासवतीमुद्दिश्य) अयि कासि !

प्रिये कथमिहागता रहसि सन्तमालोक्य मां
विधाय सुरतोचितं कुसुमगन्धचर्चादिकम् ।
गता भवसि हा कथं स्मरशराहताङ्गं वने
विधाय न हि सांप्रतं पतिविसर्जनं तेऽधुना ॥ ४१ ॥

(सविनयम्)

यदि यासि विहाय मां प्रिये
वपुरुत्सृज्य ममापि जीवितम् ।
अनुयास्यति सत्यमुच्यते
न हि धर्मस्तव तादृशी क्रिया ॥ ४२ ॥

(सप्रार्थनम्)

एहि मे दर्शनपथं संविधेह्यवलोकनम् ।
कपोलतलमाघ्राय विधत्स्व परिरम्भणम् ॥ ४३ ॥

कुत इयं सविनयं प्रार्थितापि न भवति दृष्टिगोचरा। (विचार्य) न मन्ये सा मन्निकटमायास्यतीति । यदहं पाणिग्रहणप्रभृति तस्या दृष्टिपथ(थाद्)दूरं गतोऽस्मि । कथमेतत् ? (क्षणं विचिन्त्य) भवतु, प्रणम्य प्रसदयामि। अयि अज्ञातनिग्रहे विलासवति ! सापराधमपि मां तव पादमूले प्रणिपतन्तं क्षमयावलोक्य कृपयोपगूहय। (इति प्रणन्तुमुत्थितस्य भुजान्तरान्निपतितं वटपत्रमालोक्य, सहर्षं) किमपि मे सन्दिश्य गतेव। (इति पत्रमादाय वाचयति।)

---

१. अपराधः ।

अयि नाथ तवोर्मिकामिमां त्वा-
मिव यावन्मम मङ्गलोदयः स्यात् ।
अवलोक्य न यामि कामबाधां
स्मर मां त्वच्चरणां प्रदेहि दास्यम् ॥ ४४ ॥

हा ! नेयं विलासवती । अपि तु काचन असहमानवेदना कान्तार्थिनी । अत एव मच्चरणा मया कल्याणकाङ्क्षिणी मम दास्यं प्रार्थयते । किं तयापहृता ममाङ्गुलीयकमुद्रा यल्लिखितं तवोर्मिकामिमाम् अवलोक्य कामबाधां न यामीति । (कराङ्गुलिं विलोक्य) कथमूर्मिका न दृश्यते । (सानुस्मरणम्) सत्यमनयैव सद्वरकामया लक्ष्मीयजनपरया भवितव्यम् । किमुपरि लिखितम् ? (इति वाचयति ।)

न हि ते विरहं भवामि सोढुं
न हि गन्तुं यतते मनोऽधुना मे ।
अयि नायक यामि यत्र ते मे
गुरवस्सन्ति शुभाङ्ग देह्यनुज्ञाम् ॥ ४५ ॥

इति । आः कष्टं कष्टम् ! कुत्र गता सा ? कुत्र सन्ति तद्गुरवः ? (सस्पृहम्) तत्पदवीं पश्यामि । (इति सरणीं विलोक्य ।)

ध्वजश्रीवत्सचक्राब्जमत्स्यहंसादिलक्षणैः ।
महाराज्याभिषेकार्हैः पादमुद्रावलोक्यते ॥ ४६ ॥

तदहमनयैव पदव्या गच्छामि । (इति कतिचित्पदानि गत्वा) कथं न दृश्यते चरणविन्यासः, यदियं दूर्वापरिवृता पदवी । (कतिचित्पदानि गत्वा) आः किमितः कार्यम् ? यत्पदव्यां महान् शैलः ! भवतु, कथंचिच्छैलमारुह्य गच्छामि। (इति परिक्रम्य) अहो दृश्यते महती गुहा । मन्येऽहमियं सुग्रीवेण किष्किन्धागुहेव केनाचिद् राज्ञाधिष्ठितेति । (समन्ता-

दवलोक्य) महदिदमरण्यम् । (दूरे दत्तदृष्टिः) काविमौ द्रुततरावागच्छतः ? (इति पश्यति । ततः प्रविशति बाहुको जानुकश्च ।)

बाहुक :—याणुअ ! कहिं पेक्खामो होअं शे कहीअदि मिइं गए उणो आअअत्ति । [जानुक ! कुत्र पश्यावो भोजं स कथ्यते मृतिं गतः पुनरागत इति ।]

जानुक :—अये मए शे शुणुदे कहं ळाए अअपाळो एदं आअळेदुं अण्णं कळेइ अंहाणं । [अये मयाप्येतच्छ्रुतं कथं राजा जयपालः एतमाकारयितुमाज्ञां करोत्यस्माकम् ।]

बाहुक :—मियश्श उणो आअमणं ळोआणं होइ णाशाअ । ता णं दक्खिय अह्मे दंडेण ताळणं कळिअ माळअह्म । [मृतस्य पुनरागमनं लोकानां भवति नाशाय ; तस्मादेनं दृष्ट्वा आवां दण्डेन ताडनं कृत्वा मारयावः ।]

(इति परिक्रामतः ।)

जानुक :—मित्तअ ! अडविं दक्खीअवि एशे ण हि ळक्कीअदि । कहं एशे । [मित्रक ! अटवीं दृष्ट्वापि एष न हि लक्ष्यते, कथमेतत् ?]

बाहुक :—(भोजं दृष्ट्वा) अए, एत्थ पेक्ख कोवि दण्डए दक्खीअदि । णं पुच्छंह । [अये ! अत्र पश्य कोऽपि दण्डको[1] दृश्यते। एनं पृच्छावः ।

जानुक :—एशे भिक्खू, णेण पाएण दिंठो होइ । सच्चं भोए ।

[एष भिक्षुःअनेन प्रायेण दृष्टो भवति । सत्यं भोजः ।] (उभौ भोजमुपसृत्य) अए भाअ ! दिट्ठे किं तुए भोए ? यइ अह्मेहिं दिट्ठे णेण दंडेण

1. दण्डकः पीवरः । 'तडियन्' इति द्रविडभाषायां टीका दत्ता ।

शच्चं माळअह्म। [आये भ्रातः! दृष्टः किं त्वया भोजः, यद्यावाभ्यां दृष्टः अनेन दण्डेन सत्यं मारयावः।]

भोज :—(स्वगतम्) किमिमौ मुञ्जकिङ्करौ? अपि नाम वत्समुक्तं वने वसन्तं मां विदित्वा प्रेषितौ। अन्यथा कुतो निरपराधं मां हन्तुमनयोरुद्योगः? भवत्वेवं ब्रवीमि। (प्रकाशम्) भोः! कौ युवाम्? कुतो युवयोः तस्मिन् तादृशः क्रोधः?

जानुक :—(बाहुकमालोक्य, अपवार्य) मुक्खत्तणेण अह्माणं आशए एदस्शि कहिए। यइ एशे उन्तंदे ळंणा बिण्णाए शच्चं णो पाणश्श णाशो होइ। किं कळेंह। [(रे) मूर्खत्वेन अस्माकमाशय एतस्मिन् कथितः। यद्येष वृत्तान्तो राज्ञा विज्ञातस्सत्यं नः प्राणस्य नाशो भवति। किं कुर्मः?

बाहुक :—(अपवार्य) अए मज्जपाणेण शंआदमळविब्भमेहिं अह्मेहिं एदस्शि शच्चं बिणाविए। एशे अंह्माणं शामंदे। [अये मद्यपानेव सञ्जातमतिविभ्रमाभ्यामावाभ्यां एतस्मिन् सत्यं विज्ञापितम्। एतद्[1] आवयोस्सामन्त। (इति पानपात्रं पाषाणे प्रहरति।)।]

जानुकः—ले मुक्ख! अय्यं ते मद्धअं भिंदंमि, यत्तुए मे चशए भिंणे। (रे) मूर्ख! अद्य ते मस्तकं भिनद्मि, यत् त्वया मे चषको भिन्नः।

बाहुकः—मित्तअ! मा कुप्पेहि, एदश्श हद्धे ठिअं कवाळं ओहळिय ते ददामि। [मित्रक! मा कुप्येथाः, एतस्य हस्ते स्थितं कपालमाहृत्य ते ददामि।] (इति भोजकपालमाहरति।)

जानुकः—(भोजं विलोक्य, स्वगतम्) शे वशणं शोणे शुळक्कणे अ दिश्शइ। एशे मे घळणीए खुळणाशाए शुचेळए होउ। ता ओहळिश्शं।

---

१. मद्यम्।

[अस्य वसनं शोणं सुलक्षणं च दृश्यते । एतन्मे गृहिण्याः खुरनासाया-स्सुचेलको भवतु । तस्मादपहरिष्यामि ।] (इति काषायमाकर्षति) ।

भोजः—रे रे मैरेयपायिनौ ! कुतो मे कपालकाषाये समाकर्षथः ? न मुञ्चामि । वामेक एव प्रहरामि ।

बाहुकः—अए भिक्खो ! किं कहिअं तुए ? मंणेहि ते पाणे यमं गअति । [अये ! भिक्षो किं कथितं त्वया ? मन्यस्व ते प्राणो यमं गत इति ।]

भोजः—(मुष्टिमुद्यम्य) अये ! मुञ्च काषायं, नो चेत्तव मस्तको मुष्टिना भिद्यते ।

बाहुकः—ळे दंडय ! देहि कवाळं, यइ ण दीअदि शच्चं ते मद्धयकपाळं भिदामि । [रे दण्डक ! देहि कपालम् । यदि न दीयते सत्यं तेमस्तककपालं भिनद्मि ।]

भोजः—(सक्रोधम्) रे मूर्ख ! पश्य मे मुष्टिं, सत्यं व्रजसि भीमसेन-दर्शितां कीचकपद्धतिम् ।

बाहुकः—(सभयकम्पं, स्वगतम्) कहं एशे णहि माणुशे, किन्दु लक्कशे, अंहो दुवेवि माळेदुं अळं ता गच्छम्मि । [कथमेष न हि मानुषः, किन्तु राक्षसः । आवां द्वावपि मारयितुमलम् । तस्माद्गच्छामि । (इति निष्क्रान्तः ।)

जानुकः —(स्वगतम्) अंहो ! बळवंते एशे भिक्खू । कळी ण हिं ठाणे मह । उत्तंदं एदं रण्णि अअवाळे विणविअ शमाणंमि । [अहो बलवानेष भिक्षुः । तस्मादनेन कलि[1]र्न स्थाने । मम वृत्तान्तमेतत् राज्ञि जयपाले विज्ञाप्य समानयामि ।] (इति निष्क्रम्य जयपालेन पुनः प्रविश्य) देव !

---

१. कलिः-कलहः ।

पेक्ख एदवि। [देव! पश्य एतम्।] (इति भिक्षुं दर्शयति)

जयपालः—(भिक्षुं निर्वर्ण्य, स्वगतम्)

कट्यां काषायवस्त्रं करकमलतले भाति ताळीकपालः
दोर्मूले वीरलक्ष्मीः पुनरितरकरे ज्यालताघातलक्ष्म।
नो मन्ये भिक्षुमेनं ध्रुवमयमचलाधीशकन्याविलासी
यद्वा वल्लीविहारी[1] भवति किमथवा राजपुत्रस्स भोजः॥ ४७॥

भवत्वेषु यः कश्चिद्वा क्रमेण जानामि। अद्य सम्भावनीयोऽयं मया। तदहमुपसृत्य यथार्हं पूजयामि। (जानुकमालोक्य) अये जानुक! अयं महानुभावो भिक्षुः। अवश्यमस्माभिराराध्यः।

जानुकः—देव! शुणु णो वअणं। एशे ण हि भिक्खू, अवि दु लक्कशे। शे पूआ शच्चं अंहाणं अणत्थं कुळंइवि णिंदं कळेइ। पुव्वं ळक्कशे भिक्खुरूवं गदुअ शीदं ओहलीअ गए। अंयुणोवि भिक्खुळीवेण आअदुअ शुभद्दं गण्हीअ गए। तह एशोवि। अम्हे घळे वंटल कण्णआळीळावंरं (वई)। विमळिशणं कलिअ यहउइअं कलेहि।

[देव! शृणु नो वचनम्। एष न हि भिक्षुः, अपि तु राक्षसः। अस्मै पूजा सत्यमस्माकमनर्थं कुलस्यापि निन्दां करोति। पूर्वं राक्षसः भिक्षुरूपं गत्वा (कृत्वा) सीतामपसृत्य(हृत्य)गतः। अर्जुनोऽपि भिक्षुरूपेणागत्य सुभद्रां गृहीत्वा। गतः। तथैषोऽपि। अस्मद्गृहे वर्तते कन्यका लीलावती। विमर्शनं कृत्वा यथोचितं करोतु।]

जयपाल:—जानुक! प्रियं नः। यदयं राजलक्षणः शूरसार्वभौमः विजयश्रीनिवासश्च दृश्यते। (पुनर्निर्वर्ण्य) मन्येऽहमयमेव भविष्यति मे जामातेति। तदुपसरावः। (इत्युपसृत्य, सविनयम्) प्रियदर्शन! कस्त्वम्?

---

1. कुमारः।

मन्ये भूतिच्छन्नं हविर्भुजमिव भिक्षुवेषच्छन्नं महीभुजम्। शूरसूरस्य ते दर्शनेन विकसितानि मे मनोनयनसरोरुहाणि। नोचितस्तवैवंविधो वेषः। तदधुनात्मानममरेश्वरमिवाम्बराभरणैरलङ्कुरुष्व। (इति स्वयं गुहाया अनर्घाण्यम्बराभरणानि आहृत्यार्पयति।)

भोजः—(भूषणादिकं विलोक्य, स्वगतम्) आः कष्टं कष्टम्! हा विलासवति! हा मम हृदयालयदेवते! अस्मद्विवासमात्रेण अनाथा अभवः। यत्ते पाणिग्रहणसमये समलङ्कृतान्यखिलान्यप्याभरणानि अन्येषां हस्तं गतानि। हा प्रेयसि! कालवैषम्यमस्माकमीदृशम्। (इति नयनाभ्यां बाष्पमुत्सृज्य, प्रकाशम्) मास्तु मह्यं भिक्षवे। (इति तिरस्करोति।)

जयपालः—(स्वगतम्) सत्यमेष भोजकुमारः, यदयं सरस्वतीसदनादाहृतान्याभरणानि विलोक्य विषादेन बाष्पमुत्सृजति। अन्यथा कुतोऽस्य बाष्पोद्गमनकारणम्? भवतु, एनं शुभवचनैस्सान्त्वयन् प्रहर्षयामि। (प्रकाशम्) भो महावीर! भव मे प्रियवयस्यः। अहं जयपालो नामारण्यराजः, मालवेश्वरस्य सिन्धुलदेवस्य प्रियवयस्यः। (जानुकमालोक्य) अये सख्युर्निवासाय सत्वरं गुहामलङ्कुरुष्व।

जानुकः—तहंति। [तथा।] (इति निष्क्रान्तः।)

जयपालः—(भोजहस्तं गृहीत्वा) राजकुमार! विदितोऽसि त्वाममारयत् पापीयान् मुञ्ज इति भिल्लमुखाच्छ्रुत्वा परितप्तहृदये निश्चेतने परिभ्रमति मयि सपुलकोद्भेदम्—

जगाद कमला मह्यं दुर्गवल्मीकवासिनी।
मा शुचो वत्स भोजं तं पालयाम्यत्र कानने ॥ ४८ ॥

इति। अथ सञ्जातहर्षः सिन्धुलकुटुम्बवृत्तान्तविज्ञानाय वीरमल्लं प्रैषयम्। स च महामात्यबुद्धिसागरं दृष्ट्वा तद्दत्तपत्रिकां मह्यमदात्। यत्रैवं

लिखितं शृणु—स्वस्त्यस्तु राजवयस्याय जयपालदेवाय। भोजकृते त्वं मा खेदमगाः। यतः—

भोजस्त्रातो वत्सराजेन मुञ्जात्
सर्वे मुञ्जं हन्तुमिच्छन्ति पौराः।
आयात्यद्यादित्यवर्मा नियोद्धुं
सन्नद्धाऽऽस्ते सापि भूपालराज्ञी ॥ ४९ ॥

सखे! भवतापि यथार्हं साह्यं कर्तव्यमिति। ततोऽहं तावकीनं धनमखिलं मुञ्जोऽपहरिष्यतीति भिया सञ्जातत्वरः तद्रात्रावेव दस्युभिस्सर्वमाहृत्य गुहायां परिपालयामि। मालवराज्यकार्यधुरंधराश्च बुद्धिसागरनियोगेन मुञ्जं भीषयित्वा तव मातरं पत्नीं च मुञ्जहस्तान्मोक्षयित्वा शुद्धान्ते परिपालयन्ति। समागच्छ, गुहां प्रविशावः।

भोजः—तथा। (इति कतिचित्पदानि गत्वा) अतिरुचिरा दृश्यते गुहा। इयं तु—

पीयूषसारसमतोयतटाकरम्या
सान्द्रद्रुमायुतवनावलिनष्टतापा।
मल्लीजवन्तिगणिकादिलताशताढ्या
मन्दप्रसर्पिमलयानिलसन्ततास्ते ॥ ५० ॥

जयपालः—वत्स! भवन्तं भोजनादिभिरुपचरामि।

भोजः—राजन्! उपचरित एव। (इत्यग्रतोऽवलोक्य, स्वगतम्) अहो दृश्यते महती सभा! (सश्लाघम्)—

वज्रोपलैर्विरचिताखिलभित्तिदेशा
वैडूर्यरत्नखचितावनिभागरम्या।

गोमेधिकप्रकररञ्जितगोपुराढ्या
माणिक्यदिव्यमणिकल्पितदीपपङ्क्तिः ॥ ५१ ॥

इयं पुनस्सुधर्मेव सुरेश्वरैस्सुतरां सर्वसहेश्वरैरेवालङ्कर्तुं क्षमा।

जयपालः—भोजकुमार! अतिरहस्यमिदमावसथम्। अत्र त्वमतिरुचिरे नवरत्नखचितकुसुमान्वितकनकपर्यङ्के यथावकाशं सुखमास्स्व। अहमस्मत्सदनमुपगम्य पुनरागच्छामि। (इति निष्क्रान्तः।)

भोजः—(पर्यङ्कमालोक्य, दीर्घं निःश्वस्य)—

स्रक्चन्दनादिपरिकल्पितमेतदद्य
शय्यातलं प्रियवधूमतिसुन्दराङ्गीम्।
संस्मारयत्यहह तामपहाय किन्नु
भूपालभूपतनयामिह संविशामि ॥ ५२ ॥

हा प्रेयसि विलासवति मानसदेवते! इयमद्य—

मल्लीकुसुमैः कीर्णा
मर्दितकर्पूरकुङ्कुमरसार्द्रा।
मञ्जुलताम्बूलदला
तव संश्लेषं प्रबोधयति ॥ ५३ ॥

(पार्श्वतोऽवलोकय) अयि मे मनोमोहिनि!

रुचिरकनकपात्रे कुङ्कुमक्षोदसारः
मृगमदघनसारैस्सङ्गतो मे करौ ते।
त्वरयति कुचकुम्भे पत्रलेखां विधातुं
लिखितमपि कपोले मन्मथाद्वैतविद्याम् ॥ ५४ ॥

---

१ देवकुसुमम्—लवङ्गम्।

(पश्चिमतोऽवलोक्य) हा मे मनोरङ्गविलासिनि !

ताम्बूलीदलमेतदद्य मृदुलं पूगैश्च संचूर्णितैः
कस्तूरीघनसारदेवकुसुमैरेलाफलैरन्वितम् ।
विन्यस्तं प्रभुणा मदर्थमतुलं स्त्रीपुंसलीलावहं
दृष्ट्वा मे वदनं त्वदीयमधरं बिम्बोपमं वाञ्छति ॥ ५५ ॥

(इत्यग्रतो विन्यस्तां कनकमञ्जूषां दृष्ट्वा) अयि कान्ते !

एतामनर्घनवरत्नपिनद्धमञ्जु-
भूषासहस्रपरिपूरितमध्यभागाम् ।
मञ्जूषिकामनवलोक्य कथं मदीयां
जीवं दधासि दयिते भुवि मामिव त्वम् ॥ ५६ ॥

अयि प्राणदयिते ! कथं मर्षयामि ते (केयूरमालोक्य) केयूरमुद्रा-धारणविलम्बनम् ? अलं दुःखावहस्यास्य अवलोकनेन ।

(इति समन्तादवलोक्य)

दृश्यन्ते विमलान्यत्र रक्त(त्न)स्तम्भेषु भित्तिषु ।
मुकुराणि[1] मनोज्ञानि जनयन्ति मुदं मम ॥ ५७ ॥

(मुकुराण्यवलोक्य) अहो किसलयंत्यद्भुतानि । यत :

प्रतिमुकुरं भाति सभा
प्रतिसभमतिरुचिररत्नपर्यङ्कः ।
प्रतिपर्यङ्कं[2] शय्या[3]
प्रतिशयनं भोगयोग्यसामग्री ॥ ५८ ॥

---

१. नपुंसकलिङ्गं चिन्त्यम् । २. पर्यङ्कम् - खट्वा ३. शय्या - तूलशयनम्

(लज्जातिरेकेण सत्वरं पृष्ठतः प्रविष्टायाः लीलावत्याः प्रतिबिम्बं दर्पणेषु विलोक्य सविस्मयवितर्कम्)—

किं नाम माया जगतो विधातुः
किं वाप्सरोमोहनशक्तिरेषा ।
कन्दर्पदेवोन्मथितान्मनोऽब्धेः
जाताऽथवा किं मम कामलक्ष्मीः ॥ ५९ ॥

(कर्णं दत्त्वा) किमद्य कर्णानन्दकरी वाणी पृष्ठतः ? अयि हृदय ! अलं व्रीडया । यदि नालम्बसे धैर्यं सत्यं भिल्लाधमहृदयानुसारि भवसि । तन्महाराजकुमारमुपसर ।

भोजः—(श्रुत्वा मुखं परावृत्य सामोदं स्वगतम्)

भूषणभूषणमेषा
मदनमहीपालमदकरी शक्तिः ।
शृङ्गारसागरसुता
कामुकलोकपरदेवता हृद्या ॥ ६० ॥

(विचार्य) मन्येऽहं प्रियाविरहितं मां व्यसनार्णवादुत्तारयितुमस्मत्पितुः प्रियसखः कांचन कन्दर्पविलासदेवतामस्मन्निकटं प्रेषितवानिति । (पुनर्विचार्य) न हि न हि, यदियं ब्रवीति यदि नालम्बसे धैर्यं सत्यं भिल्लाधमहृदयानुसारि भवसीति । किं त्वनया हठादनिष्टजनाक्रमणभिया स्वाभिमतगुणग्रामसमग्रं मां मन्यमानया अत एव मामेव शरणं व्रजन्त्या भवितव्यम् । (सम्यङ् निर्वर्ण्य सानुस्मरणम्) अहो! इदमेव सद्वरलिप्सया लक्ष्मीधजनाय अभ्यागतं कन्यारत्नम् । (इति पश्यन्नास्ते ।)

लीलावती—अपि नाम सत्यं भवति सख्याः कान्तारपालिकायाः वचनम् ? यदाह मां तातपादः सत्कृतो गुहायां पर्यङ्के शेते तव भर्तेति (तथा भोजं विलोक्य सकौतुकम्)—

अहो दृष्टो दैवान्निखिलगुणसारश्शुचितमो
महाभोगानन्दानुभवसुखराशिः प्रियतमः ।
रसः शृङ्गाराख्यः कुसुमशरवेदान्तपठितः
स्वयं मूर्तीकृत्यागत इव पुरो मां सुखयितुम् ॥ ६१ ॥

(उपसृत्य साञ्जलिबन्धम्)

अयि नाथ कृपां कुरुष्व मह्यं
स्मरवेदान्तविचारितैर्विहारैः ।
यदि तत्र न मन्यसे ध्रुवं मे
शरणं नास्ति चितार्चिता कृशानोः ॥ ६२ ॥

अपि च पुरैव मया वरदवटवृक्षमूले वटपत्रपत्रिकामूलेन मे दैन्यं विज्ञापितम् ।

भोजः—(स्वगतम्) अहो ! अतिपरिशुद्धेयं कन्यका यदस्मत्परित्यागे दुष्टबलात्कारभीत्या धनञ्जयं प्रवेष्टु[1]मिच्छति ।

आनन्दयात्मानमलं विषादै-
र्वात्स्यायनोऽयं निजगाद योगी ।
सुप्रार्थयन्ती सुतनुं व्रजेत[2]
कामाद्यदि प्राणभयं व्रजन्तीम् ॥ ६३ ॥

(इति गाढमालिङ्ग्य कपोलं जिघ्रति ।)

लीलावती (सहर्षपुलकम्)—

आनन्दसिन्धुमवगाह्य मनोजवेद-
चूडाविधौ समुचितास्सुरतोपचाराः ।

---

१. मातृकायामबद्धम्—विशतुमिति । २. आत्मनेपदं चिन्त्यम् ।

एतेऽखिला विरचितास्सरसं यथावत्

किं वच्मि—

ऐक्यं मनोगतमभेद्यमितः प्रियान्मे ॥ ६४ ॥

(सप्रणयस्मितम्) आर्यपुत्र !

प्रतिशुक्रवासरमहं
प्रयत्नशतमयुतमपि समास्थाय ।
वल्मीकसिन्धुकन्या-
प्रसादमासाद्य तेऽस्मि दयिताद्य ॥ ६५ ॥

भोजः—(सहर्षानुरागम्) अयि दयिते ! किं ब्रवीमि ?

तपोऽध्वरार्चनादाननिरतैर्यो न लभ्यते ।
सः स्वस्त्रीसङ्गमानन्दः त्वत्तः प्राप्तो मयाधुना ॥ ६६ ॥

(क्षणं विचार्य सनिर्वेदं स्वगतम्) अहो ! मे कामावेशः यदहमज्ञातकुलदेशामनिरीक्षितात्मशीलामनुभूय आत्मानमानन्दयामि । भवतु पृच्छामि । (प्रकाशम्) कामिनि ! का-(इत्यर्धोक्ते लज्जाहृतचेतनः जिह्वामन्तर्नियम्य विमृश्य, स्वगतम्) किं प्रश्नेन ? विदितमेव अयं भिल्लराजः स्वदुहितरं मह्यमर्पयितुं कैतवेन मां कामविलासनिदानभूतां गुहामिमां प्रापय्य रहसि इमामपि प्रेषितवानिति । (सवैरस्यम्)

भूपालकन्यां परिणीय ताम-
प्यवीक्षमाणं रतिसुन्दराङ्गीम् ।
भिल्लात्मजायां कलिताभिमानं
चकार मां पञ्चशरो दुरात्मा ॥ ६७ ॥

(इति निःश्वसिति ।)

लीलावती (स्वगतम्)—कथमार्यपुत्रो मामालोक्य 'का' इत्युपक्रम्य जोषमास्ते ? (विमृश्य) ज्ञातं ज्ञातम्। अयमस्मत्कुलादिकं प्रष्टुमुपक्रम्य प्रश्नोऽयमप्यसाधुः कलितोपभोगायामिति व्रीडितो निःश्वसिति। अयं निःश्वासः मयि हेयकुलप्रसूतिसञ्जातनिर्वेदं च सूचयति। अपि च मामभिसारिकां मन्यत इव। यन्मां कामिनीति विशेषितवान्। तदहमेवं विज्ञाप्य पुनरस्य सौमुख्यं संपादयामि। (प्रकाशम्)—

स्तन्यं न पीतमयि कान्त मया कदापि

भिल्लस्त्रियः—

भोजः—(सविस्मयामोदम्, स्वगतम्) सत्यं बुद्धिः स्त्रीणां चतुर्गुणा इति, यदियं मां भिल्लोपभोगखिन्नमानसं विज्ञाय स्तन्यं न पीतमिति भिल्लकुलज्ञाननिवारणाय तत्कुलवासमात्रं सूचयति।

लीलावती—

—दयित! ते विचिकित्सया किम्।

भोजः—(स्वगतम्) अयि किं वृथालापेन ? कथं गच्छति तत्राभ्युदयपरिज्ञानमन्तरा विचिकित्सा ?

लीलावती—

दृष्टा वनेऽस्मि जयपालनृपेण पुष्टा

बाल्यादहं—

भोजः—(सानुस्मरणं, स्वगतम्) हन्त! किमियं लीलावती ? या किलास्मन्मात्रा मदर्थं शैशवे स्नुषाधिया परिपालिता, मयि सञ्जातेर्ष्ये(न) मुञ्जेन व्यापादयितुं भिल्लवर्गे समर्पिता। (सानन्दं विलोक्य) शेषमपि शृणुमः। (इति तूष्णीं तिष्ठति।)

लीलावती—

-सकुतुकं भवताद्य मुक्ता ॥ ६८ ॥

भोजः—(स्वगतम्) इयं गुणवद्वरालाभे दुश्शीलावलोकनादपि वीतिहोत्रभजनमेव वरमिति निश्चितधियस्त्वस्याश्चिरकालानुष्ठितवल्मीकलक्ष्मी-यजनफलरूपस्य स्वेप्सितगुणग्रामपरिपूर्णस्य मे प्राप्त्या आनन्दातिशयं सूचयति सकौकुतुकमिति। भवतु, तन्मयोपक्रान्तं प्रश्नमन्यथा परिपूर्य तन्मुखादेव विचिकित्सां व्यपोहयामि। (प्रकाशम्) अयि प्रिये! न कदाचिदपि विचिकित्सा। शृणु, का ते समाख्येति त्वां प्रष्टुमुपक्रान्तोऽपि तव संश्लेषा-नन्दाक्रान्तान्तरङ्गतया उपरि प्रष्टुं न शक्नोमि। (निःश्वस्य) किंच शृणु, वटदलावलोकनप्रभृति तव चिन्तया तान्तगात्रोऽस्मि। आस्तां तत्। भवत्वितो दुर्विघट्टनभोगानन्दायावयोर्भगवान् प्रणतार्तिहरः। कथय, किं ते नाम?

लीलावती (सविनयम्)—शृणोत्वार्यपुत्रः।

आह्वयन्ति जनास्सर्वे वत्से लीलावतीति माम्।
न जाने जननीं वापि जनकं वा कुलं मम ॥ ६९ ॥

भोजः—(सबहुमानानुकम्पम्) अय्यनुरागिणि! मम भाग्यवशा-द्धिल्लहस्तेभ्यो जयपालहस्तं प्राप्य परिपालितासि। (इति पुनर्गाढमालिङ्ग्य)

किं त्वं सन्तोषवार्धिः किमु मदनमहाराजसाम्राज्यलक्ष्मीः
किं वा मे भाग्यरेखा किमयि जनकयोर्मङ्गलाशावतारः।
किं वा त्रैलोक्यभूमा किमु मम हृदयाह्लादलीलाविलासः
किं स्त्रीसौन्दर्यसारः किमसि नयनयोः प्राक्तनी पुण्यपङ्क्तिः ॥७०॥

(इति मुखमाघ्राय कर्णं दत्वा) किमद्य श्रूयते काटवी[1] भारती?

(नेपथ्ये)

कथं वनमशेषं विचित्यापि न लक्ष्यते स पापीयान् भोजः। यदि दृश्यते, कल्प्यते करवालाहाराय।

---

१. काटवी - कटूनामियम्।

भोजः—(श्रुत्वा स्वगतम्) आः कथं विज्ञात इव मुञ्जेन। मन्ये मम निग्रहाय प्रेषिता दूता इति। किं तैः, यन्न तेभ्यो भीतिः। अपि त्वस्मद्दर्शने अनृतवादीति हनिष्यति वत्सराजः, अहमपि भवाम्यनृतप्रतिज्ञः।

लीलावती—(श्रुत्वा स्वगतम्) आः कष्टं कष्टम्! अस्मत्पाणिग्रहार्थिना शोणिताक्षेण प्रेषिता मल्ला आर्यपुत्रवधाय आगताः यत्प्रतिज्ञातमस्मन्मात्रा दुर्मुख्या यदि भोजं हंसि वत्सां तुभ्यमेव दास्यामीति।

भोजः—अयि प्रिये! पश्य मे विधिविपर्ययम्। यदावयोस्समागम एव सञ्जातो विरहावसरः। (इति शोचन्नास्ते।)

लीलावती—(स्वगतम्) कथमार्यपुत्रेण विदित एव अस्मन्मात्रा कलितो दुरुद्योगः। भवतु, सत्वरमेतमस्माद्देशान्निष्क्रामयामि। (प्रकाशम्) आर्यपुत्र! मा शुचः। कस्माच्चियोगीश्वराल्लब्धां गोपनविद्यां ते दास्यामि। तया आत्मानं सङ्गोप्य बहिर्न याहि। (इति कर्णे कथयति।)

भोजः—(सहर्षं गृहीत्वा) प्रिये! अनया गुप्तात्मा अत्रैव कानने वसामि। वर्धतामनुरागः। (इति निष्क्रान्तः।)

लीलावती—

आः कामदेव तव बाणशरासनाना-
मेषोऽञ्जलिर्विरचितो विनयेन साकम्।
यन्मामिमानि[१] नृपसूनुविलोकनाशा-
मुत्पाद्य तद्विपदमाशु विनाशयन्ति ॥ ७१ ॥

(इति कतिचित्पदानि गत्वा) कथमत्रैव मे पिता। (इति तरुषण्डे तिरोहिता तिष्ठति।)

(ततः प्रविशति जयपालः।)

जयपालः—(सविषादम्)

---

१. कामस्य बाणशरासनानां पुष्पमयत्वादेवं नपुंसकलिङ्गनिर्देशः।

अहं मेने भाग्यं यदयममरेशानसदृशो
युवा स्कन्दो वीर्ये वपुषि रतिदेवीसहचरः ।
स्वयं मे संप्राप्तो विषयमिह धाराधिपसुतः
यथा पार्थः कृष्णालयमतुलवीर्यश्शुभयशाः ॥ ७२ ॥

आः तादृशं महानुभावं निहन्तुं भिल्लान्प्राहिणोन्मे भार्या दुर्मुखी । यतः

निहतो रुद्रभूम्यां वा रोपितो वा मृतश्चिताम् ।
स जीवन्यत्र निर्याति तत्तद्राज्यं विनश्यति ॥ ७३ ॥

इति केचनामनन्ति । (लीलावतीं स्मरन् ।)

अयि वत्से ! किमिति कथयामि ते भाग्यवैपरीत्यम् ?

शतधृतिलिखितं फाले परिमार्ष्टुं कोऽपि शक्नोति ।
यत्त्वं सिन्धुलतनये वल्लभा भिल्लाय निश्चिता मात्रा ॥ ७४ ॥

(निःश्वस्य) भवतु तद् एतस्य दुरितस्य किं करिष्यामि ?

त्वद्दानमनसा वत्से स भोजः प्रापितस्सभाम् ।
मारितः पातकिन्या ते मात्राघं किमितः परम् ॥ ७५ ॥

भो वयस्य महाराजसिन्धुल !

मित्रमित्येव लोकेषु वृथा वाक्यं प्रचारयन् ।
भवाम्यहं सुतद्रोही भ्राता मुञ्जो यथा तव ॥ ७६ ॥

हा देवि शशिप्रभे !

मोचितः पुत्रहत्याया मुञ्जो वत्सेन तेऽधुना ।
तामहं शिरसा बिभ्रत् सञ्चरामि महीतले ॥ ७७ ॥

(विचिन्त्य) धिङ्मे जीवितम् ! अद्रिशिखरान्निपत्य प्राणांस्त्यजामि । (इति शैलशिखराधिरोहणं नाटयति) ।

लीलावती—(ससंभ्रमम् , स्वगतम्) मन्निमित्तमेव मे तातः प्राणांस्त्यजतीति तदहमद्य व्रीलां विहाय निवारयामि । (प्रकाशम्) तात ! अलं साहसेन ।

कुशली ते जामाता कुशलिन्यहमस्मि सैन्धुलालोकात् ।
तव च भविष्यति सार्थः मनोरथस्तं निवर्तस्व ॥ ७८ ॥

जयपालः — अहो किमयं मरुस्थले महावृष्टिः ! (परावृत्य लीलावतीं दृष्ट्वा, सहर्षम्) अयि वत्से !

किन्नु कामेषुकोदण्डं खण्डितं ते मनीषया ।
किन्नु भोजकुमारोऽपि मोचितो विपदस्त्वया ॥ ७९ ॥

लीलावती—अथ किम् (इत्यवाङ्मुखी तिष्ठति ।)

जयपालः—अलं व्रीलया । पूरयस्व सरस्वतीसुधाधारया मे श्रवणसंपुटम् ।

लीलावती—तात ! वल्मीकलक्ष्मीपूजावसाने भिक्षुरूपं भोजमालोक्य तत्र सङ्गतं मे चेतः । ततो भिक्षाय दातुमिच्छन्त्या जनन्या भोजवधे निश्चिते सति गुहा मे नेत्रेण परिशीलिता ।

जयपालः—(सहर्षम्) उपरि विज्ञातम्, अनुष्ठितं गान्धर्वमङ्गलम्, दत्ता च गोपनविद्येति । भवतु सत्वरमन्तःपुरं याहि । अहं धारां प्रविश्य मुञ्जं विजित्य भोजमभिषेचयामि ।

लीलावती—(सत्रासम्) तात ! नाहं त्वया त्यक्ता निशान्तं विशामि, यदस्ति मे शोणिताक्षाद्भीतिः ।

जयपालः—तर्हि वत्से ! त्वमपि स्वीकृतवीरपुरुषवेषा मयैवायाहि । (इति सत्वरं परिक्रम्य) अहो आगतावेव समीहितस्थलम् ।

जयपालः—

धारापुरीं समवलोकय नाकरम्यां
कल्याणभित्तिनवरत्नकवाटगुप्ताम् ।
आदित्यदीप्तिकलशावलिगोपुराढ्यां
मुञ्जप्रवेष्ट[१]बलपालितवीरसेनाम् ॥ ८० ॥

---

१ प्रवेष्टः-बाहुः ।

लीलावती—तात ! किमत्र युद्धाय संरम्भन्त इव योधाः । यतः

संक्रुद्धाः कटुभाषणाः घनरवा नानास्त्रशस्त्राशिरो-
गात्रत्राणकराङ्गुलित्रवपुषो भीमाट्टहासाः पुनः ।
श्मश्रुश्रेणिसमन्वितश्रुतियुगा व्यूहीकृतस्यन्दनाः
हस्त्यश्वैरपि पंक्तिभिः प्रतिपदं सञ्चारमातन्वते ॥ ८१ ॥

(नेपथ्ये)

भो भोस्सैनिकास्सज्जन्तु सर्वेऽपि यद्भूपालसेना वैशालिका च निरुन्धते नगरम् ।

जयपालः—वत्से ! भोजनिमित्तं मुञ्जे सञ्जातमत्सरा युद्धाय संरम्भन्ते राजानः । अत एव मुञ्जसेनापतिर्वत्सराज एवमाघोषयति । भवतु नगराभ्यन्तरं विद्ययान्तर्हितावेव प्रविशावः । (इति कतिचित्पदानि गत्वा) पश्य ते श्वश्र्वाश्शशिप्रभाया मन्दिरम् ।

सिन्धुलपञ्चास्यगुहा भोजाङ्कुरकनकपालिकापात्रम् ।
मुञ्जमहीपपिशाचप्रोत्सारणयन्त्रसंपुटमनर्घम् ॥ ८२ ॥

लीलावती—(सभयम्) तात ! पश्य कयाचिद् वृद्धया निरुद्ध्यमाना शोचन्ती बालिका समर्चितचिताग्निर्दृश्यते ।

जयपालः—(सत्वरं विलोक्य) कष्टं कष्टम् ! वत्से ! सपत्नीं पतिशोकेन वैश्वानरे पतितुं यतमानां निवारयति श्वश्रूर्वृद्धा शशिप्रभा ।

(उभौ सगात्रकम्पं विलोकयतः । ततः प्रविशति शशिप्रभा विलासवती च ।)

विलासवती—(सास्रम्) हा आर्यपुत्र ! क्वासि ? हा धारानगररत्नप्रदीप ! कथं ते पादकमलमनालोक्य जीवितुमुत्सहे ! अपि चतुरानन ! किमर्थं वृथा मामसृजः ! पश्य—

जननाज्जनको मृतिं गतो नयनाविषयं विवाहतः ।
पतिरप्ययि मे ऋतोः परं विपिनं गत इत्युदीर्यते ॥ ८३ ॥

आः कष्टम् ! (इति दीर्घं निःश्वस्य) आर्ये ! न स्थास्यते तद्धविरिव वपुर्मे, प्रतिगृह्यतां वीतिहोत्र ! (इति अग्निमुपसरति ।)

शशिप्रभा—(सत्रासकम्पम्) वत्से ! मा साहसं कुरु ।

त्वद्वाञ्छया हृदयमेतदहं वहामि
भोजं शिरीषसुकुमारतनुं विहाय ।
त्वं चापि यासि यदि मां परिहृत्य सत्यं
हास्येऽद्य जीवितमतो ज्वलिते चिताग्नौ ॥ ८४ ॥

लीलावती—अब्रह्मण्यमब्रह्मण्यम् ! तात ! नोपेक्षणीये आर्या श्वश्रूः, आर्या विलासवती च, तद्यथाविवेकं रक्षणीये ।

जयपालः—सत्वरमुपसरावः (इत्युपसृत्य, विद्यां विमुच्य, प्रणम्य) जयतु देवी । (विलासदेवीं विलोक्य) वत्से ! साहसं मा कुरु ।

लीलावती—(सविनयमुभे च प्रणम्य) अम्बाः मर्षयन्तु क्षणमात्रम् । (इति प्रार्थयति(ते) ।)

विलासवती—(स्वगतम्) कोऽयं बालः अस्मास्वतीव सञ्जातकरुणो दृश्यते ?

शशिप्रभा—कथं जयपालः ? अपि नाम कुशलम् ? वत्स ! पश्य मे दुरवस्थम् ।

राजा गतः पितृवनं तनयोऽतिबालः
प्राप्तो वनं श्रुतिपदाऽविषयः कठोरम् ।
वत्सा स्नुषा मम चितामधिरोढु[1]कामा
हास्ये ततोऽहमपि जीवितमेतयैव ॥ ८५ ॥

जयपालः—देवि, माऽश्लीलं कीर्तय । यतः

---

१. 'अयि रोद्धुम्' इति मातृकायाम् ।

कुशली भोजकुमारः कुशलिनमद्यैव तन्निशामयसि ।
मुञ्जं विजित्य तीव्रं सिन्धुलसिंहासनासीनम् ॥ ८६ ॥

विलासवती —(साश्रु सरभसमुपसृत्य) आर्य देव ! अपि नाम दृष्टो ममार्यपुत्रः, अपि नाम तव वनं प्राप्तः, अपि नाम मां व्यसनार्णवात्पारं नेष्यति, अपि नामाहमार्यपुत्रवदनकमलमालोकयामि ?

लीलावती—(सकरुणम्) देवि ! मा शुचः । अद्यैव ते वदनारविन्दं विकासयिष्यत्यार्यपुत्रः । अहमार्यपुत्रस्य प्रियवयस्यः[१] । अम्ब ! आवाभ्यां चिरमुषितमरण्यम् । स तु कानने कस्मिंश्चित् प्रदेशे निगूढं सञ्चरति, अवेहीदं रहस्यमिति ।

शशिप्रभा—वत्स जयपाल ! कोऽयं मे वत्सभोजस्य मङ्गलमित्रं प्रियवचना[२]मृतधारावर्षी महामेघः ।

जयपालः—देवि ! ते करुणामृतपूराभिषेकस्य पूर्णपात्रमयं मे स्वीकृत-कुमारो लीलाशुकः[३] ।

शशिप्रभा–(सम्यङ्निर्वर्ण्य) वत्स लीलाशुक ! भोजप्रियवयस्य ! आगच्छ (इत्याहूय गाढमालिङ्ग्य शिरस्समाघ्राय) तवागमनाद्भोजमेवागतं मन्ये, त्वद्वचनामृतधारां पौनःपुन्येन पातुमीहते मे श्रवणयुगलं, ते दर्शनमन्यदपि स्मारयति । (अङ्गसौष्ठवं निर्वर्ण्य) वत्स ! लीलाशुकरूपेण वयसा सौन्दर्येण च मे वत्सा लीलावतीव दृश्यसे ! हा वत्से लीलावति ! कथं गता, क्वासि ? (हाहेति प्रलपति ।)

लीलावती—(स्वगतम्) कथं देवी मामुद्दिश्यैव प्रलपति ? किमहमस्या-स्तनया, किन्नाम मे भ्राता भोजकुमारः, कथमेतत् ? (इति खिन्नमानसा प्रस्विन्नसर्वाङ्गा अवाङ्मुखी तिष्ठति ।)

---

१. तस्याः पुरुषवेषच्छन्नत्वादेवं पुंलिङ्गोक्तिः ।

२. 'नं' इति मातृकायाम्

३. लीलावत्याः पुंवेषे दत्तं तात्कालिकं नामधेयम् ।

जयपालः—(भ्रूसंज्ञयाऽवलोक्य, अपवार्य) वत्से ! मा चिन्तय (शशिप्रभां विलोक्य) देवि ! ते स्नुषा लीलावत्यपि कुशलेन वर्तते । तन्मास्तु ते शोकः ।

लीलावती—(स्वगतम्) किमयं मम शैशवे मामार्यपुत्रः परिणीतवान् ? तर्ह्यासीन्मयि सार्थः विवाहसमये कल्पितो ब्राह्मणानामाशीर्वादः ।

जयपालः—देवि ! सिन्धुलदेवस्य प्रार्थनां सत्यं सार्थयिष्यति भगवान् प्रणतार्तिहरः, यन्मण्डलाग्र[1]लक्षितगलोऽपि भोजकुमारो मम विषयमलंकरोति ।

(नेपथ्ये कोलाहलः । सर्वेऽपि कर्णं ददति । पुनर्नेपथ्ये ।)

आः ! आदित्यवर्मा मुञ्जयोधैस्समाक्रान्तः । किं करिष्यामः ?

शशिप्रभा—आः कष्टं कष्टम् ! वत्से ! अपि नाम श्रुतः पौराणामाक्रन्दध्वनिः ? आवयोर्यश्शरणं तस्य विपदि चिताग्निरेव नौ गतिः ।

जयपालः—देवि ! मास्तु वां भीतिः । यज्जयपालस्सेवकः इमाम् (इह वाम् ?) अर्थे जागर्ति । अपि च श्रोतव्यो मे वत्सस्य विक्रमः । यस्तु

इन्द्रमपि हन्तुमुचितः विश्वसृजश्चापि बन्धने शक्तः ।
यदि विशति युद्धभूमिं त्रिपुरहरश्चापि भवति शरणार्थी ॥ ८७ ॥

तदावामादित्यवर्माणं मोचयावः ॥

(इति निष्क्रान्तौ ।)

शशिप्रभा—(सविषादम्) वत्से विलासवति ! लीलाशुकालोकनप्रभृति मे चेतना लोलायते । अन्तश्शरीरमपि किमपि व्याकुलयति । यद्दर्शनेन लीलावती मम नयनयोः पुरतः निश्चला निबद्धेति निःश्वसिति ।

विलासवती—आर्ये ! अहमेवं मन्ये लीलावत्येषा लीलाशुकवेषं बिभर्तीति । यया भिल्लाहतया जयपालेन पुत्रवत्परिपालितया तस्मादुपलब्ध-

---

१. 'मलाग्र' इति मातृकायाम् । मण्डलाग्रः खड्गः ।

शस्त्रविद्यया आर्यपुत्रेण कानने परिणीतया च भवितव्यम्। यदाह जयपालः-देवि! ते स्नुषा लीलावत्यपि कुशलेन वर्तत इति। (विमृश्य) सत्यम् आर्ये! अम्बां मां च आश्वासयितुं लीलावतीं वीरपुरुषवेषां कारयित्वा प्रेषितवानार्यपुत्रः।

(नेपथ्ये शङ्खध्वनिः।)

विलासवती—निमित्तमनुमोदते।

शशिप्रभा—(विचिन्त्य) वत्से! विमुक्त इव आदित्यवर्मा, यदुज्जयिनी-सेनायां श्रूयते दुन्दुभिध्वनिः। (पुनर्नेपथ्ये) धवलशङ्खनिनादः करताडन-शब्दः, कलकलारवश्च।

विलासवती—(ससंभ्रमम्) अम्ब! विजयशीलेव मे जननी यद्भूपालसेना विजयशङ्खं प्रध्माय शात्रवपराजयं प्रचुरयति करताडनेन।

(पुनर्नेपथ्ये)

भो भो: उच्छ्रीयतां विजयतां विजयवैजयन्ती, अलङ्क्रियन्तां नगरप्रतोल्यो राजसभा च, यद्देवी चारुमती मुञ्जं विजित्य आदित्यवर्मणा सह देवीगृह-मागच्छति।

शशिप्रभा—(विलासवतीं हस्ताभ्यामालिङ्ग्य स्वचेलाञ्चलेन नयनाम्बु संमृज्य) वत्से! अपि नाम श्रुतं महामात्यबुद्धिसागरवचनम्? तद्विस्मृत-सकलशोका सुखसञ्जातसामन्तविजयशालिनी मम जननी, संलापकाङ्क्षिणी भव। अद्यैव वत्सो भोजकुमारः तव वदनकमलमादित्य इव विकासयिष्यति।

(ततः प्रविशति चारुमती विशाल(ला)राजदम्पती च।)

चारुमती—(सहर्षम्) राजन् आदित्यवर्मन्!

धारा जिताऽद्य युधि मालवराजधानी
मुञ्जो गतो हिमगिरिं तपसे निराशः।
आनेतुमत्र विपिनात्स्वयमेव भोजं
सेनापतिर्द्रुततरो नगरात्प्रयाति ॥ ८८ ॥

तद्वयं भोजशोकाग्निदग्धमानसां प्रजावतीं वत्सां विलासवतीं च आश्वासयामः।

(इत्युपसरन्ति)

शशिप्रभा—वत्से इत एव मे प्रियननान्दा वैशालिकराजदम्पती च, तत्सज्जे भवावः।

(इत्युत्तिष्ठतः।)

चारुमती—प्रजावती जयतु देवी। वत्से विलासवति ! मुञ्च शोकम्। (इति नयनाश्रु परिमृज्य उत्सङ्गमारोपयति।)

आदित्यवर्मा—जयतु देवी वत्सा विलासवती च।

शशिप्रभा—राजन् आदित्यवर्मन्! अपि नाम कुशलेनायासि? अपि नाम मे श्रुतिपुटे सुधाधारया पूरयसि ?

विलासवती—अम्ब ! (इति दुःखपरम्परया दिशोऽष्टौ शब्दापयन्ती नयनाश्रुधारया चारुमत्याः क्षौमं क्षालयति।)

चारुमती—वत्से ! अलं शोकेन। किं तस्य स्मरणेन सत्वरमवलोकयसि तव प्रियतमं मम भ्रातृव्यं वत्सं भोजकुमारम्? (इति अश्रूणि परिमार्जयति।)

आदित्यवर्मा—देवि ! मुच्यतां शोकः। यतः

फीट्कारे मददन्तिनां निजबलं संक्षोभयत्युच्चकैः
हेषाभिर्युधि घोटकस्य नितरां क्षीणे च धैर्ये पुनः।
चापज्यातलनिर्यदाशुगरवैर्विद्राव्यमाणो जवा-
दाहूतः प्रतिनादतो हिमवतो दर्या स मुञ्जो गतः॥ ८२ ॥

अपि च—

अद्यैवामलवैदिकद्विजकराम्भोजस्फुरद्गूढपाद्[1]-

रत्नस्वर्णघटीसहस्रविगलद्गङ्गाम्बुपूरैस्सह ।

अम्ब त्वन्नयनाम्बुजप्रसृमरैरानन्दबाष्पैर्ध्रुवं

जन्या भोजमुपस्थितं मणिमये संस्नापयस्यान(स)ने ॥ ९० ॥

पद्मावती—जेउ देवी। [जयतु देवी।] (इति शशिप्रभां प्रणम्य विलासवतीं दृष्ट्वा) वच्चे सुहिणी हो इत्ति। [वत्से! सुखिनी भव] (इति पुष्पं ददाति।)

विलासवती—(सप्रणामम्, पुष्पं गृहीत्वा) देवि! मन्ये तत्रभवत्या अनुग्रहपूर्वकपुष्पप्रदानमेव मम भर्तुरपि मङ्गलोदयहेतुः।

(इति सास्रमवाङ्मुखी तिष्ठति।)

पद्मावती—(विलासवतीमुरसङ्कमारोप्य शिरस्समाघ्राय) जअउ देवी। वच्चे सुहिणी होइ! हणं (तुज्झाण) अद्धे मह रंणो वि मणं हद्धिमहिदं तडाअस्स उअअं विअ आविळं अज्ज मुंजविअआदो पसंणं आसी। ता मुंचेहि सोअं। [जयतु देवी। वत्से! सुखिनी भव। [वत्से] युष्माकमर्थे मम राज्ञोऽपि मनः हस्तिमथितं तटाकस्य उदकमिवाविलमद्य मुञ्जविजयात् प्रसन्नमासीत्। तस्मान्मुञ्च (स्व)शोकम्।]

शशिप्रभा—(निःश्वस्य) राजन्! किं ब्रवीमि? सञ्जातं मे मानसं व्याकुलम्। शृणु—

भर्तुर्नाशात्पुत्रशोकाद् रिपूणाम्[2]

ऋद्धेर्जन्या[3] दैन्यवक्त्रावलोकात्।

अश्रौषं यन्मु[4]ञ्जयोधैर्हतोऽसी-

त्ये[5]तद्दुःखं नैव शक्नोमि सोढुम् ॥ १ ॥

---

१. गूढपाद् नागः। तद्रत्नं माणिक्यं तदुपस्वर्णघटीत्यन्वयः।

२. 'शोकाद्रिपूर्णा' इति मातृकायाम्। ३. जनीस्नुषा।

४. 'अश्रूषम्' इति मातृकायाम्। ५. एत्ये॰ इति मातृकायाम्।

आदित्यवर्मा—अम्ब, किं ब्रवीमि ?

क्रान्तो योधैर्यमभटनिभैस्साट्टहासं च कारां
नीतो दूतैः किमपि किमपि प्रोच्यमानोऽधमैस्तैः ।

तादृशीमवस्थामासेदुषि मयि—

(सपुलकोद्भेदम्)

व्याधौ कौचिच्छिवसमबलौ द्रावयित्वारिसैन्यं
कारागारादहह कृपया मोचयामासतुर्माम् ॥ ९२ ॥

(सहर्षम्) शृणोतु देवी, तयोरेकः लक्ष्मीपुत्र इव सुन्दरशरीरो बालश्च ।

(शशिप्रभा विलासवती च सावधानं शृण्वतः ।)

आदित्यवर्मा—तस्य शौर्यं त्रिपुरघ्नेनापि स्तोतुमशक्यम् । यतः

यत्र माणवको याति रिपुस्तस्मात्पलायते ।
आदानस्याशुगानां वा प्रयोगस्यापि किं फलम् ॥ ९३ ॥

शशिप्रभा—(अपवार्य) विलासवति ! अयं लीलाशुक एव ।

विलासवती—(अपवार्य) आर्ये ! लीलावतीति कथय । विज्ञातः खलु तस्य विक्रमो जयपालदेवमुखात् ।

पद्मावती—(सस्पृहम्) अय्यउत्त ! तारिसमुवआरिणं पेक्खिदुं वच्छेइ मे लोअणजुअळं । [आर्यपुत्र ! तादृशमुपकारिणं प्रेक्षितुं वाञ्छति मम लोचनयुगलम् ।]

शशिप्रभा—(अपवार्य) वत्से ! यदि दृष्टो लीलाशुकः स्मर्यते नया (मया) लीलावती ।

विलासवती—(अपवार्य) आर्ये ! मन्येऽहं विजयं निवेदयितुं लीलाशुकेन सह जयपालदेवस्समायास्यसीति ।

(ततः प्रविशति जयपालदेवो वीरवेषा लीलावती च ।)

जयपालदेवः—(शशिप्रभामुपसृत्य) जयतु देवी (इति प्रणमति ।)

लीलावती—(उभे अपि प्रणम्य, सानन्दं विलासवतीं पश्यन्त्यास्ते ।)

शशिप्रभा—वत्स जयपाल ! अगतिकाया मम त्वमेव सर्वस्वमसि । किमितो ब्रवीमि । वत्स लीलाशुक ! (इति लीलावतीमाहूय आलिङ्ग्य) त्वमेव मम प्रियपुत्रोऽसि । मन्येऽहं यदि दृश्यते भोजः तेन सह सिंहासने स्थास्यसीति ।

विलासवती—(हर्षपरवशेन चक्षुषावलोक्य) वत्स ! लीलाशुकेत्यानन्दाश्रु वर्तयन्ती हर्षस्मितान्तरङ्गा पश्यन्ती तिष्ठति ।)

आदित्यवर्मा—(स्वगतम्) कथमिमौ देव्या विलासवत्या च विज्ञातविक्रमाविव ! (जयपालमालोक्य, प्रकाशम्) वीर्यविक्रमनिधे ! कस्त्वम् ? न जानाम्यहं, जानाति देवी वत्सा च मन्येऽहमुज्जयिनीनाथो भगवान्महाकालेश्वरो मम दुर्दशां विलोक्य करुणया व्याधरूपेणावतीर्ण इति । भवतु कोऽयं देवसेनापतिरिव दृश्यते वत्सः ।

पद्मावती—(लीलावतीं विलोक्य, अपवार्य) अय्यउत्त ! एसो मह लीलावई विअ दिसइ । से विळोअणादो मह हिअअं (किं) वि उवाहिं अणुहोइ । (प्रकाशम्) हा वच्छे । कहिं गया कहिं चिट्टेसि ? हा महाकाल ! मह कुलदेवदे ! तुह कलुणाए एसो अदूधु वा ळीळावई कहं अज्जपुरइ मे सव्वं लोअणं । (लीलावतीं वीक्ष्य) अए वच्छे ! पुरदो चिट्ठ, आअच्चे हि मं समआ । (इत्युन्मत्तहृदयेव प्रलपति ।)

[आर्यपुत्र ! एष मम लीलावतीव दृश्यते । अस्य विलोकनात् मम हृदयं कमप्युपाधिमनुभवति । (प्रकाशम्) हा वत्से ! कुत्र गता कुत्र तिष्ठसि ? हा महाकाल ! मम कुलदेवते ! तव करुणया एषः अस्तु वा लीलावती । कथमद्य स्फुरति मे सव्यं लोचनम् ! अये वत्स ! मे पुरतस्तिष्ठ आगच्छ मां समया ।

जयपालः—(आदित्यवर्माणमालोक्य सविनयमञ्जलिं कृत्वा) प्रसीदतु देवः। अहं जयपालो नाम कान्ताराजो भिल्लः। अयं तु तव औरसः पुत्रो, मे स्वीकृतः पुत्रः लीलाशुकः।

पद्मावती - (श्रुत्वा, स्वगतम्) कहं अय्यउत्तस्स ओरसो पुत्तओ! [कथमार्यपुत्रस्य औरसः पुत्रः!]

आदित्यवर्मा—राजन्! कथमपुत्रस्य ममैकदारव्रतस्यौरसः पुत्रः। (इति लीलावतीं विलोकयति।)

जयपालः—(लीलावतीं विलोक्य) वत्से! आगतस्ते कुमारभोजस्येव शुभसमयः, तन्मोचय कवचम्। अयं मे पिता, इयं तव माता (इत्यङ्गुल्या आदित्यवर्माणं पद्मावतीं च प्रदर्श्य)। मुञ्जद्रोहेण भिल्लगता, मया स्वीकृता, परिपालिता च। तस्मान्मम स्वीकृतः पुत्रोऽसि। (राजानमालोक्य) देव! स्वीकरोतु वत्साम्। इयं भोजकुमारेण मम गुहायां गान्धर्वेण परिणीता। (इत्यर्पयति)।

राजदम्पती—(लीलावतीमुत्सङ्गे समारोप्य, शिरस्समाघ्राय) वत्से! (इत्यानन्दाश्रुधारयाभिषिच्य हर्षस्तिमितान्तरङ्गौ तिष्ठतः।)

शशिप्रभा—(अग्रतोऽवलोक्य, ससंभ्रमम्) कथमित एवागच्छति मम वत्सः, सेनापतिना मन्त्रिबुद्धिसागरेण च!

(ततः प्रविशति बुद्धिसागरवत्साभ्यां भोजः।)

भोजः—(बुद्धिसागरमालोक्य) आर्य! तत्रभवतां भवतामाशिषाऽसादितोऽहमायुषम्। निस्तीर्णश्च दुस्तरः कान्तारवासः।

निगमोदितपूर्वदेवतायाः चरणाम्भोरुहमातनोति कीर्तिम्।
मकुटादपि धारितान्नृपाणां तदनुज्ञापय वन्दनाय मातुः ॥ ९४ ॥

बुद्धिसागरः—सत्वरमनुष्ठीयतां, यदिष्टदेवता वन्द्यते मङ्गलारम्भेषु ।

वत्सराजः—इत इतो [1]गच्छतु धारानगरभूषणम् । यदत्र सज्जते साक्षात्परदेवतेव दर्शनार्थिनी देवी ।

भोजः—(उपसृत्य) अम्ब ! अभिवादयते भोजः ।

शशिप्रभा—वत्स ! चिरंजीव, सदा सिंहासनाधिष्ठितो भव । (इति हस्ताभ्यामादायोत्सङ्गे निवेश्य)

दिष्ट्याऽद्य त्वामधिगतवती भोजवत्सं चिराय
दृष्ट्वा प्राणान् कथमपि वधूवक्त्रमालोकयन्ती ।
बिभ्रन्ती[2] ते वदनकमलालोककामा—
(बुद्धिसागरं प्रदर्श्य)
गिरैषां
दैवात्तेषां गिरमिह भवान्सार्थयन्नागतोऽसि ॥ ९५ ॥

(इत्यानन्दाश्रुभिरभिषिच्य) वत्स ! पश्य ।

विलासवती—(सबाष्पगद्गदम्) आर्यपुत्र ! (इति भोजस्य पादयोर्निपत्य मूर्च्छति । भोजः हस्ताभ्यामुत्थाप्य समाश्वास्य)

धैर्यं प्राप्नुहि राघवं धरणिजामासेदिवांसौ वनं
रक्षोनायकवञ्चनाविघटितौ संक्षोभितौ राक्षसैः ।
दैवाल्लब्धसुखोदयौ स्मरहृदा नष्टं च कष्टं तथा
प्राप्तो नौ सम(य)श्शुभाभ्युदयकृत्सन्तुष्टचित्ता भव ॥ ९६ ॥

(इति तत्पार्श्वतश्चारुमतीं विलोक्य प्रणमति ।)

चारुमती—(अस्रमुन्मृज्य) अयि प्रियजामातः !

---

१. "आगच्छतु" इति युक्ततरं स्यात् । २. 'बिभ्रती' इत्येव साधु ।

पुनर्जातं मन्ये कटुकव(प)टचर्याविषमयात्[1]
प्रदाको[2]र्मुञ्जात्त्वां यदुवर इवाघा[3]स्यकुहरात् ।
(हस्ताभ्यामालिङ्ग्य ।)
सुखी स्था वत्सेतो[4] वस चिरसमा मे तनुजया
महीं प्राप्यानर्घां रघुपतिरिव क्षोणिसुतया ॥ ९७ ॥

अपि च, भव इतःप्रभृति त्रिदशेश्वर इव । (इत्यानन्दाश्रु प्रवर्तयति ।)

भोज :—(जयपालं विलोक्य, सहर्षविनयादरमञ्जलिं बद्ध्वा)

या पुत्रभार्याजामातृमित्रामात्येषु बन्धुषु ।
प्रीतिस्सा मयि विन्यस्ता पितृसौजन्यचिन्तया ॥ ९८ ॥

देव ! ते करुणावलोकनेनैव मयि परिणता सिन्धुलराज्यलक्ष्मीः (दक्षिणपार्श्वे आदित्यवर्माणं पद्मावतीं लीलावतीं च दृष्ट्वा, स्वगतम्) कथं अत्रैव मे प्रेयसी ! (विमृश्य) साम्प्रतमियमनयोः पुण्याङ्कुरः ! (इति सानन्दं विलोकयति ।)

आदित्यवर्मा—(सप्रमोदम्) वत्स भोज ! मे प्रियजामातः ! चिरचिन्तितस्त्वं भाग्यवशात् प्राप्तोऽसि । मम सिन्धुलदेवस्य चावा(भ्यां) चिन्तितं दैवेन समर्थितम् । (इत्यानन्दधारयाभिषिच्य) गान्धर्ववर्त्मनोढामपि मे नयनानन्दाय ब्राह्मेणोद्वहस्व । (इति लीलावतीं भोजोत्सङ्गे निवेश्य) अद्य धाराराज्याभिषेकेण सहाभिषेचयाम्युज्जयिनीराज्याय च ।

बुद्धिसागरः—(ससंभ्रमम्) वत्सराज ! संमेलय सभाम् ।

वत्सराजः—(निष्क्रम्य पुनः पण्डितैः मन्त्रिवर्गेण च प्रविश्य) महाराज ! स्वर्यतां यदद्य सुमुहूर्तमिति सज्जते मौहूर्तिकमन्त्रिपुरोहितपण्डितवर्गः ।

---

१. °मय इति मातृकायाम् । २. 'प्रदाको' इति मातृकायाम् । पृदाकुः सर्पः ।
३. अघः—अघासुरः । ४. 'वत्से इत' इति मातृकायाम् ।

आदित्यवर्मा—स्वयमेव सिंहासनमलङ्करोति ।

वत्सराजः—अहो अभिषिक्त एव भोजकुमारः ।

गोविन्दपण्डितः—(सविस्मयम्)

आदित्यकोट्याः प्रभयेव सर्वाः
दिशोऽपि भोजस्य किरीटभासा ।
सभा विभाति स्मितदीप्तिवक्त्रे
देव्यौ सहर्षं नृपपार्श्वभागे ॥ ९९ ॥

कालिदासः—(आ(सा)नन्दबाष्पविसरम्)

अद्य धारा सदाधारा सदानन्दा सरस्वती ।
पण्डिता मण्डितास्सर्वे भोजे सिंहासनं गते ॥ १०० ॥

भवभूतिः—देव धारानगरेश्वर !

संपदमतुलां कीर्तिं सन्ततिमपि धर्मकार्यनिरतधियम् ।
निर्जरविप्रश्रद्धां भजस्व दीर्घायुषा विजयम् ॥ १०१ ॥

जयपालः—

अस्मद्राज्यमकण्टकं मम सुता लीलावती भुञ्जतां
यद्यद्वस्तु मयाहृतं तदखिलं यायाद्विलासां सतीम् ।
दीर्घायुर्भव सिन्धुलात्मज पुनः किं ते करोमि प्रियं
सा वल्मीकविलासिनी जलधिजा पायान्निशान्तं तव ॥ १०२ ॥

बुद्धिसागरः—

वत्स त्वं विरचय पण्डिताङ्घ्रिपूजां
मा तेऽङ्गं लगतु पराङ्गनासमीरः ।
मा त्यागं कुरु जननीगिरोऽतिगुर्व्याः
पत्नीभ्यां सह विहरानुरागपूर्वम् ॥ १०३ ॥

अयि किं ते भूयः प्रियमुपहरामि ?

भोजः—

रिपुरपि गतो राज्यं प्राप्तं विलासवती प्रिया
शुभगुणनिधिर्लक्ष्मीर्भूमिर्मया सह सङ्गता ।
तव करुणया लीलावत्या बभूव करग्रहः
भवति जननी सेवाश्लाघ्या प्रियं किमतः परम् ॥ १०४ ॥

अद्य राज्यपरिपालनाय यतामहे । तथापीदमस्तु भरतवाक्यम्—

नार्यस्सन्तु पतिव्रता भुवि सदा भूपालपुत्री यथा
वाञ्छन्त्वार्यसुतोदयं पुनरिमाः देवीव लीलावती ।
धर्मे दत्तधियो भवन्तु नृपतिर्भोजो यथा भूमिपाः
लाल्यन्तां कवयश्च भूमिपतिभी रामेण देवा यथा ॥ १०५ ॥

(इति निष्क्रान्तास्सर्वे ।)

इति बालकिंगृहपुरीतिलकायमानवाधूलकुलतिलक-
श्रीसुन्दरवीररघूद्वहगुरोः कृतिषु
श्रीभोजराजाङ्कस्समाप्तः ॥

पात्राणि

पुमांसः

भोजराजः	— धारापुरीशस्य सिन्धुलस्य पुत्रः ।
सिन्धुलः	— मुञ्जस्य ज्येष्ठभ्राता, भोजपिता ।
मुञ्जः	— भोजस्य पितृव्यः, भोजद्विट् ।
बुद्धिसागरः	— सिन्धुलस्य मन्त्री, भोजपक्षपाती ।
वत्सराजः	— मुञ्जसेनाधिपतिः, भोजरक्षकश्च ।

आदित्यवर्मा	—	लीलावत्याः पिता, अवन्तिनाथः ।
जयपालदेवः	—	भिल्लराजः, सिन्धुलसखः, लीलावतीरक्षकः ।
लीलाशुकः	—	वीरमल्लरूपेण आदित्यवर्मरक्षिता लीलावती ।
गोविन्दपण्डितः, भवभूतिः, कालिदासः	}	भोजराजवयस्याः महाकवयश्च ।
शोणिताक्षः	—	दुर्मुख्यास्सहोदरः ।
बाहुकः, जानुकः	—	भिल्लराजदूतौ, मद्यपायिनौ ।

स्त्रियः

लीलावती	—	आदित्यवर्मणः पुत्री, भोजमहिषी ।
विलासवती	—	चारुमत्याः पुत्री, भोजमहिषी ।
शशिप्रभा	—	सिन्धुलपत्नी, भोजमाता ।
पद्मावती	—	लीलावतीमाता ।
चारुमती	—	विलासवतीमाता, मुञ्जस्वसा । भूपालराज्ञी ।
दुर्मुखी	—	जयपालदेवमहिषी ।
वनप्रिया, कलहंसिनी	—	भिल्लस्त्रियौ, लीलावत्यास्सख्यौ ।
वल्मीकनिवासिनी	—	भिल्लकुलदैवतं महालक्ष्मीः ॥